2719

F. All 1 + 168 ~~160~~ 159

Double Nos. 5, 11, 13, 18, 23, 30, 43, 52, 84, 96

101, 123, 126, 143

Complete

नवमाध्याय

शांकरभाष्य
आनंदगिरिटीका
श्रीधरी स्वामिकृता
पिशाचभाष्य
रामानुजभाष्य
अभिनवगुप्ती
परमार्थप्रपा
वनमाली
उत्तमवैजयन्ती
मधुसूदनी
सदानंदी
नीलकंठी
आनंदी
रामकंठी
लासिकी
पंचोली ॥

भाषा अनुवाद ॥

ॐ श्रीभगवानुवाच इदन्तु ते गुह्यतमं प्रवक्ष्याम्यनसू
यवे ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥१॥

शांकरभाष्य

अष्टमे नाडीद्वारेण धारणायोगः सगुणउक्तस्तस्य च फलमग्न्यर्चिरादिक्र
मेण कालान्तरे ब्रह्मप्राप्तिलक्षणमेवानावृत्तिरूपं निर्दिष्टं तत्रानेनैव
प्रकारेण मोक्षप्राप्तिफलमधिगम्यते नान्यथेति तदाशंकाव्यावृत्त्य
या भगवानुवाच इदमिति इदं ब्रह्मज्ञानं वक्ष्यमाणमुक्तञ्च पूर्वेष्वध्या
येषु तद्बुद्धौ संनिधीकृत्येदमित्याह तुशब्दो विशेषनिर्द्धारणार्थः इदमेव तु
सम्यक्ज्ञानं साक्षान्मोक्षप्राप्तिसाधनं वासुदेवः सर्वमित्यात्मैवेदं सर्वमे
कमेवाद्वितीयमित्यादिश्रुतिस्मृतिभ्यो नान्यदथ येऽन्यथातो विदुरन्यराजा
नस्तेऽक्षय्यलोका भवन्तीत्यादिश्रुतिभ्यश्च ते तुभ्यं गुह्यतमं प्रवक्ष्यामि गोप्यतमं
कथयिष्याम्यनसूयवेऽसूयारहिताय किं तज्ज्ञानं किंविशिष्टं विज्ञानसहि
तमनुभवयुक्तं यत् ज्ञानं ज्ञात्वा प्राप्य मोक्ष्यसेऽशुभात् संसारबन्धनात् ॥१॥

आनन्दगिरिकृत

अतीतेनागामिनोऽध्यायस्यागतार्थत्वं वक्तुं वृत्तं अनुवदति अष्टमइ
ति नाडीसुषुम्नाख्या धारणाख्येनांगेन युक्तो योगः धारणायोगः स
गुणः सर्वद्वारसंयमादिगुणस्तेन सहितइत्यर्थः तत्फलोक्त्यर्थमनन्तरा
ध्यायारम्भमाशंक्याह तस्य चेति अग्निरर्चिरित्यादिनोपलक्षितेन क्रमव
ता देवयानेन पथेतियावत् ज्ञानानन्तरमेव यथोक्तफललाभात् अल
मनेन मार्गेणेत्याशंक्याह कालान्तरइति अर्चिरादिमार्गेण ब्रह्मप्राप्तौ
मुक्तेः मार्गायत्तत्वात् न तस्येत्यादिश्रुतिविरोधः स्यादित्याशयेन शंकते
तत्रेति इत्योर्थः सम्यगर्थः उक्ताशंकानिवृत्त्यर्थमनन्तराध्यायमुत्थापय
ति तदाशंकेति संप्रयुक्तत्वेनापरोक्षत्वाभावेपि पूर्वोत्तरग्रन्थालोचनया
बुद्धिसंनिधानादिदंशब्देन ब्रह्मज्ञानं गृहीतं इत्याह तद्बुद्धाविति प्रकृता
ज्ञानात् ज्ञानस्य वैशिष्ट्यावद्योती तुशब्द इत्याह तुशब्दइति निपाता
र्थमेव स्फुटयति इदमेवेति तस्मिन्नर्थे सम्वादकत्वेन श्रुतिस्मृती दर्शय

श्री गी
टी०
९

ति वासुदेवइति ग्रंथेनत्त्वानवत्‌ इदंज्ञानमपिकेषांचिन्मोक्षहेतुरित्याशं
क्याह नान्यदिति इदंतज्ज्ञानं मोक्षाय नालमित्यत्र श्रुतिमुदाहरति अथेति
अविद्याप्रकरणोपक्रमार्थोऽथशब्दः अतो इतोऽस्मादन्यथा भिन्नत्वेनेत्यर्थः विदुरुक्त
ज्ञानमिति शेषः इदंतस्य दुर्निरूपत्वेन कल्पितत्वात्‌ तज्ज्ञानं रज्जुसर्पादिज्ञान
तुल्यत्वान्नेमफलमिहेतुरिति चकारार्थः असूयागुणेषु दोषाविष्करणं न
दृष्टिताय ज्ञानापिक्षताय इत्यर्थः ज्ञानं ब्रह्मचैतन्यं तद्विषयत्वा प्रमाणं
ज्ञानेनस्यतेनैव विशेषितत्वात्पुनरुक्तिमाशंक्य व्याकरोति अनुभवेति वि
ज्ञानमनुभवः साक्षात्कारस्तेनसहितमित्यर्थः उक्तज्ञानं प्राप्तस्य किंस्यादि
त्याशंक्याह यज्ज्ञानमिति १

स्वामिकृतटीका

परेशः प्राप्यते शुद्धभक्त्येति निश्चितमष्टमे नवमे तत्तदैश्वर्यमत्याश्चर्यं प्रपंच्य
ते । एवं तावत्सप्तमाष्टमयोः स्वीयं पारमेश्वरं तत्त्वं भक्तेर्वत्सलत्वेनात्यर्थमुक्तमिदार
दानीं च विलक्षणैश्वर्यं भक्तेश्चासाधारणं प्रभावं प्रपंचयिष्यन्‌ श्रीभग
वानुवाच विशेषेण ज्ञायतेऽनेनेति विज्ञानमुपासनं तत्सहितं ज्ञानमीश्वर
विषयमिदं तु अनसूयवे पुनः पुनः स्वमाहात्म्यमेवोपदिशतीति एवंपरमका
रुणिके मयि दोषदृष्टिरहिताय तुभ्यं वक्ष्यामि तु शब्दो वैशिष्ट्ये तदेवाह गुह्य
तममित्यादि गुह्यं तु धर्मज्ञानं ततो देहादिव्यतिरिक्तात्मज्ञानं गुह्यतरं ततो
पि परमात्मज्ञानं अतिरहस्यत्वात् गुह्यतमं यज्ज्ञात्वा अशुभात्‌ संसारात्‌ सद्य मोक्ष्यसे
एव मुक्तो भविष्यसि १

पैशाचभाष्य

समग्रस्य निर्णयानंतरं अर्जुनाय तत्स्वमाहात्म्यमपार्थमुपदेष्टुं भगवानुवा
च इदं वक्ष्यमाणं तव गुह्यतमं रहस्यतमं प्रवक्ष्यामि अनसूयवे गुणेषु दोषावि
ष्करणमसूया ज्ञानमवबोधं विज्ञानसहितमनुभवयुक्तं यज्ज्ञात्वा मोक्ष्यसे
शुभात्‌ १

रामानुजभाष्यं

इदमिति उपासकभेदनिबंधनविशेषाः प्रतिपादिताः इदानीमुपास्य
स्य परमपुरुषस्य माहात्म्यं ज्ञानिनां च विशेषं विशेषतो भक्तिरूपस्योपास

नसूयवे उच्यते इदं तु ते गुह्यतमं भक्तिरूपमुपासनाख्यं विज्ञानसहितं उपास
नगतविशेषज्ञानसहितमनसूयवे ते प्रवक्ष्यामि मद्विषयं सकलेतरविसजा
तीयमपरिमितप्रकारमाहात्म्यज्ञानैवमेव संभवतीति मत्वा नायते प्रवक्ष्या
मीत्यर्थः यज्ज्ञात्वा वक्ष्यमाणमनुष्ठानपर्यन्तं ज्ञात्वा मत्प्राप्तिविरोधिनः सर्वस्मा
त् अशुभात् मोक्ष्यसे ॥

अभिनवगुप्तकृतटीका ६

अनसूयवे ज्ञानसंकीर्तौ कारणमुक्तं ज्ञानविज्ञाने प्रागेव व्याख्याते
विद्यासंवेदेवीत्यनेन शैवेनुक्ते ॥

परमार्थप्रपाटीका ७

एवं सर्वाध्यायेषु मतग्रामः समवायमित्यादि वाक्यैरूप प्रपंच ज्ञानस्य तत्त्व
गर्भितं मिथ्यात्वं दर्शयित्वेदानीं तद्देहोपपत्त्या दृष्टौ कर्तृत्वया योगावे
भववतः तस्य सत्यत्वं दर्शयितुं नवमाध्यायप्रवृत्तिः तत्र प्रथमं वक्ष्यमाण
प्रमेयस्याति रहस्यत्वेन दुर्लभत्वमाह इदमित्यादिना त्रिभिः । कृपयावक्ष्ये
प्रश्नेमपि अनसूयवे देहपातित्वादि दोष दृष्टिरहिताय तेतुभ्यं विज्ञान
सहितं ज्ञानं वक्ष्यामि असतोतिरीक्ष्यात्सूयात दोषारोपो गुणेषु मिषा मत्त्वात्मकेः
ज्ञानं शास्त्राचार्योपदिष्टं विज्ञान मनुभव रूपं यत इदं गुह्यं तमप्रकाश्य
प्रमेयं स्वधर्मचरणादि ततोपि देहादि व्यतिरिक्तात्मस्वरूपं गुह्यतरं ततो
पि परमात्मनः साक्षात्दर्शनं गुह्यतमं तदेवाह यदिति यज्ज्ञात्वा अशुभात् दुः
खप्रदात् प्रपंचात्मोक्ष्यसे परमात्मप्रतीतौ प्रपंचातीतो भविष्यसि ॥

वनमालीटीका ८

रहस्यं भक्तियोगं च स्वभक्तायातिगोपितं तदमेद्भुतमैश्वर्यं अब्रवीत् भक्तिरू
द्वये । तत्रानसूयवेताः सततं योमां स्मरति नित्यशः तस्याहं सुलभ इति भगवत्प्रा
प्तौ भक्तिरेवासाधारणहेतुः सा च सर्वोत्तमत्वपीश्वरकाविच्छिन्नप्रेमप्रवाहरूपा
प्रतिरूप्यते तत्र निविष्टं सर्वोत्तमत्व ज्ञानं ज्ञानं तेहमिति सप्तमे प्रतिज्ञातं संदे
पातिरूपितं च प्रसक्ताव प्रसक्तात्मम प्रश्नान्निरूप्य तदेवानेरणव कमादेरोसौति
इदमिति इदं ज्ञानं तेहं सविज्ञानमिति सप्तमे प्रतिज्ञातं प्रायेणोक्त मग्रे वक्ष्यमा
णमप्युनोच्यमानं ज्ञानं मम याथात्म्यापरोक्षं विज्ञानं च स्वरूपकजीवजडेभ्यो वि
विक्ततया सर्वनियामकत्वादिना अपरोक्षस्वरूपं ज्ञानं तत्सहितं तेनसूयक

र्षेणवक्ष्यामि तदाह इ न ध्यानादिकं रूपं परोक्षं च ज्ञानं व्यावर्तयति इदमेव स
र्वोत्तमत्वेन प्रागव इत्यपरोक्ष रूपं संसारान्मोक्षहेतुर्न तु ध्यानरूपं परोक्षं वा त
स्यापरोक्षज्ञानकत्वात् कीदृशं ज्ञानं गुह्यतममतिगोप्यमतिरहस्यं जातमात्र
स्य संसारोच्छेदकत्वात् गोप्यमविशिष्यगणाधिकारं दास्यामि तुभ्यं अनसूयवे
असूयागुणेषु दोषाविःकरणा विफला सर्वदा यमात्मैश्वर्यख्यापनेनात्मानं प्र
शंसति मत्सरत्वादित्येवं रूपा तद्रहिताय इत्यर्थः कीदृशं ज्ञानं यद् ज्ञात्वा प्राप्याशु
भावत्संसारबंधनादपारदुःखरूपात्त्वं यथा मोक्ष्यसे सर्वोत्तमत्वेनापरोक्षे देह
प्रवाहे च सति प्रारब्धकर्माभावे च तत्क्षणमेव मुक्तिरिति भावः १

कुसुमवैजयन्तीटीका ९

नवमे परमैश्वर्यं स्वमत्यासैश्वर्यविजृंहरीः स्वभक्तेश्चातिमाहात्म्यं श्रुविवान्भगवा
न् विभुः एवं सप्तमेष्टमे चाध्याये उपासनप्रकारा उपासकभेदाश्चोक्ता इदानी
मुपास्यरूपस्य स्वस्य स्वोपासकस्य च माहात्म्यं प्रतिपादयन्स्वेतरस्य रोपासकान्नि
त्य रूपासनरूपायाः शुद्धायाः स्वभक्तेः स्वरूपं प्रवदन्पार्थं सखो भगवानुवाच
इदं त्विति गुह्यतममिति तदाह इदं येयं मम भक्तिर्ज्ञानफलरूपा भवति न तु ज्ञान
साधनरूपिकेति सूचितम् इदमुपासनसंज्ञं मद्भक्तिरूपं गुह्यतमं निरतिशय
गोपनीयं द्वितीयादिषष्ठान्तेन मया यदुपदिष्टमात्मज्ञानं तद्गुह्यं सप्तमाद्यष्टमा
न्तेन यदुपदिष्टं मदैश्वर्यज्ञानं तद्गुह्यतरं नवमादिद्वादशान्तेन यदुपदेक्ष्यन
ज्ञानं तद्गुह्यतममित्यर्थः ज्ञानं ज्ञायते मत्स्वरूपमनेनेति निरुक्त्या केवलभक्ति
लक्षणं ज्ञानसंज्ञमित्यर्थः विज्ञानसहितं मदुपासनगतविशेषज्ञानसहितं
वक्ष्यमाणं ते तुभ्यं प्रवक्ष्यामि प्रकर्षेण साकल्येन पूर्वं मया कस्मैचिदपि यन्मया
नोक्तं तदिदं ते वक्ष्यामीत्यर्थः नन्वस्मै कस्मात्कारणात्त्वमिदं तावोच इत्यपे
क्षायामाह अनसूयवे मद्गुणेषु दोषारोपरहिताय अन्यो ह्युपविष्टिः प्रभृतिरपि
तुः त्विनेजीवं दृष्ट्वा तिकरुणया करुणासागरस्येश्वरस्यैवं कर्म कर्तुमनुचि
तं भवतीत्येवं क्वचित्क्वचिन्मकरुणादिगुणेषु दोषदृष्टिं करोति अनसूयस्तु
न त्वेमयेदं ज्ञानं नोक्तं त्वं नमस्यः परमेश्वरो मम मित्रं श्रीकृष्णोयं किंचित्तु मम
शुभं वा कर्म कृतवान् करोति करिष्यति च नन्वयं सर्वेषां जगतां मम च मंग
लायैव भवति न त्वमंगलायेत्येवं विश्वासपूर्वकं मद्गुणेषु गुणबुद्धिमानाय
ते तुभ्यमेव प्रवक्ष्यामि नान्यस्मै इत्यर्थः तस्य ज्ञानस्य किं फलं स्यादित्यपेक्षाया

माह यदिति यज्ज्ञानमनुष्ठानपर्यंतं वक्ष्यमाणं ज्ञात्वानुष्ठायाशुभात्
सम्याप्तिविरोधिगणात्संसाराद्वा मोक्ष्यसे मुक्तो भविष्यसि १

मधुसूदनीटीका १

पूर्वाध्याये मूर्धन्यसंचारनाडीकेण हृदयकंठभ्रूमध्यादिधारणासहितेन
सर्वेन्द्रियद्वारसंयमरूपेण केवलयोगेन स्वेच्छयोत्क्रांतप्राणस्यार्चिरादि
मार्गेण ब्रह्मलोकं प्रयातस्य तत्र सम्यग्ज्ञानोदयेन कल्पांते परंब्रह्मप्रा
प्तिलक्षणा क्रममुक्तिर्व्याख्याता तत्र चानेनैव प्रकारेण मुक्तिर्लभ्यते ना
न्यथेत्याशंका अनन्यचेताः सततं यो मां स्मरति नित्यशः तस्याहं सुलभः
इत्यादिना भगवत्तत्वविज्ञानात् साक्षान्मोक्षप्राप्तिरभिहिता तत्र चानन्य
भक्तिरसाधारणो हेतुरित्युक्तं पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यये
ति तत्र पूर्वोक्तयोगधारणापूर्वकप्राणोत्क्रमणार्चिरादिमार्गगमन
कालविलंबादिक्लेशं विनैव साक्षान्मोक्षप्राप्तये भगवत्तत्वस्य तद्भक्ते
श्च विस्तरेण ज्ञापनाय नवमोध्याय आरभ्यते अष्टमे ध्येयब्रह्मनिरूपणे
न तद्ध्याननिष्ठस्य गतिरुक्ता नवमे तु ज्ञेयब्रह्मनिरूपणेन ज्ञाननिष्ठस्य
गतिरुच्यते इति संक्षेपः तत्र वक्ष्यमाणज्ञानस्तुत्यर्थं त्रीन् श्लोकान्
इदं प्रागवद्धोक्तमग्रे वक्ष्यमाणमधुनोच्यमानं ज्ञानं शाब्दप्रमाणकं ब्रह्म
कं तत्वविषयं ते तुभ्यं प्रवक्ष्यामि तु शब्दः पूर्वाध्यायोक्तध्यानाज्ज्ञानस्य वैल न्
क्षण्यमाह इदमेव सम्यग्ज्ञानं साक्षान्मोक्षप्राप्तिसाधनं न तु ध्यानं तस्य
ज्ञानानिवर्तकत्वात् तदंतःकरणशुद्धिद्वारेदमेव ज्ञानं संपाद्य क्रमेण
मोक्षं जनयतीत्युक्तं कीदृशं ज्ञानं गुह्यतमं गोपनीयतमं महारहस्य ति
त्वात् यतो विज्ञानसहितं ब्रह्मानुभवपर्यंतं ईदृशमतिरहस्यमप्यहं शि
स्य ष्यगुणाधिक्याद्वक्ष्यामि तुभ्यमनसूयवे असूया गुणेषु दोषदृष्टिः तदावि
ष्करणादिफला सर्वदा यमात्मैश्वर्यख्यापनेनात्मानं प्रशंसतिमत्सरस्ता
दिमेवं रूपात्तद्रहितायानेनार्जवसंयमावपि शिष्यगुणो व्याख्यातौ पुनः
कीदृशं ज्ञानं यज्ज्ञात्वा प्राप्य मोक्ष्यसे सद्य एव संसारबंधनादशुभात्सर्व
दुःखहेतोः [illegible] १

सदानन्दीटीका ॥

परंब्रह्मानन्दे सकलसुरवंद्ये सुरमतः गतद्वंद्वे मंदाकृतिदनुजकंदो

कुरुहेरे प्रियः कंदेनं दात्मजउदितवंहसितमुखे मुकुंदे संदेहोमेभवत्त
मनसोद्वंद्वविरतेः १ पूर्वाध्यायेहिमूर्द्धन्यनाडीद्वारेणयोगिनः ब्रह्मरा
न्ध्रनिर्गोविंदेध्याननिष्ठांगतस्यवै २ योगेनसेतुयोत्क्रांतप्राणस्यार्चि
र्मुखाध्वना ब्रह्मलोकंप्रयातस्यततश्चोधोदयेनच ३ कल्पांतेब्रह्मसं
प्राप्तिर्व्याख्यातात्क्रममुक्तता तत्रानेनप्रकारेणमुक्तिःस्यान्नान्यथाति
ति ४ शंकायांहरिणाशोकासाक्षान्मुक्तिःस्ववेदिनः अनन्यचेताःसततंयो
मांस्मरतिनित्यशः ५ तस्याहंसुलभस्त्वेवंभगवन्नवबोधतः अनन्याभक्ति
रेवास्तिमुक्तेहेतुःपरागतेः ६ पुरुषःसपरःपार्थभक्त्यालभ्यस्त्वनन्यया ७
यस्याधारणोहेतुःक्रमात्तस्यातिर्हरौ ७ अतःसाभक्तिरधुनाभगवन्नवथी
श्रुता वर्णितेनवमेध्यायेतस्यामाहात्म्यमेवच ८ अष्टमेध्येयरूपस्यब्रह्म
णःसंनिरूपणात् गतिस्तद्ध्याननिष्ठस्यक्रममुक्तिफलोदाहृता ९ नवमे
ज्ञाननिष्ठस्यज्ञेयब्रह्मनिरूपणात् उच्यतेगतिरित्येवंनस्वास्यार्थमिहाद
रात् १० स्रोकत्रयमुवाचेशोभगवान्हरिरव्ययः इदंप्रागवष्टव्याप्रोक्तं
वक्ष्यमाणमिहाधुना ११ शाहप्रमाणकंज्ञानंब्रह्मतत्त्वैकगोचरं सनेत्नक
ध्यानतोज्ञानेवैलक्षण्यमिहोच्यते १२ सम्यग्ज्ञानमिदंसाक्षान्मोक्षसंप्रा
प्तिसाधनं गोपनीयतमंचातिरहस्यत्वेनसंमतं १३ ब्रह्मात्तुभवपर्यंतं
सभ्यंगुह्यमपीदृशं अहंशिष्यगुणापेक्षात्स्यवक्ष्याम्यनसूयवे १४ सेष्य
र्थेख्यापनेनार्थसदात्मानंप्रशंसति मदग्रेरुनसूया तच्छुश्रूषायाऽर्जवशा
लिने १५ यस्मात्प्राप्यमोक्षस्तस्मैसंयोज्यभात्संसारबंधनात् १६ ॥ १ ॥

नीलकंठीटीका १२

पूर्वाध्यायेकिंतद्ब्रह्मेत्यादिसप्तप्रश्नाः अक्षरंब्रह्मपरम मित्यादिनासं
क्षिप्य व्याख्याता तद्ज्ञानस्यपृथक्प्रयोजनाकांक्षायां कर्मविदस्याधि
भौतिकंधूमादिमार्गप्राप्यंस्थानमितिनिरूपणेनप्राप्यप्रापकादिविभा
गोदर्शितः तेनकर्माधिभूतेव्याख्याते तथाक्षरोपास्यनर्यामिणोरुपासक
स्यार्चिरादिमार्गेणक्रममुक्तिस्थानप्राप्तिरित्युक्तंतेनाधिदैवाधियज्ञौव्या
ख्यातौ प्रोमित्येकाक्षरमित्यादिनाप्रयाणकालेकथंज्ञेयोसीत्यस्योत्तरंव्या
ख्यातं तदेवंध्येयब्रह्मविद्यासांगानिरूपिता परिशिष्टमाध्यात्मंब्रह्मवि
षयंप्रश्नद्वयंकिंतद्ब्रह्मकिमध्यात्ममितितद्विवरणायनवमोध्यायआर

भ्यते न केवलं अर्चिरादिगतिप्राप्याकालान्तर एव मुक्तिरस्ति किं तर्हीहैव
सद्योमुक्तिरस्तीति विशेषं वक्तुं श्रीभगवानुवाच इदं तु ते इति इदं वक्ष्य
माणं तु सर्वस्मा(च्)छ्रेयाद्विलक्षणं ज्ञेयं ते तुभ्यं गुह्यतममतिगोप्यं प्रवक्ष्या
मि अनसूयवे असूयागुणेषु दोषाविष्करणं तद्रहिताय ज्ञानं ज्ञानमिमा
त्मस्वरूपं ब्रह्मविज्ञानेनानुभवेन सहितं न तु केवलं पारोक्ष्येण यत् ज्ञानं
ज्ञात्वा साक्षात्कृत्य अशुभात्संसारान्मोक्ष्यसे अत्र यत्सप्तमादौ ज्ञानं तेऽहं
सविज्ञानमिदं वक्ष्याम्यशेषत इति प्रतिज्ञातं यस्य च विज्ञानाय शाखा
वेद्व्यायेनोपलक्षणीभूतं जगत्कारणं ब्रह्म तत्रैव निरूपितं यद्विज्ञानेऽ
धिकारसंपत्त्यर्थं तस्यैव सगुणस्योपासनमुक्तं तदिह सर्वशेषीभूतं ब्रह्म
वक्तव्यमिति तथैव प्रतिजानीते वचनमात्रेणैवाद्यापरोक्षं ज्ञानं जायत इ
ति तत्रैव सुमादितं न विस्मर्तव्यं १।

आनंदीटीका १२

एवं प्रकृतिपुरुषयोः संयोगवियोगकलनस्य लवादिप्रलयान्तस्य सर्वका
र्यनिमित्तकारणस्य कालस्य स्वरूपं लक्षयित्वा कालपुरुषप्रकृतीनाम
धिष्ठानस्य ज्ञानेन सर्वजगतः कर्तुः सर्वकर्मफलदस्य सर्वान्तर्यामिनः
परमेश्वरस्यैव परापरवस्थारूपेण स्वरूपं लिलक्षयिषुस्तावदाभ्यन्तर
संयमक्रमेण ब्रह्मप्राप्तौ निरन्तरं तपःक्लेशसहत्वमुपायमनन्यव्यापा
रणं चरमदेहोत्क्रमणं तावत्प्रतीक्षमाणानां मुनीनामेवाधिकारः
न तु सकुमाराणां प्रजापालनादिव्यापृतानां भवादृशामित्यर्जुनस्याश्र
मणा स्ववशसाध्यं सद्यो ब्रह्मप्राप्त्युपायं परमेश्वरभजनं ज्ञानकर्मसमुच्च
यात्मकं तत्पर्यायं बहुशः प्रोक्तमपि पुनर्हृदये सन्निवेशयितुम् । तथाहुः
संयमेवलक्षणाय अशुभात् संसारात् अनसूयवे अज्ञावते १

रामकंठीटीका १४

अष्टमाध्यायपरिसमाप्तौ अष्टमप्रश्ननिर्णयेन कालेशुक्लकृष्णगतिद्वय
ज्ञानं ब्रह्मप्राप्त्युपायत्वेनोपदिष्टं अनन्तावन्मात्र एव ब्रह्मप्राप्त्युपायत्वया
मावेदीत्यर्जुनमष्टमाध्याये प्रतिपादितमेवोपदेशं स्मारयन्संग्रहेण भगवा

उवाच तथाह्येवातिरेके अष्टमाध्यायोक्तप्रबलक्षणोपायव्यतिरेकेणेदं सं
शुद्धिमात्रिहितं ज्ञानं ब्रह्मप्राप्त्युपायभूतं विज्ञानेन विशिष्टज्ञानेन बोधेन सं
युक्तं तुभ्यमहं प्रकर्षेण संक्षेपतः सारोकरूपेणातिशयेन वक्ष्यामि कथयि
ष्यामि कीदृशायानसूयवे अज्ञाविशुद्धबुद्धिनायोस्मै ज्ञानायनसूयसि
यथोक्तफलस्य संभावनावशादतत्त्वं न गर्हणमारभसे कीदृशं ज्ञानं गु
ह्यतमं गुह्यं गुह्यतरं च सर्वाध्यायेषु ज्ञानमुक्तं इदं तु तदपेक्षयातिगुह्यम्
अनाविर्भूतविवेकजनानां गुह्ययं इत्नतेर्थ निश्चितं रहस्यं तया वा गुह्य
मत एव वचं यद्विदित्वा जन्मजरामरणचक्रपरिवर्तनमानलक्षणादशुभा
दश्रेयसो मोक्ष्यसे स्वयमेव मोक्षं प्राप्स्यसि अतो वक्ष्यमाणज्ञानोपायनिष्ठ
स्यांतकाले गतिद्वयज्ञानाभ्युपायव्यतिरेकेणापि ब्रह्मप्राप्तिर्निर्दिष्टैव
अतएवास्य ज्ञानस्य यं सार्थमाह १

लासिकी [illegible] टीका १५

एवमुक्तप्रकारस्य योगस्य भक्तियोगं विना विदेहमुक्त्यावहस्य प्रसंगतो वि
स्तरेण विदेहमुक्तेर्लक्षणं विषयं प्रभावं चोक्त्वा अधुना भक्तियोगस्य स
र्वेषु योगेषु श्रेष्ठस्य तनयाम्रवितस्यापि पुनर्लक्षणविषयप्रभावमोक्ता
६त र्थविवक्षया तं स्तनस्य र्थश्लोका श्रीभगवानुवाच नुगमुलक्षणस्य
विदेहमुक्तिप्रदस्य योगस्य वैलक्षण्यार्थः इदं वक्ष्यमाणं विशेषेण ज्ञायते
नेनेति विज्ञानमुपासनं तत्सहितं ज्ञानं ईश्वरविषयं जीवन्मुक्त्यावहम् अन
सूयवे पुनः पुनः स्वमाहात्म्यमेवोपदिशतीति सर्वं परमकारुणिके मयि दोष
दृष्टिरहिताय ते तुभ्यं वक्ष्यामि कीदृशं गुह्यतममतिशयेन गोपनीयम् ध
र्मज्ञानं गुह्यं ततोपि देहादिविवेकेनात्मज्ञानं गुह्यतमम् इदं त्वीश्वरज्ञानभ
क्तियोगलक्षणं गुह्यतमम् यज्ज्ञानं ज्ञात्वा प्रमाणेनावधार्य अशुभात्सर्व
दुःखहेतोः संसारान्मोक्ष्यसे मोक्षं प्राप्स्यसि [illegible] १

पंचोलीटीका

अष्टमे नाडीद्वारेण धारणया सगुणमुपासनमुक्तं तस्य चाग्निर्ज्यो
तिरादिमार्गेण ब्रह्मलोकं प्राप्तस्य कालांतरे परं ब्रह्मप्राप्तिलक्षणमना
वृत्तिरूपं फलमुक्तमिदानीं नवमे साक्षान्मुक्तिसाधनं निर्गुणब्र

त्वं वै इमास्त्वं च लोकानादित्य इत्यादेश्च मोक्षधर्मे सप्रत्यक्षः
प्रतिहिंसो देवेषु स्त्वाशिन्हि समभवति यएवंविद्वान्सत्यत्वे
देतिसामवेदे वारुणब्राह्मणवाक्यं धर्मो भगवान् नहिषवं
यस्य सर्वजगद्धूत इति धर्मः पृथ्वीवायधर्ममूर्द्धनीति प्र
योगान्मोक्षधर्मे भारभूतः स्थितो योगीति च मतो सनत्स्त्रि
यमानसो विमतीति च श्रुतिः धर्मो वा इदमग्र आसीत् न
पृथिवी न वायुर्नाकाशो न ब्रह्मा न रुद्रो न देवा न ऋषयः
साध्यायदिति च सामवेदे वाभव्यब्राह्मणवाक्यं प्रत्यक्षावग
मप्राह्येनापरोक्षत्वानसाधनत्वमुक्तं नहिज्ञानाधार १

5/2

भाषा अनुवाद

केवल भक्ति हीके द्वारासे परमेश्वर पाये जाते अर्थात् ईश्वरका तत्वज्ञान
भक्ति विना कोइ उपायसे सुलभ नहींहै यही अष्टम अध्यायमे स्थिर
कियाहै सोई ईश्वर का अद्भुत ऐश्वर्य औ अपनी भक्ति की सर्व श्रेष्ठ महि
मा अब नवमे अध्यायमे विस्तारसे भगवान आप कहतेहैं कि जिस से
परमेश्वर जाने जाय सोई विज्ञान कहे उपासना तिस के सहित ईश्वर वि
षयक जो यह ज्ञान गुह्यतम अर्थात् शास्त्रोक्त धर्म्मज्ञान गुह्य कहे
गोपनीयहै और उसकी अपेक्षा देहादिसे भिन्नजो आत्म ज्ञान सो गुह्य
तर कहे अधिक गोपनीय फेरि आत्मज्ञानसे भी परमात्मज्ञान गुह्य त
मंहै अत्यन्त गोपनीय है सो असूया रहित अर्थात् वार वार अपना म
हात्म उपदेश करते हुये मेरेमे दोष दृष्टि रहित तुमहौ इससेमै अब
दयाकरि तुमसे कहूंगा कि जिसको जानिकरि इस अशुभ रूप संसा
रसे बन्धनसे छूटिजायगे १ ॥

दोहा

तोकहं भक्तियुक्तको कहौं मतौं प्रतिगुप्त ज्ञानसहितविज्ञानकेछु
टैं अशुभजिहंयुक्त १ उदितसदा जययुक्तरघुवीरचंद्र अद्भुत
संतहृदेविकसैंकमल जो अर्थसुधारेसत २॥

राजविद्याराजगुह्यंपवित्रमिदमुत्तमं
प्रत्यक्षावगमंधर्म्यं सुसुखंकर्तुमव्ययं २

शांकरभाष्य

तच्चैवेति राजविद्येति राजविद्या विद्यानांराजा दीप्त्यतिशयत्वात्
दीप्यते हीयमतिशयेन ब्रह्मविद्या सर्वविद्यानां राजगुह्यं तथा गुह्यानां
राजा पवित्रं पावनमिदमुत्तमं सर्वेषां पावनानां शुद्धिकारणानामिदं
ब्रह्मविज्ञानमुत्कृष्टतममनेकजन्मसहस्रसञ्चितमपि धर्माधर्मादि स
मूलं कर्म क्षणमात्राद्भस्मीकरोति यतोऽतः किंतस्य पावनत्वं वक्तव्यं
किंच प्रत्यक्षावगमं प्रत्यक्षेण सुखादेरिवावगमो यस्य तत्प्रत्यक्षावग
मं अनेकगुणवतोपि धर्मविरुद्धत्वं दृष्टं श्येनयागादिव न तथा आत्मज्ञा
नं धर्मविरोधि किन्तु धर्म्यं धर्मादनपेतं एवमपि स्यात् दुःसंपाद्यमि
त्यत आह सुसुखं कर्तुं यथा रत्नविवेकविज्ञानं तत्राल्पायासानां अन्येषां
कर्मणां सुखसंपाद्यानामल्पफलत्वं दृष्टं दुष्कराणां च महाफलत्वं दृष्ट
मितीदन्तु सुखसंपाद्यत्वात् फलक्षयाद्व्येतीति प्राप्ते तत आहाव्ययं ना
स्य फलतः कर्मवद्व्ययोऽस्तीति अव्ययं अतः श्रद्धेयमात्मज्ञानं २

आनंदगिरिकृत

तदाभिमुख्यसिद्धये तज्ज्ञानं स्तौति तच्चेति ब्रह्मविद्या विद्यानां राजा
श्रेष्ठा इत्यत्र हेतुमाह दीप्तीति कुतो ब्रह्मविद्यायाः विद्यान्तरेभ्योदीप्त्य
तिशयित्वं तत्राह दीप्यते हीति दृश्यते हि विद्वदन्तरेभ्योलोके ज्ञाति
रेकोब्रह्मविदामितिभावः उत्कृष्टतमं शुद्धिकारणं ब्रह्मज्ञानमित्येतदु
पपादयति अनेकेति तत्र श्रुतिस्मृतिप्रमाणयितव्ये नशास्त्रैकगम्यमि
दंज्ञानं किन्तु प्रत्यक्षप्रमेयमित्याह किंचेति प्रत्यक्षमवगम्यमानम
स्तीति तथा यद्वावगम्यत इति अवगमः फलं प्रत्यक्षोवगमोस्येति
दृष्टफलत्वं ज्ञानस्योक्तं धर्म्यमित्येतद्व्याकरोति अनपेतमिति धर्म्यस्ये
व तस्य क्लेशसाध्यत्वमाशंक्याह एवमपीति रत्नविषयं विवेकज्ञानं
सम्प्रयोगादुपदेशापेक्षादनायासेन दृष्टं तथेदं ब्रह्मज्ञानमित्याह यथे

श्री गी० टी० न

तः स्वहोवगमो
धो यस्य तत्प्रत्य
वगमं दृष्टफल
र्थः धर्म्यं

ति अव्ययमिति विशेषणमाशंकापूर्वकं विवृणोति नत्वेवमादिना अवदात
शुभिः समस्यर्थः ज्ञानस्याक्षयफलत्वमेव फलितमाह अत इति २

स्वामिकृत

किंच राजविद्येति इदं ज्ञानं राजविद्या विद्यानां राजा ^राजगुह्यं^ गुह्यानां च राजा विद्यासु ^राज्ञां विद्या राज्ञां गुह्यमिति वा^
गोप्येषु चातिश्रेष्ठमित्यर्थः राजदन्तादित्वादुपसर्जनस्य परनिपातः उत्तमं पवित्रमि
दमत्यंतपावनं इदं प्रत्यक्षावगमं च धर्म्यं धर्मादनपेतं सर्वधर्मफलत्वात् कर्तुं सुसु ^वेदोक्तसर्व^
खं च सुखेन कर्तुं शक्यमित्यर्थः अव्ययं चाक्षयफलत्वात् २

पैशाचभाष्य

राजविद्येति विद्यानां राजा राजविद्येयं ब्रह्मविद्या राजगुह्यं विवस्वदादि
भिः राजभिः रक्षितत्वात् पवित्रं पावनं प्रत्यक्षावगमं स्वानुभवं च धर्म्यं धर्मादन
पेतं सुसुखं कर्तुं सुखेनानुष्ठेयं अव्ययमविनाशि २

रामानुजभाष्य

राजविद्येति राजविद्या विद्यानां राजा राजगुह्यं गुह्यानां राजा राज्ञां विद्या रा
जविद्येति वा राजानो हि विस्तीर्णागाधमनसः महामनसामियं विद्येत्यर्थः
महामनस एव गोपनीयगोपनकुशला इत्यर्थः तेषामेव गुह्यमिदमुत्तमं पवि
त्रं मत्प्राप्तिविरोध्यशेषकल्मषापहं प्रत्यक्षावगमं प्रत्यक्षः स्वावगमो विष
यः प्रत्यक्षभूतोवगमो विषयो यस्य ज्ञानस्य तत् प्रत्यक्षावगमं भक्तिरूपेणो
पास्यमानोहं तदानीमेवोपासितुः प्रत्यक्षतामुपगतो भवामीत्यर्थः
अथापि धर्म्यं धर्मादनपेतं धर्मत्वं हि निःश्रेयससाधनत्वं स्वरूपेणैवात्यर्थप्रि
यत्वेन तदानीमेव दर्शनापादनतया च स्वयं निःश्रेयसरूपमपि निरतिश
यनिःश्रेयसरूपात्यंतिकमत्प्राप्तिसाधनमित्यर्थः अत एव सुसुखं कर्तुं सुसु
खोपादानमत्यर्थप्रियत्वेनोपादेयं अव्ययमक्षयं मत्प्राप्तिं साधयित्वापि स्वयं न
क्षीयते एवंरूपमुपासनं कुर्वतो मम स्वदाने कृतेपि न किंचित्कृतं मया स्यादिति मे
प्रतिभातीत्यर्थः २

राजते सर्वविद्यामध्ये दीप्यते अभिनवगुप्तकृत या इहैवस्फुच्यते

अध्यात्मविद्या विद्यानां इति राज्ञां जनकादीनामप्यधिकारस्तेषां रहस्यं प्रति
गूहनात् क्षत्रियस्य लाभेन वीरभावेनाविकम्पत्वात् कर्तुमनुष्ठातुं सुखं

नचास्यब्रह्मोपासनात्मनः कर्मणोस्य कर्मवदुपभोगादिनाव्ययोस्ति २

परमार्थप्रपाटीका ७

ग्रंथप्रतिपाद्यप्रमेयस्यातिदुर्लभत्वं तारकत्वंचाह राजविद्येति विद्यानाम
ध्यात्मविद्यानां राजा तथा गुह्यानां गोप्यानां पार्थानां राजा प्रति श्रेष्ठमि
त्यर्थः पवित्रं शोधकं उत्तमं उत्कृष्टतमं आत्मप्राप्त्यंतरंगकारणं प्रत्य
क्षावगमं प्रत्यक्षेण प्रतीत्या अवगम्यते येयं धर्म्यं धर्मादनपेतं सर्व
धर्मफलत्वात् कर्तुं अनुष्ठातुं सुसुखं सुखेन शक्यं नतु कायक्लेश
जनकं अव्ययं अक्षयफलत्वात् २

वनमालीटीका ८

एतत्सर्वाभिव्याख्यापनज्ञानं स्तौति राजेति राज्ञां योगीश्वराणां विद्या राजविद्या
विद्यानां राजा प्रधानं श्रुतेर्विद्या राज्ञां तां तेन देदीप्यमानानां योगींद्राणां सनत्कु
मारादीनां गुह्यं गोप्यं राजगुह्यं गुह्यानां राजेति वा राजदंतादित्वादुभयत्र पूर्व
निपातः पवित्रमिदमुत्तमं प्रायश्चित्तैर्हि किंचिदेकमेव पापं निवर्तते नियतं च
वासनानुरूपाणां तिष्ठत्येव यतः एतत्सत्पापं करोति इदं तु तेषां जन्मकृतानामपि
पापानां सवासनानां सकारणानां ज्ञानमात्रेण उच्छेदकमतः सर्वोत्तमं यावदनादिदमेव
अलौकिकं दिव्यं नियामकं तथा प्रतिस्थितं इति प्रसिद्धो भगवान् सप्रमाणः प्रति
हि मोक्षमिति श्लोकः अवगम्यते प्राप्यते येन तत्प्रत्यक्षावगमं प्रथमं शास्त्रजन्यं श्रनन्तरं
मैत्रीलक्षण परोक्षज्ञानं ततो निदिध्यासनेनापरोक्षज्ञानं ततो मोक्ष इति भावः
यद्वा प्रत्यक्षमवगम्यं फलं यस्मात् तत् ज्योतिष्टोमादीनामिव तस्मा विलंबेन प्र
वाह सर्वकर्मणां तत्परोक्षस्य कालांतरे न फलं किं तत्र सिद्धेन कालेन स्वरूपा
विर्भाव रूपो मोक्षो भवतीति भावः सर्वजगतो धारकत्वाद्धर्मो हरिस्तद्विषयकं
धर्म्यं धर्मादनपेतं वा धर्म्यं अनेकजन्मसंचितनिःकामकर्मशोधितमनसां पार्थसा
त्मनां तादृशैः संपादनमित्याह सुसुखं कर्तुं गुरूपदर्शितविचारसहकृतेन वे
दांतवाक्येन सुखेन परमानंदघनं श्रुतैरनेकजन्मनिःकामकर्मशोधितमनसा
साक्षात्कारः कर्तुं शक्यत इत्यर्थः भगवद्गुणादिश्रवणकीर्तन ध्यानापरोक्षाणां
सकालपरपरमानंदकारकेन सत्वाधिनम्रानापासेन यह तिः स्यादिति भा
वः मोक्षाख्यमव्ययफलकत्वादव्ययं सफलं मोक्षमविद्यानिवृत्तिरूपं कालेन्द्रा
विर्भावरूपं प्रसाध्य यद्यं न व्येति मोक्षेऽपि तिष्ठतीति वा प्रमाणानामपि सर्वोत्तम

श्री
गी टी
न

नापरोक्षश्चर्वकाशुरागस्यसत्त्वाभाविकस्यभगवतिसत्त्वात् पर्यवस्यत्तत्कारोसर्वो
दृक्षत्वेसर्वरैश्वर्यतोयेनप्रवर्तंतेतितदाह अथवा गाढमुपदेशेनतत्पर्यवस्यदर
हेष्यस्यैवतेप्रवक्ष्याभियायेनप्रवृत्तं वेदविधिनिवर्त्यविद्यानां षंतानः कर
एतत्प्रयमासात्प्रमाणामत्तानामः पापकारिणीं सर्वसंपदमापाद्यतामविकालविनोदा
वेद्विवेद्यमानाद्वैविद्याद्यविहितोपायाभावाद्वयावत्वतत्त्वं श्रेयाएवसत्त्वाद्
सत्सुकृतेसंसारवर्गविविधत्वेनिरूपमेवबर्तते अत्रानंदकव्यावृत्तनीयुक्तमि
वीपादयेतिद्वैवर्णंतीयर्थः

कुसुमवैजयन्ती ९

कीदृशं तज्ज्ञानमित्यपेक्षायामाह राजविद्येति विद्यानां सर्वासां शांडिल्यवैष्णा
नादहरादिशास्त्रविकानां राजा श्रेष्ठतमः सप्तरात्रपित्र्यव्रतपंचकक्षुधम
भगवत्स्वपक्षादजनकादीनां महोदारविमानां राज्ञीणां विद्याराजविद्या
गुह्यानामतिरहस्यानां मालयाद्याम्नायानादीनां राजेतिराजगुह्यं राजदन्ता
दित्वादुपसर्जनस्यपरनिपातः राजविद्याच राजगुह्यंच तयोःसमाहारो राज
विद्याराजगुह्यं यद्वा राजविद्यानां सर्वासां राजगुह्यमतिशयगोपनीयं यद्वा
विद्यानां गुह्यानांच राजा दीप्तिकं येनो विद्युभमेवसर्वाविद्याः सर्वेगुह्याश्च
प्रकाशन्ते नतुतां विना चंद्रिकां विना कृष्णेघटपटादयः पदार्थाश्च यथानप्र
काशन्ते तद्वदित्यर्थः नन्वस्याविद्याराजत्वेपिप्रदिपापरोगदरिद्रदुःखादिराज
वदिदमप्यपवित्रंस्यान्नहिकेनापिजनेननाङ्गीक्रियतेअतिचेत्तत्राह पवित्रमि
ति पवित्रं मनसाभिविरोधिसमस्तपापनाशकं शुद्धस्वरूपं नतपापादिवन्मलि
नत्वेनाग्राह्यमित्यर्थः नत्वाशुतमं लिङ्गदेहपर्यन्तसकलपापप्रशमनस्वरूपत्वा
त्सर्वेभ्योनवेराग्यादिसत्त्वामिसाधनेभ्यश्चोत्कृष्टं तथोत्कर्षपापीयो आरब्धफलंपापंकूटं
बीजंफलोन्मुखं क्रमेणैवप्रलीयतेविद्याभक्तिरनात्मनापितिक्रमोवदयोशात
कवेपवन्नेशः नन्वस्यकुतोऽत्तानादिसाधनेनमत्वमितिशंकायामाह प्रत्यक्षा
वगममिति प्रत्यक्षस्तेऽस्मवगमो विषयः अथवा अवगमोयस्मिंस्तत्प्रत्यक्षावग
मंयस्मिन् श्रवणकीर्तनादिरूपेऽस्यसाक्षात्प्रतिसर्वेश्वरोपरं तस्यविशेषश्रवा
तत्क्षणमेवप्रत्यक्षोभवतीत्यर्थः यद्वा प्रत्यक्षेणापरोक्षेणत्वस्यावगमोयस्मात्
१५ तत्सेवावगमंमतत्स्वरूपगुणलीलादीनां श्रवणमननध्यानादिभिर्मत्स्वरूपसाक्षा
त्कारप्राप्तिसाधनमित्यर्थः नन्वेवंगुणवदपीदंयदिशास्त्रोक्तधर्मविरु

ऽस्मान्नहि केनाप्यङ्गीक्रियत इति चेत्तत्राह धर्म्यमिति धर्म्यं धर्मादनपेतं
सद्गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं आचार्यवान्पुरुषो वेद
आचार्यदेवो भवेत्यादिशास्त्रोक्तगुरूपसत्त्याद्यधर्मैर्निरुक्तं न तु यत्कथ
मंस्यं निःश्रेयसरूपं निःश्रेयससाधनं च भवतीत्यर्थः नन्वेवमपि यदिम
हद्यत्नेनापि दुःसंपाद्यं स्यात्तर्हि कोपि जनस्तत्कर्तुं कथमुद्युक्तो भविष्यतीत्या
पेक्षायामाह सुसुखं कर्तुमिति गुरूपदेशकाले करणव्यापारेण साधयि
तुं सुसुखं सम्यक्सुलभोपादानमत्यर्थप्रियत्वेनानायासेन चोपादेयमित्यर्थः
ननु यथा रत्नजातिविशेषलोभेन जनः केनापि सुलभोपायेन महारत्नं प्राप्नोति
पश्चाच्च दिव्यौषधानलादिवियोगेन नश्यति तर्हि इदमप्यन्तवत्त्वेन साध्यमपि
सफलं स्याच्चेत्कल्किरूपकं स्यात्साध्यमपि निष्फलमित्याशंक्यास्य नाश
साध्यत्वेप्यत्ययत्वं स्यादित्याह अव्ययमिति अव्ययं व्ययशून्यं स्वाधिकारिणो
जनं मत्वा किंकारयितापि स्वयं न क्षीयते मोक्षेपि स्यात्तु स्थितत्वात् नन्वीदृशो
कर्मादिकं भवेत् यतो यावत्तत्फलप्राप्तिस्तावत्कर्मानुवंशं शत्रुहणमिति व
च्यासतया न क्षीयते तस्मादिदमुपासनाख्यं भक्तिरूपं कर्तव्यं तत्र जनेनेवाह
वश्यं भवामि नासौ कर्मज्ञानानि साधनं काङ्क्षतीत्यर्थः २
नस्तदभिध्यायतज्ज्ञानं स्तौति ॥ मधुसूदनी टीका ९
राजविद्या सर्वासां विद्यानां राजा सर्वाविद्यानाशकत्वात् विद्यान्तर
स्याविद्यैकदेशविरोधित्वात् तथा राजगुह्यं सर्वेषां गुह्यानां राजा अने
कजन्मकृतसुकृतसाध्यत्वेन बहुभिरज्ञातत्वात् राजदन्तादित्वादुपसर्ज
नस्य परनिपातः पवित्रमिदमुत्तमं प्रायश्चित्तैर्हि किंचिदेकमेव पापं निव
र्त्यते विशुद्धं च तत्कारणे स्थूलरूपेणातिशय्येव यतः पुनस्तस्याप्युत्पत्ति
र्नोति शुद्धः इदं त्वनेकजन्मसहस्रसंचितानां सर्वेषामपि पापानां स्थूल
सूक्ष्मावस्थानां तत्कारणस्य चाज्ञानस्य सद्य एवोच्छेदकं अतः सर्वोत्तमं पा
वनमिदमेव न चातीन्द्रियधर्मवदत्र कस्यचित्संदेहः स्वरूपतः फलतश्च
प्रत्यक्षत्वादित्याह प्रत्यक्षावगमं अवगम्यतेनेनेत्यवगमो मानं अवगम्य
ते प्राप्यत इत्यवगमः फलं प्रत्यक्षमवगमो मानमस्मिन्निति स्वरूपतः सा
क्षित्प्रत्यक्षत्वं प्रत्यक्षोवगमोस्येति फलतः साक्षित्प्रत्यक्षत्वं मयेदं विदित
मतो नष्टमिदानीं ममाज्ञानमिति निरिस सार्वलौकिकः साक्ष्यनुभवः एवं

लोकानुभवसिद्धत्वेपि तत्तज्ज्ञानं धर्म्यं धर्मादनपेतं अनेकजन्मसंचितानि
कामधर्मफलं नहिंदुःसंपाद्यंस्यात्रेत्याह सुसुखं कर्तुं गुरूपदर्शितवि
चारसहकृतेन वेदांतवाक्येन सुखेन कर्तुं शक्यं न देशकालादिव्यवधान
मपेक्षते प्रमाणवस्तुपरतंत्रत्वात् एवमनायाससाध्यत्वेल्पफलत्वं स्या ज्ञानस्य
दनायाससाध्यानामेव कर्मणां महाफलत्वदर्शनादिति नेत्याह अव्ययमे
वमनायाससाध्यमप्यस्य फलतो व्ययो नास्तीत्यव्ययमस्य फलमित्यर्थः
स्त कर्मणां त्वतिमहतामपि स्वल्पं फलनमेव यो वा एतदक्षरं गार्ग्यविदित्वा
स्मिँल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यंतवदेवास्य तद्भव
तीति श्रुतेः तस्मात् सर्वोत्कृष्टत्वाच्छ्रद्धेयमेवात्मज्ञानं [illegible]
[illegible] सर्वोत्कृष्टत्वेन सर्वेपि [illegible] नास्ति तथाप्यत्र [illegible] स्यादि
[illegible] त्याह २

सदानन्दीटीका ९

अनन्तरदाभिरुच्योयतज्ज्ञानं लोतिमाधवः राजा हि सर्वविद्यानां सर्वावि
द्याविनाशकः १ दीप्यते निश्चयेनैषं ब्रह्मविद्यायतनस्ततः रहस्यानां समस्ता
नां राजा गुह्यशिरोमणिः २ अनेकजन्मसद्धर्मैः साध्यत्वेनातिदुर्लभं को
टिजन्मार्जितानेककोटीनां पापकर्मणां ३ नष्टेनोप्यविद्यायाः सर्वथैव द
कत्वतः पावनं पावनानां च सर्वेषामिदमुत्तमं ४ नात्रादृष्टे धर्मेऽस्य कस्या
प्यास्ति संशयः स्वरूपात्फलतश्चास्य प्रमत्वत्वादितीर्यते ५ मानं प्रत्यक्ष
मेवास्मिन्नास्ति प्रमत्वता यतः प्रत्यक्षावगमोस्येति सा हि प्रमत्वता फलात्
६ मानं करणयोगेन कर्मश्रुमसितः फलं अर्थावगमशब्दस्याभिप्रेतः श्री
रमापतेः ७ धर्मेदं विदितं तस्मान्नष्टमत्र ममाधुना अज्ञानमिति सर्वत्र प्रसाक्षि
प्रमत्वं स्मृते ८ कोटिजन्मार्जितैः पुण्यैः प्राप्यत्वाद्धर्म्यमुच्यते गुरूपदिष्ट
मार्गेण कर्तुं शक्यं सुखेन तत् ९ अनायासेन साध्यं सदव्ययफलतो महत्
सर्वोत्कृष्टतयात्मज्ञानं श्रद्धेयं सर्वथा नरैः १०

नीलकंठीटीका ९२

एतदेव स्तौति राजविद्येति विद्यानां राजा अतिराजविद्या [illegible] विद्या
गुह्यानां राजा इति राजगुह्यं राजदंतादिषु परमित्युपसर्जनस्य पर
निपातः पवित्रं पावनं [illegible] मंत्रश्चापि पापहरिनि नाशस्योपहेतुत्वात्

शापश्चिन्नाघपेत्तयाश्रेष्ठं प्रत्यक्षावगमं प्रत्यक्षं नित्यापरोक्षं यत्प्रत्यगात्म
वस्तु तदेव याथात्म्येनावगम्यतेऽनेनेति प्रत्यक्षावगमं प्रत्यक्षेण स्वबो
दिवदगमोऽस्येति वा अस्मिन्पक्षे विज्ञानसहितमिति विशेषणस्य स्मोका
नरस्य वाग्ननेन पौनरुक्त्यदोषः तर्हि अश्रवत्वाभावान्निष्फलं स्यादत आह
धर्म्यं धर्मादनपेतं तथाहि तणामपि प्रत्यगात्माकारवृत्तौ सम्यग्ज्ञयने
नणमेकं क्रतुशतस्य च नः समस्तस्य यत्फलं तदवाप्नोतीति तर्हि दुःसाध्यं
स्यादित्याह सुसुखं कर्तुमिति कर्तुं संपादयितुं आविष्कर्तुं सुसुखं अना
याससाध्यं अज्ञानापनयमात्रसिद्धत्वात् तर्हि आशुविनाशि फलं चेत् अ
व्ययं वस्तुमात्रविषयत्वात् अतेन फलेन तत्कर्मफलवत्क्षयति २

आनंदटीका १३

राज्ञामपञ्चकाविद्यामोक्षसाधनम् अस्तुनमनाद्विद्यानां राजा वा राजभिर्गु
ह्यागोपंषाड्गुण्यमेतद्वद्रहस्यं उत्तमं पवित्रं सर्वदोषापहं नन्वपवित्रत्व
व किंचिन्मात्रदोषघ्नं प्रमत्तेऽस्मिन्नेव जन्मन्यवगमः सिद्धिर्यस्य न तु काला
न्तरात् धर्म्यं धर्मशास्त्रोदितं सर्वेषु वर्णाश्रमेषु ज्ञानकर्मसमुच्चयेन विहि
तं कर्तुं सुसुखं न वाभ्यन्तरसंयमवत्कृच्छ्रसाध्यं अव्ययमव्ययस्य कैवल्य
स्य कारणत्वात् [illegible] २

अत एवास्य ज्ञानस्य प्रशंसार्थमाह रामकंठटीका १४

इदं वस्तुमाणज्ञानमुत्तमसमसामान्यं पवित्रं पावनं सर्वकिल्बिषकलं
कपंकसंक्षालनहेतुमंति हि पवित्राणि तीर्थमंत्रतपोयज्ञदानादीनि त
ज्ज्ञानरहितत्वाद् न वेति यदि परमेतज्ज्ञानसंस्कृतानामनन्तफलत्वमभ्युपी
व्रत एवोत्तमं पवित्रमित्युक्तं यतो राजविद्येषा राज्ञां जनकाश्वपतिप्रभृ
तीनामुग्रं कर्मण्यनुतिष्ठतामेषा विद्या ज्ञानमपवर्गफलत्वेन श्रूयते तत
श्चनेषां राज्ञां गुह्यं रहस्यमेतत् यतः प्रत्यक्षावगमं प्रत्यक्षतः स्वसंवेदनवेद्यो
ऽवगमोऽवबोधो यस्य तत्तथाविधम् अन्येषां हि पवित्राणां कालान्तरे देहा
न्तरे लोकान्तरे च फलावगमो भविष्यति तथा धर्म्यं धर्माच्छास्त्रोदिता
द्वर्णाश्रमक्रमविभक्तात् तदाचारादनपेतमत एव कर्तुं संपादयितुं सुसुख
मत्यन्तसुखकरं सहजस्वभावकर्ममात्रसाधनत्वात् तथाविधं सदप्य
व्ययमविद्यमानव्ययं तत्साध्यस्य फलस्य मत्स्वमापत्तिलक्षणस्याविनश्वरत्वा
त् [illegible] २।

श्री
गी टी
न

किंच इदमीश्वरविषयं ज्ञानम् राजविद्या राजगुह्यं विद्यानां गुह्यानां च राजा
विद्यास्वात्मविषयरोधेषु गोप्येष्वात्ममननेषु चातिश्रेष्ठमित्यर्थः अनेनैव
वैश्यात्मोपलम्भात् राजदन्तादित्वादुपसर्जनस्य परनिपातः तथोत्त
मंपवित्रमिदमत्यन्तपावनं सर्वविकल्पकलंकशोधकम् तथा प्रत्य
क्षावगमं स्वसंवेदनवेद्यबोधम् तथा धर्म्यं धर्मादनपेतं धर्मधारावाह्य
कम् सुसुखं कर्तुं सुखेन कर्तुं शक्यम् अव्ययं चाक्षयफलत्वात् [illegible]
[illegible] २

पंचोलीटीका

न्तशाह्यस्त्विंतपतज्ज्ञानगतवैशिष्ट्यमाह राजविद्येति इदं ज्ञानं किं
लक्षणं राजविद्या विद्यानां राजा गुह्यानां गोप्यानां राजा राजगुह्यं पा
वनानामपि पावनमुत्तमं पवित्रं प्रत्यक्षेण सुखादिवज्ज्ञातुं शक्यं य
र्मादनपेतं धर्म्यं कर्तुं सुसुखं सुखेन संपाद्यमविनाशिफलत्वात् अ
व्ययमक्षयफले २

रत्नावीरसमिद्धोधिन्यां॥

अथैतदभिमुख्याय वक्ष्यमाणलक्षणज्ञानं तावत्स्तौति राजवि
द्येति इदं वक्ष्यमाणं ज्ञानं स्वधर्मांचरणविषयकं निश्चयोत्पादकं वाक
मुत्तमं पवित्रमनन्यसाधारणं सर्वोत्तमं पावनं तीर्थयज्ञतपोमंत्रदा
नादिभ्यः पावनान्तरेभ्यः सहस्रपापोपपावशोषपावयितृभ्यः सका
मात्साकल्येन सद्योऽनेकजन्मसहस्रसंचितपापोच्छेदकत्वात् य
तो राजविद्यैषा राज्ञां जनकाश्वपतिप्रभृतीनां सुमहतां प्रजापालना
परिश्रववदुष्टदमनादिरूपं कर्माप्याचरतां विद्या ज्ञानं निश्चयोप
वर्गफलकत्वेन श्रूयते अथ च विद्यानामन्यासामत्रतं यादिरूपाणां
सर्वासां राजा तासु तत्तत्फलापेक्षा पुनरपवर्गात्मकनित्यफलक
त्वेन तासां प्राधान्यस्थिता तथा राजगुह्यं तेषामेव जनकादीनां रह॰

स्यमेतत् अथच गुह्यानां ब्रह्मास्त्रादिसमपदार्थप्रभृतिरहस्यानां राजा
रहस्यतमं परोपनिषदित्यर्थः राजदंतादित्वादुपसर्जनस्य परनि
पातः तथा प्रत्यक्षावगमं अवगम्यते प्रमीयतेनेनत्यवगमः प्र
माणे अवगम्यते प्राप्यते सावित्यवगमः फलं ते द्वे अपि प्रत्यक्षे
यत्र तत् एतेन च कालांतरे देहांतरे लोकांतरे च फलप्रापवने धृ
र्मांतरेष्विवाद संदेहो न विद्यत इति तेभ्यो व्यतिरेकोस्य दर्शितः
तथा धर्म्यं धर्माच्छास्त्रोदिताद्वर्णाश्रमविभक्तात्सदाचारादव्यपे
तं परघातादिभिः क्षत्रियस्यादिमयसंग्रामाभिमुखगमनं स्वध
र्मं तथा यथोक्तं तथैव हि तत्प्रतिपादितं धर्म्याद्धि युद्धाच्छ्रेयोन्यत्क्ष
त्रियस्य न विद्यते इति पदव्याख्यानेन चैतदत्यायाससाध्यत्वाद्दुःसं
पादमित्याह सुसुखं कर्तुमिति अतिसुखेन संपादयितुं शक्यम
नायाससाध्यमिति यावत् तथाव्ययं मत्सायुज्यप्राप्तिलक्षणस्य
फलस्य नित्यत्वात् व्ययरहितं अक्षयफलमित्यर्थः २॥

मधुभाष्य

२॥

10/2

भाषा अनुवाद

अब अर्जुन की इच्छा बढ़ावनेके हेतु जो ज्ञान कहैंगे उसकी प्रशंसा क
रतेहैं कि यह जो ज्ञान सो सकल विद्यों का राजा और गोपनीय जो कुछ
है उनका भी राजा अर्थात् सबसे श्रेष्ठ है और यह अत्यन्त पावन तथा
उत्तम है और ज्ञानियों को प्रत्यक्षावगम कहे जिसका बोध सुलभ हैं औ
र धर्म्य कहे धर्म्मसे भिन्न नहीं अर्थात् वेद विहित सर्व धर्म्म का फल स्वरू
प है और सुसुखं कहे अनायास साधन किया जाय सकैहै और जिस हेतु
अक्षय फल है इस से अव्यय अर्थात् नाश रहितहै २।

दोहा

यह पवित्र त्यगउत्तम त्पविद्या उत्तम गोप देप्रत्यक्ष सुकरमसुखगम
धर्म अनश्वरसोप २॥

अश्रद्दधानाः पुरुषा धर्मस्यास्य परन्तप
अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ३

शाङ्करभाष्य १

ये पुनः अश्रद्दधाना इति अश्रद्दधानाः श्रद्धाविरहिताः आत्मज्ञानस्य धर्मस्यास्य स्वरूपे तत्फले च नास्तिकाः पापकारिणोऽसुराणामुपनिषदं देहमात्रात्मदर्शनमेव प्रतिपन्ना असन्तः पुरुषाः परन्तप अप्राप्य मां परमेश्वरं मत्प्राप्तौ नैवाशङ्केति मत्प्राप्तिमार्गसाधनभेदभक्तिमात्रमप्यप्राप्येत्यर्थः निवर्तन्ते निश्चयेन आवर्तन्ते क्व मृत्युसंसारवर्त्मनि मृत्युयुक्तः संसारो मृत्युसंसारस्तस्य वर्त्म नरकतिर्यगादिप्राप्तिमार्गस्तस्मिन्नेव वर्तन्त इत्यर्थः ३

आनन्दगिरिकृतटीका २

आत्मज्ञानाख्ये धर्मे श्रद्धावतां तन्निष्ठानां परमपदप्राप्तिमुक्त्वा तदविश्वासिनां संसारप्राप्तिमाह ये पुनरिति आत्मज्ञाने तत्फलयोर्नास्तिकानेव विशिनष्टि पापेति उक्तानामासुरीणां भगवत्प्राप्तिसम्भावनाभावादप्राप्य मामित्ययुक्तं प्रतिषेधः स्यादित्याशंक्याह मत्प्राप्ताविति ३

स्वामिकृतटीका ३

ननु एवमति सुकरत्वे केनाम संसारिणः स्युरत आह अश्रद्दधाना इति अस्य भक्तिसहितज्ञानलक्षणस्य धर्मस्येति कर्मणि षष्ठी इमं धर्ममश्रद्दधाना आस्तिक्येनास्वीकुर्वन्तः उपायान्तरेण मत्प्राप्तये कृतप्रयत्ना अपि मामप्राप्य मृत्युयुक्ते संसारवर्त्मनि निमित्ते निवर्तन्ते मृत्युव्याप्ते संसारमार्गे परिभ्रमन्तीत्यर्थः ३

पैशाचभाष्यटीका ४

अश्रद्दधानाः श्रद्धारहिताः पुरुषाः धर्मस्यास्य ज्ञानलक्षणस्यानुष्ठाने

श्री
गी टी
न

१२

अश्रद्दधाना इति संबंधः अप्राप्य मां परमात्मानं निवर्तंते अत्यागच्छंति
मृत्युयुक्त संसारप्रवर्त्मनत्र मृत्युसंसारवर्त्मनि ३

रामानुजभाष्यटीका ५

अश्रद्दधाना इति अस्योपासनाख्यस्य धर्मस्य निरतिशयप्रियमहि-
षयतया स्वयं निरतिशयप्रियरूपस्य परमनिःश्रेयसस्वरूप मत्प्राप्ति
साधनस्याव्ययस्योपादानयोग्यदशां ये प्राप्य अश्रद्दधानाः विश्वासपू-
र्वक श्रद्धारहिताः पुरुषाः ते मामप्राप्य मृत्युरूपे संसारवर्त्मनि नि-
तरां वर्तंते अहो महदिदमाश्चर्यमित्यर्थः [illegible]
[illegible]मानं ३

अभिनवगुप्तकृतटीका ६

निवर्तंते पुनः पुनर्जायन्ते म्रियंते च ३

परमार्थप्रपाटीका ७

एवं येनर्हि सर्वेपि मुक्ता भवेयुरित्याह अश्रद्दधाना इति अस्य धर्म-
स्येति कर्मणि षष्ठी इमं धर्मं अश्रद्दधाना नास्तिका दनुजशतारः
पुरुषा मामप्राप्य मृत्युसंसारवर्त्मनि निवर्तंते भूयः संसरंतीति ३

वनमालीटीका ८ ।। एवमस्यात्यंतकरत्वे सर्वो लोकस्त्वय्येव सर्वे
कृतोत्र मम प्रवर्तंते तत्राह अस्य भगवदर्पितात्मत्वस्य धर्मस्य स्वरूपे साधने फले च शास्त्रप्रतिपादिते श्र-
द्धारहिता वेदविरोधिकुतर्कहृतचित्ताः तः करणतया प्रमाणं मन्यमानाः पापकारिणः असुरसंपदमाहृताः
स्वमतिकल्पितोपायेन विषयमा-
णमाममत्वात्पापमलव्याप्तत्वा-

कुसुमवैजयंतीटीका ९ नाप्यपि शास्त्रविहितोपायाभावादस्मा-

युक्ते संसारवर्त्मनि निवर्तंते निश्चयेन वर्तंते सदा जननमरणवंतः कृमिकीटादियोनिष्वेव भ्रमंतीत्यर्थः ३ ॥

नन्वीदृशे सुखसाध्ये तदुपासने स्थिते सति कस्मादिमे जनाः संसरंतीति चे-
त्तत्राह अश्रद्दधाना इति हे परंतप स्वनेनयेमद्भक्तिविरोधिनोऽश्रद्धादयः
शत्रवः संति यदि तांस्त्वं तापयसि तर्हि एव त्वं परंतप इत्यनेन तेषां दुर्जयोध-
नादीनां तापने शक्तिः सूचिता यद्वा मद्भक्तो मत्परममित्रो यदि त्वमसि तर्हि
मत्प्राप्तिविरोधिनो हत्वा मित्रं मां प्राप्स्यसि नो चेत्तव मित्रं नादिहानिर्भविष्यती-
त्येवमर्जुनं स्वप्राप्तौ श्रद्धावंतमकरोदिति संबोधनाशयः अस्य धर्मस्येति क-
र्मणि षष्ठी इमं मदुपासनाख्यं भक्तिलक्षणं सुखसाध्यमव्ययं धर्मं अश्रद्दधा-
नाः विश्वासपूर्विकया श्रद्धया न युक्ताः केवलमनन्ततिमात्रमेवेतियम

मंतेतेपुरुषामस्मामपेक्षसाधनांतरंकुर्वंतोपितानवैराग्यादीनिच्छंतोपिमोसर्वे
श्चोमकलमंगलकरुणादिगुणालयंसर्वकारणमसदर्थाभिन्नस्वरूपंसर्व
वेदवेद्यंवसुदेवनंदनं अप्राप्यमद्भावहेलनान्मद्विमुखाःशुनामस्त्वसंसारव
र्त्मनिमस्तपुरुष्कंयत्संसारवर्त्मागमास्मिन्निवर्तंतेनितरांवर्तंतेमद्भक्तिंविना
कर्मज्ञानवैराग्यादिसाधनबलेनआवर्तंतीत्यर्थः ३

एवमस्यसुकरत्वेसर्वोत्कृष्टत्वेच मधुसूदनीटीका १० सर्वोपिकुतोनप्रवर्तते तथाचनकोपिसंसारीस्या
दित्यतआह ॥

अश्रद्धत्तानानास्यधर्मस्यस्वरूपे साधनेफलेचशास्त्रप्रतिपादितेपि अश्र
द्दधानाः वेदविरोधिकुहेतुदर्शनदूषितांतःकरणतयाप्रामाण्यमपस्यमा
नाःपापकारिणोऽसुरसंपदमारूढाःस्वमतिकल्पितेनोपायेनकथंचिद्यत
मानाअपिशास्त्रविहितोपायाभावादप्राप्यमांमत्प्राप्तिसाधनमप्यलब्ध्वा
निवर्तंते निश्चयेनवर्तंते क्वमृत्युयुक्ते संसारवर्त्मनि सर्वदा जननमरणप्रबं
धेननारकितिर्यगादियोनिष्वेवभ्रमंतीत्यर्थः [illegible] ३

सदानन्दीटीका ११

आत्मज्ञानाख्यधर्मस्यस्वरूपेसाधनेफले नास्तिकाअप्रमाणादिशंकयापा
पकारिणः १ आसुरीसंपदंरूढावेदमानविरोधिनः मत्प्राप्तिसाधनंमेदभक्ति
मप्यनवाप्यच २ तेमांभ्रमाज्ञमप्राप्यसंसारेमृत्युसंयुते नारकीयातनादोचश्र
मेम्याकल्पमासुराः ३ अनंतेमनुजाकारावानरागर्दभास्तथा उपेक्ष्याःसर्वथा
सद्भिरितिहार्दंसमापितं ४ । ३

नीलकंठीटीका १२

ननुकिंकृतएतज्ज्ञानंसर्वैर्नसंपादयंतीत्याह अश्रद्दधानाइति स्पष्टार्थःश्लोकः ३

एतच्चमद्भक्तैःश्रद्धयाप्राप्यंनतु आनंदीटीका १३
श्येविन्याह धर्मस्यज्ञानस्यमृत्युमरणेसंसारः संसरणंजन्ममतयोर्वर्त्मनि विनिवर्तंतेपुनः
पुनर्भ्रमंति [illegible]र ३

एतच्चमदनुग्रहोत्कृतभक्तिश्रद्धा रामकंठीटीका १४ दिगुणसंपद्भिरेव सुलभंयतः ॥
अस्योक्तवक्ष्यमाणज्ञानरूपधर्मस्यअश्रद्धानाअयथोक्तफलासंभावनाप
राः पुरुषामांयथोक्तस्वरूपंपरब्रह्मप्राप्यमत्समापन्निमृत्युनाशाद्येवमृत्युसं
सारयोर्भ्रमंतेपुनित्यपरिवर्तिनोमरणजन्मनोर्वर्त्मनिनिवर्तंतेपुनःपुनराप

श्री
गी टी
न

नास्ति किंतु कष्टं भवति मदनुग्रहकथासागरसमुद्भूतश्रद्धासहितनरमञ्जरी
सकलसिद्धिप्रसवैकहेतुर्धैर्यरूपास्यते तैरेवाऽनेन सुलभो नाऽन्यैरिति [illegible]
[illegible]प्रतिपादयितुमाह ३

एतच्च श्रद्धादिगुणसंपन्नानामेव सुलभं नान्येषामित्याह ॥

लासिकी [illegible]टीका ५

अस्येत्यस्य विषयस्य ज्ञानभक्तियोगरूपस्य धर्मस्योक्तलक्षणस्य भावमश्रद्दधाना असम्भावयन्तः पुरुषाः मामीश्वरमप्राप्य स्वमतिकल्पितेनोपायान्तरेण कृतप्रयत्ना अपि मत्संप्राप्तिमनासाद्य मरणजननयोर्वर्त्मनि निवर्तन्ते पुनः पुनरापतन्तीत्यर्थः [illegible] ३

13

पंचोलीटीका

अतिसुलभमपि एतज्ज्ञानं येन प्राप्नुवन्ति तानाह अश्रद्दधाना इति हे परंतप अस्य ज्ञानधर्मस्य स्वरूपे फले च अश्रद्दधानाः पुरुषाः श्रद्धारहिताः पुमांसः मामप्राप्य मम भक्तिमात्रमपि अप्राप्य मृत्युसंसारवर्त्मनि मृत्युयुक्तः संसारः तस्य वर्त्म मार्गः नरकादिप्राप्तिस्तस्मिन्निवर्तन्ते ३

रणवीरसमिद्धोधिनी ॥

एतच्च ज्ञानं मदनुग्रहोद्भूतभक्तिश्रद्धादिगुणसंपन्नैरेव सुलभमतोऽस्य सर्वोत्कृष्टत्वेऽपि सुकरत्वे च सत्यपि सर्वेषां साधारण्येनास्मिन्प्रवृत्तिरभावान्मत्सायुज्यानधिगमे संसारित्वोपपत्तिरित्याह अश्रद्दधाना इति अश्रोक्तवक्ष्यमाणलक्षणस्य मद्भक्तिसहकारिणो गुह्यरूपस्य धर्मस्य अश्रद्दधानाः प्रागुक्तादिनापि फले विरुद्धत्वं मन्वाना जन्मान्तरीयपापराशिप्राबल्येन संजातबुद्धिभ्रमादिति शेषः पुरुषाः पौरुषशालिनः क्षत्रियाः मामप्राप्य कोऽर्थः मां सर्वेश्वरं शरणमप्रतिपाद्य तत्र मत्सायुज्यं वा लब्ध्वा मृत्युसंसारवर्त्मनि मरणजननयोरन्तराले निवर्तन्ते पुनः पुनरापतन्ति अयं भावः पूर्वजन्मसहस्रसंचितपुण्यसमुदायपरिपाकेन मदनुग्रहदीक्षितैरेतदेव तज्जन्म

न्यपि संजातश्रद्धैः पौरुषशालिभिः तत्क्रियप्रवृत्तैर्य मोक्षस्तेभ्योति
धर्म्यमेतादृशं महावीरपुरुषप्रतिहुंडिकं दुर्दमो पारणमापद्ये
वसंपाद्यते ततश्च महामापिलभ्यतेतैः येपुनः पापकारिणः
कथंचित्पौरुषशालितया महारायनव्यतिरेकेण यतमानाश्चापि
ते स्वर्गादिलोकान्प्राप्यापि उत्पत्तयेमति पुनः संसारमासादयं
तीति एषएव चार्थोस्मिन्नध्याये प्रतिपादयिष्यते ३॥

मथुभाष्य

३॥

भाषा अनुवाद

जो इस ज्ञान से ऐसा सुख सुलभ है तो फेरि कौन ऐसा अभागी जो संसारी होगा इस शङ्कापर कहते हैं कि यही भक्ति सहित ज्ञानस्वरूप धर्म्मको न करिके दूसरी उपाय से मेरी प्राप्तिके लिये जो लोग यत्न करतेहैं वे मनुष्य हम को न पायके मृत्युरूप संसारमार्गमे प्रवृत्त होते अर्थात् मरनेके अर्थ संसार मे वार वार आते और जाते हैं ३ ।

दोहा

श्रद्धाविनय सधर्ममे पुरुषपरंतपजोय विनाआसमोहिपरनदे
मृत्युभवमगसोय ३॥

14

18

मयाततमिदंसर्वं जगदव्यक्तमूर्तिना
मत्स्थानिसर्वभूतानि नचाहं तेष्ववस्थितः ४

शाङ्करभाष्य १

इतिज्ञानं स्तुत्वार्जुनमभिमुखीकृत्याह मयेति मया मम यः प
रो भावस्तेन ततं व्याप्तं सर्वमिदं जगदव्यक्तमूर्तिना न व्यक्ता मूर्तिः
स्वरूपं यस्य मम सोऽहमव्यक्तमूर्तिस्तेन मयाव्यक्तमूर्तिना करणा
गोचरस्वरूपेणेत्यर्थः तस्मिन्मय्यव्यक्तमूर्तौ स्थितानि मत्स्थानि सर्व
भूतानि ब्रह्मादीनि स्तम्बपर्यन्तानि नहि निरात्मकं किंचिद्भूतं व्य
वहारायावकल्पतेऽतोमत्स्थानि मयात्मनात्मवत्त्वेन स्थितानि अतो
मयिस्थितानीत्युच्यते तेषां भूतानामहमेवात्मा इत्यतस्तेषु स्थित
इति मूढबुद्धीनामवभासतेऽतोब्रवीमि नचाहं तेषु भूतेष्ववस्थितो
मूर्तवत् संश्लेषाभावेनाकाशस्याप्यन्तरतमोह्यहं ४

आनन्दगिरिकृतटीका २

स्तुतिनिन्दाभ्यां ज्ञाननिष्ठां महीकृत्य ज्ञानं व्याख्यातुमारभते स्तु
त्वेति सोपाधिकस्य व्याप्तसम्भवमभिप्रेत्य विशिनष्टि ममेति अन
भगवद्रूपस्य वच्छिन्नस्य निरुपाधिकत्वमेव साधयति करणेति व्याप्यव्यापकत्वेन
जगतो भगवतश्च परिच्छेदमाशंक्याह तस्मिन्निति तथापि भगवतो
भूतानाञ्चाधाराधेयत्वेनभेदःस्यादित्याशंक्याह न हीति निरात्मकस्य व्य
वहारानर्हत्वे फलितमाह अतइति ईश्वरस्य भूतात्मत्वे तेषु स्थितिः
स्यादित्याशंक्याह तेषामिति तस्य तेषु स्थित्यभावं व्यवस्थापयति मू
र्तवदिति ४

स्वामिकृतटीका ३

तदेवंवक्तव्यतया प्रस्तुतस्यज्ञानस्यस्तुत्या श्रोतारमभिमुखीकृत्यत
देवज्ञानंकथयति मयेतिद्वाभ्यां अव्यक्ता अतीन्द्रियामूर्तिः स्वरूपंताहशे यस्य
नमयाकारणभूतेनसर्वमिदंजगत् ततंव्याप्तं अतएवकारणभूतेमयि तत्सृष्ट्वा तदेवानु
तिष्ठन्तीतिमत्स्थानि सर्वाणि चराचराणिभूतानि एवमपियद्यादिषुसर्वे प्राविशदित्यादिश्रुतेः

आकाशवत्

षुकार्येषु मणिकेवेतेषु भूतेषु नाहमवस्थितः असंगत्वात् ४

पैशाचभाष्यटीका ४

मयाततं व्याप्तमिदं सर्वं जगत् अव्यक्तमूर्तिर्यस्य सो व्यक्तमूर्तिस्तेन मयेश्वरेण इंद्रियागोचरस्वरूपेणेत्यर्थः मत्स्थानि सर्वभूतानि सर्वप्राणिनः नचाहं तेषु भूतेषु व्यवस्थितः ४

स्एतावन्त्रापमूतस्य रामानुजभाष्यटीका ५ ममाचिंत्यमहिमानम्

मयेति नचेति इदं चेतनाचेतनात्मकं कृत्स्नं जगदव्यक्तमूर्तिना अप्रकाशितस्वरूपेण मयांतर्यामिणा ततं अस्य जगतो धारणार्थं नियमनार्थं च शेषित्वेन व्याप्तमित्यर्थः तथांतर्यामिब्राह्मणे यः पृथिव्यां तिष्ठन् यं पृथिवी न वेद य आत्मनि तिष्ठन् यं आत्मा न वेदेति चेतनाचेतनवस्तुजाते रहष्टेनांतर्यामिणा तत्र तत्र व्याप्तिरुक्ता ततो मत्स्थानि सर्वभूतानि मयि अंतर्यामिणि स्थितानि तत्रैव ब्राह्मणे यस्य पृथिवी शरीरं यः पृथिवीमंतरो यमयति यस्यात्मा शरीरं य आत्मानमंतरो यमयतीति शरीरत्वेन नियामकत्व प्रतिपादनात् तदायत्ते स्थिति नियमने प्रतिपादिते इति शेषित्वं नचाहं तेष्ववस्थितः अहं च न तदायत्त स्थितिः मत्स्थितौ न तैः कश्चिदुपकार इत्यर्थः ४

अभिनवगुप्तकृतटीका ६

मत्स्थानि भूतानीति स्वचिरमपि गत्वा मम प्रतिष्ठाधाराद् विद्यमानत्वात् भूतरूप बोधात्मक प्रसिद्ध तदीय जडरूप पुरःसरीकारेण तदवभासेन तद्विपरीत बोधस्वभाव तिरोधान मित्यतदाह ४ नचाहं तेष्विति

परमार्थप्रपाटीटीका १

तदेवं वक्तव्यतया प्रस्तुतस्य राजविद्या राजगुह्याख्यधर्मस्य स्वरूपाश्रोतारमभिमुखीकृत्य तदेव ज्ञानं कथयति मयेति द्वाभ्यां इदमिदं तेन भासमानेपुनर्जगत् गवरं सर्वं नामरूपकर्मात्मकं दृश्यजातं मया अधिकरणरूपेण कृत्वा ततं विस्तारं प्राप्तं किंभूतेन मया अव्यक्तमूर्तिना नव्यक्ता ज्ञाता मूर्तिः स्वरूपं यस्यैवं विधेनाज्ञातेन मया निमित्तभूतेन मदज्ञानात्मकेनवाविर्भूतं अज्ञातया शुक्त्या रजतमिवेत्यर्थः तदुक्तं वाशिष्ठे म

दृष्टान्तो दितं विश्वं मय्येव लयमागतमिति अथ मयेति तृतीयया परमा
त्मनो जगत्कारणत्वे प्राप्ते तद्व्यतिरेकेण निषेधयति मत्स्थानीति का
रणं हि कार्यमभिव्याप्य तिष्ठतीति मायेन यद्यपि सर्वभूतानि मयि
तिष्ठन्तीति प्रतिभाति तथापि तेषु भूतेष्वहं न व्यवस्थितः यथा यद्यपि
शुक्तौ रजतं प्रतीयते तथापि रजते शुक्तिः शोन प्रतीयते यदि प्रतीये
ततर्हि सभ्रमएव तस्मादित्यर्थः ४

वनमालीटीका ४

तदेवं वक्ष्यतया प्रतिज्ञाते ज्ञाने साधारणे स्वयं ज्ञातं ज्ञानं श्रोतारमभिमु
खीकृत्य तदेवाह मयेत्यादिना चराचरात्मकमाब्रह्मस्तंबमिदं सर्वं जग
न्मयान्तर्यामिणा सर्वाधारेण च ततं व्याप्तं तत्र सर्वनियामकत्वेन सर्वैः कुतो नो ^क
पलभ्यते तत्राह अव्यक्तमूर्तिना अव्यक्ता इन्द्रियाद्यगोचरा मूर्तिर्यस्य तेन यः
^न पृथिव्यां तिष्ठन् यं पृथिवी वेद य आत्मनि तिष्ठन्नात्मा न वेदेति श्रुतेः मत्स्था
नि सर्वभूतानि अहं स्थानमाधारो येषां तानि न चाहं तेष्ववस्थितस्तदा येयः
यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति यस्यात्मा शरीरं य आत्मानमन्त
रो यमयतीति श्रुत्या शरीरवन्नियम्यत्वेन जीवजडयोः प्रतिपादनात् भूतानां
सम्यक् स्थितिनियमनादिकर्ताहं मदधीना स्थित्यादिका येषां तानि न चाहं ते
ष्ववस्थितो न चाहं तदधीनस्थितिकः नियम्यैः प्रजादिभिर्नियामकस्य राज्ञ इ
व सर्वनियामकस्य नियम्यैर्न कश्चिदुपकार इत्यर्थः ४

क्रमसमवैजयन्तीटीका ४

एवं स्वभक्तेर्माहात्म्यं तां विना संसारानिवृत्तिं चोक्त्वाऽथेदानीं भक्त्या स्वैश्वर्यम
भक्त्युद्दीपकं स्वैश्वर्यमाह मया ततमिदमिति अव्यक्तमूर्तिना अव्यक्ताऽऽ
कारा रहिता मूर्तिः स्वरूपं यस्य सा अव्यक्तमूर्तिस्तेनान्तर्यामिस्वरूपेण मयान
न्तारथिनाऽद्वयकेन समस्तकृतिद्वयात्मकं सर्वमाब्रह्मस्तम्बपर्यन्तं समस्तं ज
गदस्थिरस्वभावं ततं व्याप्तं स्वधारणया पालननियमनाद्यर्थमात्मत्वेन व्या
प्तमित्यर्थः यः पृथिव्यां तिष्ठन् यं पृथिवी न वेद य आत्मनि तिष्ठन् यमात्मा न वेद
इत्यादिश्रुतिभिरपि चेतनाचेतनपदार्थव्याप्तिरुक्ता अत एव सर्वभूतानि
नि^ सर्वाणि समस्तानि भूतानि चराचरात्मकानि मत्स्थानि मयि व्यापके धारके नि
यामके ऽन्तर्यामिणि तिष्ठन्तीति मत्स्थानि मदधीनस्थितिप्रवृत्तिकानि भवं
तीत्यर्थः चकारो निश्चयवाची न कारार्थकः तेषु चराचररूपेषु भूतेषु अह

श्री
गी टी
त

घोतमोहन्तनावस्थितः चेतनाचेतनरूपभूताधीनस्थितिप्रवृत्तिकोऽहं भवामीत्यर्थः ४

तदेवं वक्तव्यतया प्रतिज्ञात भिमुखीकृतम् ज्ञानं स्तुति तदेवाह द्वाभ्यां

मधुसूदनीटीका ९ स्वज्ञानस्य विधिमुखेन तन्निषेधमुखेन च स्तुत्या

इदं जगत्सर्वं भूतभौतिकं तत्कारणरूपं दृश्यजातमिदं मदज्ञानकल्पितं
मयाधिष्ठानेन परमार्थसता सद्रूपेण स्फुरणरूपेण च ततं व्याप्तं रज्जुखंडे
नेव तदज्ञानकल्पितं सर्पादि तया वासुदेवेन परिच्छिन्नेन सर्वं जगत् कथं
व्याप्तं परस्परविरोधादिति नेत्याह अव्यक्ता सर्वकरणागोचरीभूता स्वप्रका
शाद्वयचैतन्यसदानंदरूपा मूर्तिर्यस्य तेन मया व्याप्तमिदं सर्वं न तु नवेन देहे
नेत्यर्थः अत एव सन्तीव स्फुरन्तीव मद्रूपेण स्थितानि मत्स्थानि सर्वभूतानि
स्थावराणि जंगमानि च परमार्थतस्तु न चैवाहं तेषु कल्पितेषु भूतेषु अव
स्थितः कल्पिताकल्पितयोः संबंधायोगात् अत एवोक्तं यत्र यदध्यस्तं तत्
कृतेन गुणेन दोषेण वाऽणुमात्रेणापि न संबध्यत इति ४

सदानंदीटीका ९

स्वप्रादिनामहीक्रमतत्तानेवाप्यालेश्वरः समग्रगारभते वेदसिद्धं तिम्रा
द्भुतोपमं १ भूतभौतिकतद्धेतुरूपं दृश्यमिदं जगत् मयाधिष्ठानरूपेण
व्याप्तं सच्चिन्मयात्मना २ कथं व्याप्तं त्वया सर्वं परिच्छिन्नेन हीति चेत् नैवं
सर्वेंद्रियातीतस्वप्रकाशैकवर्तिना ३ मया व्याप्तमिदं सर्वमपरिच्छिन्नदे
हिना सन्तीवातः स्फुरन्तीव मद्रूपेण स्थितानि भोः ४ मत्स्थानि सर्वभूता
नि जंगमानि स्थिराणि च तेष्वध्यस्तेषु भूतेषु नैवाहं समवस्थितः ५ ब्रह्मा
दि सर्वभूतानि स्वात्मवस्तात्मनामया स्थितानि मय्यधिष्ठाने सत्तास्फूर्तिप्र
देहरौ ६ आकाशादपि सूक्ष्मत्वादसंसर्गितया कलः आधेयत्वेन भूतेषु
न चाहं तेष्ववस्थितः ७ नाध्यस्तगुणदोषाभ्यां लेपोऽधिष्ठानगोचराः रज्ज
खंडे तदज्ञानाप्तैः सर्पादिभिर्यथा ८ इह भगवति शुद्धे मायिके विश्व
मेतत्प्रभवति न हि तावत्संस्पृशीयाद्विभूतिः क्वचिदपि गगनेनानीलिमस्प
र्शगंधो गुणइव भुजगाद्यारोपितं चापि तत्र ९ । ४

नीलकंठीटीका ९

एवं ज्ञानाभिमुखीकृत्य यदुक्तं तदाह मयेति मया इदं सर्वं जगत् ततं
व्याप्तं उपादानत्वात् कनकेनेव कुंडलादीनि तत्प्रागेवोक्तं अहं सर्व
स्य जगतः प्रभवः प्रलयस्तथेति तथा च राजविद्येत्यादिश्लोकोक्तिरस्यानेपवक्त्र

तास्मात् वक्तव्यविशेषाभावादितिचेत् अत्रब्रूमः यथा यतोवाइमानिभू
तानिजायंते येनजातानिजीवंति यत्प्रयंत्यभिसंविशंति तद्विजिज्ञास
स्व तद्ब्रह्मेतीतितैयस्वब्रह्मणोलक्षणं जगज्जन्मादिहेतुत्वमुक्तंतस्यात्रु
गमंअनादिशाकृशाखिनेषुविराजादिषुदर्शयति अन्नाद्ध्येवखल्विमानि
भूतानिजायंते प्राणाद्ध्येवेत्यादिना तस्यनिर्णयवाक्यंतु आनंदाद्ध्येवख
ल्विमानिभूतानिजायंतेइति सैषाभार्गवीवारुणीविद्येतितत्रैवविद्यायाः
पर्यवसानाभिधानात् एवमिहापिसप्तमी भूमिरापोनलोवायुरित्यादि
नासर्वभूतात्मकस्यविराजोजगज्जन्मादिहेतुत्वंप्रदर्श्यपश्चादहंसर्वस्यज
गतःप्रभवःप्रलयस्तथेत्यनेनमायाशबलितस्यप्रदर्श्येदानींशुद्धस्यतगा
त्समेवतद्दर्शयतिस्थूलारुंधतीन्यायेनप्रतिपत्तिसौकर्यार्थमितिगम्यते
राजविद्येत्यादिनातत्त्वनत्वात् यथाकश्चित्तुल्लसंसूक्ष्मामरुंधतीदिदर्श
यिषुस्तत्समीपस्थांस्थूलांतारामरुंधतीतिग्राहयतिप्रतिपद्यतेचानेनैवक्र
मेणप्रतिपन्ना एवमिहापिकार्यकारणप्रतिपत्तिद्वाराअकार्यकारणस्य
शुद्धस्यप्रतिपत्तिर्युक्ता अतएवभगवान्भाष्यकारोमयाततमिदंसर्वमि
त्यत्रमयाममयःपरोभावस्तेनततंव्याप्तमिति व्याचख्यौ नत्वहंसर्वस्यज
गतःप्रभवस्तत्रममयःपरोभावःसएवसर्वस्यजगतःप्रभवइति सचभगवतः
कारणात्मनःपरोभावःपरमानंदएवतेनैवचेदंततं आनंदाद्ध्येवेत्युदाहृ
तश्रुतेस्तस्यैवजगदुपादानत्वेनतदीयसत्तास्फूर्तिभ्यांजगतोव्याप्तत्वात्
अतएवाव्यक्तमूर्तिनेतिविशेषणं मायाशबलंहिकारणंबुद्धिग्राह्यत्वा
त्करणगोचरःशुद्धंहिबुद्धेःपरत्वात्करणागोचरइति किंभूतात्कारणानंदः
परिणामतइत्याह मत्स्थानीति मयिपरमानंदेरज्जौसर्पदंडधारा
दयइवसर्वभूतानिस्थितानि अतोमत्स्थानीत्युपचाराटुच्यते अधिष्ठानात्पृथ
र्थाभावात्मतवसंबंधायोगात् एतदेवाह नचेति नचाहंपरमानंदस्तेषुभूतेष्व
वस्थितोमिथ्यादात्म्यविभ्रमत् अपरिणामित्वादेव ४

आनंदीटीका १२

ज्ञानमेवाह अव्यक्तमूर्तिनावाङ्मनसागोचरेणपरब्रह्मस्वरूपेणमयाइदंदृश्यप्रपंचस्थूलसू
क्ष्मंजगदधिष्ठानतयास्थितिसमयेविस्तारितं यथापाणिकेनराशीसंहतंवस्त्र
प्रमाणेनविस्तीर्यतेतथासर्वाणिभूतानिमत्स्थान्यपिमत्स्थानि

श्री
गी टी
न

भवंति च पुनरहं सर्वकारणं तेषु नास्मि बहिरंतश्च यामात्मा अथ चाव्यक्तमू
र्तिना परप्रकृतिस्वरूपेण जीवात्मना मया हं शब्देन वाच्येन गच्छति परि
णामं जगदिति प्रमत्वा भूतेंद्रियादिसंघातरूपं शरीरं ततं व्याप्तं मत्स्थानि
मदधिष्ठितान्येव सर्वभूतानि शरीरारंभकाणि पृथिव्यादीनि नचाहं तेष्व
वस्थितः यथा भूतानि जीवाधीनप्रवृत्तीनि तथा जीवस्तदधीनप्रवृत्तिर्ना
स्ति ४

तदिदानीं ज्ञानं प्रतिपादयि रामकंठटीका १४
तमाह ॥ मम संबंधिनमेश्वरमीश्वरे सर्वथात्मानमित्येकस्मिन्नेव योगमनन्याधिकर
णं समाधिं पश्य प्रतिपद्यस्व यतः इदं वेद्यत्वेन सर्वप्रमातॄणां सर्वसंवेदन
गोचरभावरूपमवान्तरभेदपरिकल्पनया निष्पर्यंतं वस्तुमयोपादान
सहकार्यादिकारणान्तरनिरपेक्षेण नित्यनिर्विकारस्वात्मस्वसंवित्मा
त्रस्वभावाप्रच्युतेन नानन्यानुकार्यनित्यनिरतिशयनिजक्रीडामात्रैकप्र
योजनेन स्वेच्छैकसाधनेनैकेन कर्त्रा ततमित्थमनेनाश्चर्यविभासरूप
तया विस्तारितं जगद्भुवनमव्यक्तमूर्तिना मन्मायोपाधितैः सर्वैः प्रमातृ
भिरिदन्तया परिच्छेत्तुमशक्यता द्रव्यकालव्यपदेशपथातिवर्तिना मूर्तिरा
कृतिः स्वरूपं यस्य स तथा तेन तादृशेन किमुक्तं भवति ब्रह्मादेरारभ्य प
रमतत्त्वद्रुजंतपर्यंतस्य सर्वस्य प्रमातुर्यत्संवेद्यं वस्तु येन येन प्रकारेण यस्य
त्र यदा यत्र यत्प्रकाशेत तत्संवेद्यमानं लभते संवेद्यमानतां च संवेदितः कर्म
भावापत्तिः संवेदिता च परमार्थतः मदेकरूप एव भवितुमर्हति येन कथं
चित्कदाचित्क्वचित्संवेद्यत्वलक्षणविशेषणसंपर्कं सहते ततो मत्
स्थानि मय्येकस्मिन्संवेदितरि स्थितानि सर्वाणि निखिलानि स्थावरजंग
मानि संवेद्यानि भूतानि एवं सर्वकर्ता सर्वशक्तिरेवाहं नच तेष्वहं तेष्व
वस्थितः ४

अथ भक्तियोगस्य वि लासिकी [illegible]टीका १५ वयमस्तं राजविद्याराजगुह्यं योगशब्द
वाच्यमैश्वर्यं रूपं श्रोतारमभिमुखीकृत्य प्रतिपादयति ॥ मय्येश्वरेणाधिष्ठानभूतेन मायाविरूपिणा इदमिदन्तयावभासमानं सर्वका
र्यकारणात्मकं प्राकृतं जगत्ततं व्याप्तम् इदमहमित्तीदंतान्यक्कारेणाहन्त
याच्छादितम् ननु त्वया वासुदेवेन परिच्छिन्नेन सर्वं जगत्कथं व्याप्तम्
अपत्तविरोधान्नेत्याह अव्यक्तमूर्तिना अव्यक्तानीन्द्रियाप्रकाशात्स्वयस

चिदानंदरूपाणमूर्तिर्यस्य तेन तथाविधेन न तु जीवेनैव तत्संवेदनद्वा
रेण तादात्म्यमापन्नेन सर्वमिदं ततमिति श्रूयते तदुक्तम् यस्मात्स
र्वमयो जीवः सर्वभावसमुद्भवात् तत्संवेदनरूपेण तादात्म्यप्रति
पत्तितः इति तत्कथं तत्स्वरूपेण ततमित्याशंका जीवानामपि ग्रहमे
वाधिष्ठानमित्याह मत्स्थानि सर्वभूतानि मयि बोधरूपे हन्ताप्र
मेयसामान्यस्पन्दे समष्टिरूपाणि सर्वाणि चराचररूपाणि भूता
नि स्थितानि स्थितिभाञ्जि भवन्ति अन्यस्य प्रतिष्ठायोगाविद्यमान
त्वात् नहि निरात्मकं किंचिद्भूतं व्यवहाराय कल्पते तत्तत्त्वमेवचे
त्तेषां प्रतिष्ठा यामतर्हि भूतानामेव तद्वाश्रयेण वेदकतया तद्रूपाणि
जगद्व्याप्नुवन्नित्यत आह नचाहं तेष्ववस्थितः अहमीश्वरस्तेषुभे
देन प्रतीयमानेषु भूतेषु नैव स्थितः कुतः तेषां भूततद्रूपबोधात्म
कप्रसिद्ध तदीयजडरूपपुरःसरीकारेण तद्विपरीतबोधस्वभाव
तिरोधानात् चोवधारणेन तु यद्यपि भूतानि भूतात्मके जडरूपे
शरीरे तावदहंभावेदेवाकानि तथापि तेषां तद्रूपतया अहंतायाः स्फु
रणात्क तत्तेषु त्वं न स्थितः इत्याशंक्याह ४

पंचोलीटीका

एवं ज्ञानं स्तुत्वा अर्जुनमभिमुखीकृत्य तदेव ज्ञानमाह मये
ति इदं सर्वं जगदव्यक्तमूर्तिना इंद्रियागोचरस्वरूपेण मा
या परमात्मस्वरूपेण ततं व्याप्तं सर्वाणि भूतानि ब्रह्मादिस्था
वरांतानि मत्स्थानि मयि स्थितानि च पुनः अहं निरवयव
त्वात् असंगत्वाच्च तेषु संश्लेषरूपेण नावस्थितः ४

रणवीरसमिद्धोधिनी॥

एवं प्रतिज्ञातस्योक्तवक्ष्यमाणलक्षणस्य ज्ञानस्य प्रशंसया
र्जुनमभिमुखीकृत्य स्वविषयकभक्त्युद्भवनिमित्तात्मैश्वर्यख्या
पनाभिन्नं प्रतिज्ञातज्ञानस्वरूपं तावदाह मयाततमित्यादि
ना श्लिष्टेन ग्रंथेन इदं प्रत्यक्षतः उपलभ्यमानं कृत्स्नं क्रियते इ

181

तिकृत् कर्मतत्रस्त्रातीतिकृत्स्नं कर्मणि ह्यानमग्रं कर्माधिका
रीतियावत् यद्यु कृत्स्नं हिंसाद्यामितियावत् तत्सारात् कृत्
हिंसादुष्टादिदुरदमनलक्षणात तत्रस्त्रानमभिषिक्तं कृत्स्नं
दुष्टदमनेधिकृतं जगत्स्थितिलक्षणेर्जगमवर्गः मया
मेवस्वरेण तत्तमाक्रांतं हंतुमारब्धमितियावत् ननु प्रति
पक्षीय योधादिमारणवर्जमतस्तावतश्चि मा ज्ञावरणप्रतिज्ञात
वतो निराकृथत्स्वतवैसंहारः कथं कार्यकर्तव्य इत्यत आह
अव्यक्तमूर्तिनेति येन कालरूपेणाहं जगद्ग्रसितुं प्रवृत्तो
स्मि सोममभि नैवमूर्तिर्यमेवदृक्षिभिर्मदनगृहीतेषु इ
मयार्थ्येतिभावः साधुरेषा याथयद्यपेक्षिष्यते भगवता अने
नैवाभिप्रायेण मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव स
व्यसाचिन्नित्यादिनाथविहत्यकथ्यते अथ चेदं कृत्स्नमेव ज
गदव्यक्तमूर्तिनामयाशुल्काधेनत तव्याम् एवमेव वार्थोद
याभेध्यायेय याऽन्यास्योविहीत्यय एव हि मूर्तिमत्त्वं श्रीमद् र्जि
तमेव वा तत देवावगच्छ त्वं मम तेजोंशसंभवं अथवा बहुनो
केन किं ज्ञातेन तवार्जुन विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थि
तो जगदित्यनेनाध्यायार्थोपसंहाररूपयहृदयेन सगृहीतो बोध्यः
किमुक्तं भवति एतस्मिन्नुह्यमध्ये यस्य यस्य बलाद्यधिकं
दृश्यते येन चिंतितमात्रेणैव विभूतीभूयते भवाद्दृशो तत्सम
वैभवं हरूपांशेन स्थितोस्मि न च भवद्वेषानु प्रमाणेन नैता
मवध्यत्वेसति मम तत्रैवं रणं व्यर्थमिति वाच्यं मयाकालरू
पेण तेषां ग्रसितमात्रत्वात् अतो वश्यंभाविनितद्वयेमा ते
भयेन पापाशंकया वानिवर्तिष्यसि इति एतेन मतिस्नातंतनिश्च
यात्मकं ज्ञानमेव स्वयं निरूपितं ननु यदीदं कृत्स्नं जगद्ग्रसितु
मेव प्रवृत्तोसि तदस्माभिरप्यवश्यं मर्तव्यमिति मद्राभयस्या
नेकस्य नाम विशेषापन्नस्य कीदृशेवापि स्वमरणारोचते तत्रा

15

रणान्निवृत्तिरेवतावन्नीतिविद्भिर्विहस्तत्स्वीकारस्त्वयमेनस्य स्मरण
प्रसक्तिर्भयेन रणान्निवृत्तिमाशंक्य तज्जीवनेऽपि प्रमाणमिति म
त्स्थानीति सर्वाणि भूतानि हृदयोरपि सेनयोर्विषये समवेताः सकलाः
सैनिकाः मत्स्थानि मयि सर्वेश्वरे तिष्ठंति प्राणमयमिति धियामा
माश्रयंतीति मदाश्रयाणि न भवंति अतोऽहमपि तेषु विषयेषु स्थितो
भवामि तत्पक्षं नावलंबितवानस्मीत्यर्थः वपाहूस्थानेति षयं सम
बिनोति काकाक्षिन्यायेन देहलीदीपन्यायेन वा न चाहं तेष्ववस्थित
योवातोऽहमस्मैते मयावपपं संहरिष्यंत इति भावः ४॥

मधुभाष्य

मयेति तर्हि किमिति न हन्यंत इत्यत आह अव्यक्तमूर्तिनेति
मत्स्थानीत्यपि यथा पृथिव्यां सम्यक्स्थितानि न तथा मयीत्याह ४॥

18/2

भाषा अनुवाद

इस प्रकारसे अवसरप्राप्त जो ज्ञानकाण्ड तिसके श्रोता अर्जुन को उत्साह युक्त करि के सोई ज्ञान दो श्लोक से कहते हैं कि जिसका स्वरूप अव्यक्त कहे इन्द्रियों का अगोचर ऐसा कारणरूप जो मै सो मेरे से सम्पूर्ण जगत व्याप्तहै क्यों कि श्रुति कहतीहै कि सोई ब्रह्म संसार सृष्टि करिके उसके बीच जीवरूप होय प्रविष्टहै इस कारण चराचरात्मक भूत मात्र कारण रूप मेरे ही मे स्थित हैं परन्तु ऐसाभी है तो भी स्वकार्य घटादिमे मृत्तिका के तुल्यमैं भूतों मे नहीं हूं जिस हेतु मै आकाशके समान संग रहित अर्थात् अलग हौं ४ ।

दोहा

अलष रूपसें मोहिसें यहसभभयो संसार मो में स्थितसभभूतहे
नाहों तिनहि आधार ४॥

19

नच मत्स्थानि भूतानि पश्य मे योगमैश्वरं
भूतभृन्नच भूतस्थो ममात्मा भूतभावनः ५

शांकरभाष्य १

न ह्यसंसर्गि वस्तु क्वचिदाधेयभावेनावस्थितं भवत्यत एवासंसर्गित्वान्मम न चेति न च मत्स्थानि भूतानि ब्रह्मादीनि पश्य मे योगं युक्तिः घटनं मे ममैश्वरं योगमात्मनः ईश्वरस्येदमैश्वरं याथात्म्यमित्यर्थः तथा चात्मनो या श्रुतिरसंसर्गित्वादसङ्गतां दर्शयत्यसङ्गो न हि सज्जत इदञ्चाश्चर्यमन्यत् पश्य भूतभृदसङ्गोपि सन् भूतानि बिभर्ति नच भूतस्थो यथोक्तेन न्यायेन दर्शितत्वात् भूतस्थत्वानुपपत्तेः कथं पुनरुच्यते असौ ममात्मेति विभज्य देहादिसंघातं तस्मिन्नहंकारमध्यारोप्य लोकबुद्धिमनुसरन् व्यपदिशति ममात्मेति न पुनरात्मन आत्मा अन्य इति लोकवदजानंस्तथा भूतभावनोभूतानि भावयति उत्पादयति वर्द्धयति वा भूतभावनः ५

आनंदगिरिकृतटीका २

संश्लेषाभावेपि किमिति नाधेयत्वमत आह न हीति परमेश्वरस्य भूतेषु स्थित्यभावेपि भूतानां तत्रस्थिति स्यात्स्थितेति कुतोऽसंगत्वं नत्वाह अत एवेति नचेत्यत्र चकारोऽवधारणार्थः भूतानामीश्वरेणेव स्थितिरित्यत्र हेतुमाह पश्येति आत्मनोऽसंगत्वस्वरूपमित्यत्र प्रमाणमाह तथा चेति असंगश्चेदीश्वरस्तर्हि कथं मत्स्थानि भूतानीत्युक्तं कथञ्च नत्वोक्तं च मत्स्थानीति न हि विरुद्धमुदीरितमित्याशंक्याह इदञ्चेति तर्हि भूतसम्बन्धः स्यादि[illegible]ति नेत्याह न चेति यथोक्तेन न्यायेन असंगत्वेनेति यावत् असंगतया वस्तुतो भूता सम्बन्धेपि कल्पनया तदविरोधान्न मिथो विरोधोऽस्तीति भावः आत्मनः सकाशादात्मनोऽन्यत्वायोगात् कुतः सम्बन्धोक्तिरित्याशंक्याह असाविति यथा लोको वस्तुतत्त्वमजानन् भेदमारोप्य ममायमिति सम्बन्धमनुभवति न तथेह सम्बन्धव्यपदेशः आत्मनि स्वतो भेदाभावादतो भेदे सत्येव लो

श्री
गी टी
न

२०

के सम्बन्ध बुद्धिदर्शनमनुसरन् भगवानात्मनो देहादिसंघातं विभज्या
हंकारं तस्मिन्नारोप्य असौ ममात्मेति भेदं व्यपदिशति तथाच संघात
स्य ममेति व्यपदेशान्ततो निकृष्टस्य स्वरूपस्यात्मशब्देन निर्देशान्न भू
तस्थो सा विरुद्धः शरीरेणासंगत्वात् शरीरेणात्मा भूतानि भावयतीत्याह
तथेति ५

स्वामिकृतटीका ३

किंचनचेति नच मयि स्थितानि भूतानि असंगत्वादेव नन्वतर्हि व्यापकत्व
माश्रयत्वंच शरीरत्वं विरुद्धमित्याशंक्याह मे पश्य मसाधारणं योगंयु
क्तिमघटनं घटनाचातुर्यमिदं पश्य मदीय योगमायावैभवस्यातर्क्यत्वा
न्नकिंचिद्विरुद्धमित्यर्थः अन्यदपि आश्चर्यं पश्येत्याह भूतभृदिति भू
तानि विभर्ति धारयतीति भूतानि भावयति पालयतीति भूतभावनः
एवंभूतोपि ममात्मास्वरूपं भूतस्थो नभवति अयंभावः यथा जीवो देहं
विभ्रत्पालयंश्चाहंकारेण तत्संसिक्तंतिष्ठति एवमहं भूतानि धारयन्‍नपि ^पालय
तेषु ^नतिष्ठामि निरहंकारत्वादिति ५

पैशाचभाष्यटीका ४

नच मत्स्थानि भूतानि मयि तिष्ठंतीति मत्स्थानि न चेमानि भूतानि म
त्स्थानि असंगो नहि सज्जत इतिश्रुतेः पश्यालोकयमे योगमैश्वर्य मीश्व
रसंबंधिनं भूतानि विभर्वतीति भूतभृत् नचभूतस्थः नचभूतेषु ममैश्व
र्यस्यात्म भूतभावनः भूतान्युत्पादयतीतिभूत भावनः ५

रामानुजभाष्यटीका ५

नच मत्स्थानिभूतानि नघटादीनां जलादेरिव ममधारकत्वं कथं मत्संक
ल्पेनपश्यममैश्वर्यं योगं अन्यत्र कुत्रचिदसंभावनीयं मदसाधारणमाश्चर्यं
योगं पश्यको सौ योगः भूतभृत् नचभूतस्थो ममात्मा भूतभावनः सर्वेषां
भूतानां भर्ताहं नचतैः कश्चिदपि ममोपकारः ममात्मैव भूतभावनः
ममममनोमयसंकल्प एवभूतानां भावयिता नियंताचे [illegible]
[illegible]

अभिनवगुप्तकृतटीका ६

नचाहंतेष्विति नचमत्स्थानिविपर्यासानो नतत्रादृष्टेः नहि मूढा अविद्ध्
मसे विस्वभावं पारमेश्वरं समस्त वस्तु परिच्छेद प्रतिष्ठास्थानं मन्यंते
अपितु कृशो देवदत्तोहमिदं वीर्यमिदं स्थितमिति मितमेव स्वभावं प्रति
ष्ठानतया पश्यंति ननु कथमेतद्विरुद्धमित्याह पश्य मे योगमैश्वरमिति
योगः शक्तिर्युज्यमानत्वात् एतदेव ममैश्वर्यं यदेवं निरतिशयाद्भुतस्व
निस्वातंत्र्यमित्यर्थः ५

परमार्थप्रपादीटीका ७

अथ तदेव प्रकटयन्नाह नचेति । वपरं भूतानि मत्स्थानि नभवंति त
थाच पूर्वं मत्स्थानि सर्वभूतानीति यदुक्तं तत्र नचेति निषेधेन प्रातिभा
सिकत्वं द्योतितं यथा भ्रम निवृत्ति काले शुक्तिकायां रजतं नास्त्येव तदु
क्तं भ्रमं भाति यथा वीचिर्न चास्ति नचनास्तिच तथा जगद्ब्रह्मणीदं
शून्याशून्यपदं गतमिति अध्याधिकरणं विनाभ्रमो नस्ति नास्तीत्याह पश्ये
ति दृश्यमाने प्रतीतेपि मयैश्वर्यं योगं ईश्वरेण सहजात ऐश्वर्यो योगआध्या
सिकः संबंधइति पश्य । तदेवाह । भूतभृदिति ममात्मा मत्स्वरूपं भूतभृत्
अधिकरणरूपेण भूतानि बिभर्ति परंन भूतस्थः असंगत्वात् नह्याकाशे
भूतानि तिष्ठंत्याकाशेवाभूतेष्विति केनापि प्रतीयते तथा ममात्मा भूत
भावनः भूतानि भाव्यंते कल्प्यंते यस्मिन् सतथा ५

वनमालीटीका ८

अथ तद्दुतमैश्वर्यमाह नचेति यथा पृथिव्यांस्थितानि भूतानि पृथिवीस्प
र्शनादिकमिंद्रियेण तान्यन्योन्यधर्मसंक्रांतिं वा सायस्थितानि न तथा मयि
स्थितानीत्यर्थः तत्र हेतुरैश्वरमीश्वरस्वभावं योगं सामर्थ्यं पश्य पश्यतु त्वं तेनेन
योगेनाघटघटनापटीयः सामर्थ्यमित्यर्थः आत्मनिचैवंविचित्राश्चहीतिस्मृ
ात् विचित्रशक्तिः पुरुषः पुराणइतिश्रुतेः असंगोह्ययंपुरुषइत्यादि
श्रुत्या सर्वोदयादिकर्ता निर्लेपस्वपासंगत्वबोधनाच्च भूतभृत् भूतानांधा
रणं धारकः पोषकश्चाहं नभूतस्थः भूतैः कृतोपकारो नभवामि कुतो
यतो ममात्मा स्वरूपाभिन्नो देहो भूतभावनो भूतोत्पादकः ताभ्यामासी
दंतरीत्नमित्याद्युक्तेः नित्यः कर्मादिनाचित्तशुद्धिः अथ ममतनिदि ए
ध्यासनादिनात्मत्वमनेनप्रतिज्ञातं वर्णितं चहरेरद्भुतैश्वर्यस्यापरोक्षं

ततोऽसक्तिरितिभावः ५

श्रीमद्वैजयन्तीटीका ९

ननुयथाघटादयोजलादिकंधारयंतितथैवत्वमपिभूतानिधारयसि अथ
वाकेनचित्प्रकारांतरेणेत्याशंक्यनाहंभूतानिधारयामितन्महदद्भुतंम
मैश्वर्यंतंपश्यत्याह नचमत्स्थानीति चशब्दोवधारणार्थकःमत्स्थानि
मयिधारकेघटादौजलादीनांवस्थितानिभूतानिनैवभवंतिममासंगत्वात्
नन्वेवंचेत्तर्हिपूर्वोक्तविरोधःस्यादित्याशंक्यममाचिंत्यशक्तिमात्रसंकल्पे
नैवधारयामीत्याह पश्येति मेममैश्वरमीश्वरस्यममासाधारणंममैश्वरत्वमिमंयो
गं अघटमानेषुकार्येषुयुज्यतेऽनेनेतियोगःसत्यसंकल्पत्वरूपस्तमद्भुतं
मदसाधारणलक्षणंसंकल्पत्वेनपश्यजानीहि नन्वसौयोगःकिमाकारःस्या
दित्यपेक्षायामाह भूतभृदिति भूतानिचराचरात्मकानिबिभर्तीतिभूतभृ
त् भूतानांधारकःपोषकश्चाप्यहं नचभूतस्थःभूतैर्जलादिभिर्घटादिवत्सं
श्लिष्टोनैवभवामियतोममसर्वेश्वरस्यात्मासत्यसंकल्पात्मकंमनएवभूतभा
वनः भूतानांभावयितानियंताभवति अतःसर्वंघटतेनेनविरुद्धशंकाव
काशइत्यर्थः ५

मधुसूदनीटीका ९

अतएव-द्रिविष्ठरवाद्यधिकल्पितानिजलचलनादीनिमयिकल्पितानिभूतानि
परमार्थतोमयिनसंति त्वमर्जुनःप्राकृतोमनुष्यबुद्धिंहित्वापश्यपर्यालो
चयमेयोगंप्रभावमैश्वरं अघटनघटनाचातुर्यंमायाविनाइवममालोक
येत्यर्थः नाहंकस्यचिदाधेयोनापिकस्यचिदाधारः तथाप्यहंसर्वेषुभूतेषु
मयिचसर्वाणिभूतानीतिमहतीयंमाया यतोभूतानिसर्वाणिकार्याण्यु
पादानतयाबिभर्तिधारयतिपोषयतीतिचभूतभृत् भूतानिसर्वाणिक
र्तृतयोत्पादयतीतिभूतभावनः एवमभिन्ननिमित्तोपादानभूतोपि म
मात्माममपरमार्थस्वरूपभूतःसच्चिदानंदघनःसत्वासंगाद्वितीयस्वरू
पत्वान्नभूतस्थः परमार्थतोनभूतसंबंधीस्वप्नदृगिवनपरमार्थतः स्व
कल्पितसंबंधीत्यर्थः ममात्मेतिराहोःशिरइतिवत्कल्पनयाषष्ठी।

[illegible] ५

सदानन्दीटीका ९

मत्स्थान्यस्तानि भूतानि न संति मयि वस्तुतः द्विविशेषैक्ये यथाध्यस्तंजलकंपा
दिकंनहि १ हिताविषाक्तनीडुहिंश्रभावंमेविलोकय आधेयोहंनकस्यापि
नाधारः कस्यचित्तथा २ तथाप्यहंसमस्तेषुसमस्तानिमयीतिच भूतानी
हास्तिमायेयमहतीमैश्वरंमम ३ यतोभूतानिसर्वाणिसर्वोपादानभाव
तः बिभर्तिधारयत्येवपोषयतीतिभूतभृत् ४ उत्पादयतिभूतानिक
र्तृत्वाद्भूतभावनः ममात्माभिन्नरेतत्पादानभूतोपिवस्तुतः ५ चिदानंद
घनोसंगस्वरूपत्वान्नभूतगः वस्तुतोभूतसंबंधीनास्त्येवात्माममेतिच
६ राहोःशिरइतीवात्रषष्ठीकल्पनयेरितः भगवाँल्लोकदृष्ट्याचारोप्याग्रा
हंकृतितंनौ ७ ममात्मेत्याहभगवद्भाष्यकारैरितीरितं ८।५

नीलकंठीटीका ।१२

एवमभुगतंआनंदस्यजगद्विवर्ताधिष्ठानत्वंतदप्यपवदति नचमत्
स्थानीति अयंभावः अस्यैतेंद्रजालस्ययदुपादानकारणं अज्ञानंत
दुपाश्रितंब्रह्मकारणमुच्यतइतिवार्तिकोक्तेरज्ञानमेवजगत्कारणं
नब्रह्मतच्च अहंचासंगः ततश्चतच्छतेणतत्कार्येणभूतसंघेननम
मासंगस्य आधाराधेयभावसंबंधोऽनिर्वचनीयोप्यस्ति आवृतेहिरज्जु
दिकर्मनिर्वचनीयेनसर्पादिनासंबध्यते अहंतुसर्वदानावृतःसाक्षि
रूपत्वान्नसंबंधयोग्यइतिनचमत्स्थानिभूतानीत्युक्तमिति ननुसाक्षिण
स्तवब्रह्मणोध्रुवासर्वीचेतिश्रुतौनैवभूतसंबंधानुभवात्कथंनचम
त्स्थानीत्युक्तिरित्याशंक्याह पश्यमेयोगमैश्वरमिति मेममभूतैःसह
योगंयुक्तिंघटनांपश्य पेश्वरंईश्वरेणमायाविनानिर्मितं गगनेगंध
र्वनगरमिव अतएवममकारणशरीरस्य आत्माऽस्यगआनंदोभूतभृ
दपिभूतस्थोन चकारोप्यर्थेभिन्नक्रमश्च खमिवगंधर्वनगरभृदपि
तत्स्थोन तस्यतदाकारेणपरिणामासंभवात् एवंरूपोपिपरानंदरू
पोममात्मासभूतभावनः भूतानांवृद्धिकरः एतस्यैवानंदस्यमात्रानि
भूतानिमात्रामुपजीवंति कोह्येवान्यात्कःप्राण्यात् यदेषआकाश
आनंदोनस्यादित्यादिश्रुतिभ्यः आकारोअव्याकृताख्योधिष्ठान
भूतआनंदोऽनुस्यूतोनस्यात्तर्हिप्राणापानक्रियांकश्चिदपिनकुर्यात्

कारणगतं जाड्यं कार्येपि स्यात् आकाशे आनंदात्म्यं येन कारणस्य चे
तनत्वात्कार्यमपि चेतनावत्स्यादिति अयमर्थः बृहदारण्यकेपि यदूर्ध्वं
गार्गि दिवो यदवाक्पृथिव्या यदंतरा द्यावापृथिवी इमे यद्भूतं च भवच्च
भविष्यच्चेत्याचक्षते आकाश एव तदोतं च प्रोतं चेति मायायां वि नि सर्वस्यो
तप्रोतत्वमुक्त्वा कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेत्यस्योत्तरं एतस्मिन्
खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेत्यस्थूलादिलक्षणस्याक्षरस्या
काशाधारत्वमुक्तं तस्माद्युक्तमुक्तं आकाशशरीरेण भगवता कारणो
पाधिनिकृष्टविभागाभिप्रायेण ममात्मा भूतभावन इति ५

आनंदटीका ६

ऐश्वरं योगमैश्वर्यसम्बन्धं सर्वशक्तिमत्त्वं मे परब्रह्मस्वरूपस्य विचारय समनं
तरोक्तमात्मस्थानीत्युक्तमपि न च मत्स्थेव तिष्ठंति मत्स्थानि सर्व विनाशनः भव
रूपस्यंते विलीयंते चेत्यर्थः एतदेव स्पष्टयति मम परब्रह्मण आत्मा परमा
त्मसंज्ञः भूतभावनः भूतानि महाप्रलये सकलकारणात्मना व्याकृत्याप्ट
थक्पृथगवस्थितान्यपि भावयति सर्गादौ पंचीकरणक्रमेण संयोजयति
मिश्रयतीत्यर्थः भुवो कल्कने इति धातोः सम्भावयतीति वा मि स्वरूपेणा
र्थस्येदंरूपं भूतभृत् भूतानि बिभर्ति धारयति पोषयति च न च भूतस्थः निर्वि
कारस्य निर्लेपस्य तेभ्यः पृथगेवास्थितः तथा मे जीवात्मरूपस्यैश्वरं यो
गमीश्वरस्वभावं पश्य एतं तत्पदस्याये न सर्वभूतानि मयि कारणे स्थितानि
यतो मम परमेश्वरसम्बंधी आत्मा परप्रकृतिरूपो जीवः भूतभावनः इदं
शरीरारंभकारणे भूतानां संयोजकः शरीरारंभकाणि भूतानि जनय
ति पोषयतीति भूतभृत् न च भूतस्थः केवलमेतच्छरीरारंभकेषु भूते
ष्वेव न स्थितः किंतु कर्मभोगार्थं स्वप्नावस्थायां योगावस्थायां च व्यापक
त्वाद्बहिः परमाण्वपि शरीरान्तरं आविशतीत्यर्थः [illegible] ५

रामकंठटीका ४

यथा नित्यं संवेदित्वमात्रस्वभावाऽव्यभिचारिणो मम व्यवस्था संवेद्या
नां सर्वभूतानां व्यवस्थितिहेतुर्न तथा सर्वभूतव्यवस्थाम व्यवस्थितिरे
तरित्यर्थः सर्वाणि हि भूतानि संवेद्यत्वादेवोत्पादिविनाशादिधर्मसंबं

आदीनि स्थानि मम तत्संवेदितृत्वमेकं लक्षणमिति कथं मम भूत
स्थितत्वधीनावस्थितिर्भवेत् इत्थं मदधीनस्थितिकान्यपि भूतानि
न मत्स्थानि मयि संवेदितरि स्वरूपतयैव नास्थितिं भजन्ते वेद्यतया
स्फुरणात् भूतस्थितिहेतुरहं यथा संवेदितृतयैव नित्यं स्फुरामि
न तथा मत्स्थान्यपि भूतानि संवेद्यत्वेनैव तेषां प्रतीतेः एवं यथोक्तप्रका
रेण मम आत्मस्वभावो भूतभृत् भूतानि बिभर्ति धारयति तेन तेन रू
पेणावस्थापयति न च भूतस्थः न च भूतस्थितिसाधीनास्थितिकस्व
रूपमेव अनुस्यूतेन क्रमेण भूतभावनो भूतानि भावयति सृजती
त्यर्थः [illegible] ५

लासिकी [illegible]टीका १५

भूतानि जीवा मत्स्थानि मय्यीश्वरे समष्टिरूपे सामान्यसन्देहस्थितानि प्रति
ष्ठितानि नैव भवन्ति तेषामविद्यान्यानां तत्स्वरूपेश्वरस्य यथाभूतत्वान्माया
दीश्वरत्वनिर्देशः स्यात् नहि भूतान्यनवच्छिन्नसंवित्स्वभावं परमेश्व
रं समस्तवस्तुपरिच्छेदप्रतिष्ठास्थानं मन्यन्ते अपितु ब्रह्मोदेवदत्तो
हमिदं वेद्मि इदं स्थितमिति मितमेव स्वभावं प्रतिष्ठास्थानतया पश्य
न्ति ननु कथमेतद्विरुद्धमित्याह पश्य मे योगमैश्वरम् योगो युक्तिर
घटमानघटनाचातुर्यम् एतदेव ममैश्वर्यं यदेवं निरतिशयाद्भुतत्व
निष्पादनक्षमम् ननु कुतस्तर्हि भूतानां स्थितिरन्यत्रेत्यत आह भूतभृ
दिति चोपधारणे ममैवेश्वरस्यानन्तमद्रूपस्यात्मा परमार्थस्वरूप
भूतः सच्चिदानन्दघनः भूतभृत् भूतानि स्थापनेन बिभर्ति धारय
तीति भूतभृत् तथा भूतभावनः नानाकृतिकर्तृतया भूतोत्पाद
कः ममैवात्मा भूतानां स्थितिस्वनिर्विधायकः न तद्रूपयोः सा
कत्वात् नाप्यन्तरात्मासंगत्वात् नापि ब्रह्मतस्यानितरामबल
न स्वभावत्वात् एवमभिन्ननिमित्तोपादानभूतोपि ममात्मा परमा
र्थतो न भूतस्थः अयं भावः यथा देहं जीवो बिभ्रदहंकारेणानन्त्यं
विशन्तिष्ठति एवमहं भूतानि धारयन्नपि न तेषु निष्ठामि
निरहंकारत्वात् अतो मया सर्वं जगत्ततमिति ममात्मेति राज्ञोः
शिरस्तिवकल्पनया षष्ठी [illegible]

श्री
गी टी
व

93

भूमवेष्यं विनाकार्यस्थितेरसंभवात् तथा मद्भूतत्वमेषु विना तदभि
तेरभावान्मत्स्थानि सर्वभूतानीत्युक्तिरुपपादेन शंका पुनः
गुणस्थताधारधेयभावेनन कार्य उपपत्तिरितिनिगमयति ५

पंचोलीटीका

असंगत्वात् मम आत्मनः मत्स्थानित्वमपि भूतानि काल्प
निकत्वमेवेत्याह न चेति च पुनः न मत्स्थानि भूतान्यत एवा
संगत्वान्न मयि स्थितानि मे ममैश्वरं योगमात्मनो याथात्म्यप
श्य मम आत्मा भूतभृत् असंगोपि भूतानि धारयति असंगत्वान्न
भूतस्थः भूतभावनः भूतानां उत्पादयिता ५

रणवीरसमिद्धोधिनी

मत्स्थानि मदाश्रयाणि पुनः भूतानि प्रकृत्यादाहृते भूतं प्राणिनी
ते समे विश्वितिकोशगरतीनानि भूतमज्जभाजीतियावत् न भवि
ष्यंत्यत्र संग्रामे इति घोषः अतस्त्वमदाश्रयेण प्रवर्तमानस्य तव
न मृत्युभयमस्तीति भावः चेन्नैवं प्रत्येषि तत् ममैश्वरयोगप्र
भावं पश्य मत्स्वरूपं विलोकय एतदूहत्वं प्रत्यक्षं दर्शयिष्यामीति
भावः सैन्यापेक्षया वा अक्लीबत्वं एतदेव समर्थयति भूतभृदि
ति भूतानि विद्याविनयेत्यत्र प्रतिपादितस्वरूपसाम्ययोगाद्रूपा
णि बिभर्ति धारयति पोषयति वा तेजोऽर्पणेनानुप्राणयतीति
भूतभृत् तादृशोपि सन् ममायमात्मा वपुर्देहस्वीकार इति या
वत् भूतस्थो भूतस्थित्यधीनो न भवति किं पुनः भूतभावनः भू
तान् सत्पथं भावयति तत्पयतीति भूतभावनः यद्वा ममात्मा
यत्नः स्वीकृतशरीरानुगतवर्णाश्रमादिभागानतिक्रमणेनोवा
भिप्रीते इष्टव्यादिकर्माणि प्रवर्तयतीति यावत् भूतभृत् एषि
व्यादिभूतमयजगत्परिपालनप्रयोजनं इत्यर्थः अथवा भूत

स्यपुक्तस्यव्यवहारस्यसंस्थापनार्थं इति तदुपद्रवकारकाणां
तल्लोपकारकाणां च संहरणादिति भावः एतादृशोपि न भूतस्थः
भूतेषु प्राणिषु न तिष्ठतीति भूतस्थित्यधीनो न भवतीति यावत् भू
तेषु सर्वेषु समदर्शिषु सत्यपरेषु वा न तिष्ठतीति वा संहरणरूपो
ममयत्नो न तान्विषयीकरोतीत्यर्थः किंतु नः भूतभावनः भूतस्य
सत्यस्य धर्मस्य भावयतीति तादृशः भूतेन सत्येन न सत्यात्परमो ध
र्म इति स्मृतेः धर्मपरायणतया भातीति येनाभंते इति भूतभा सत्यध
र्मपरायणाः साधवः अथ च भूतस्य सत्यधर्मस्य भाविस्फूर्तिर्भूत
भाः तांश्चतां वा वतिरक्षति दुष्टेभ्य इति भूतभावनः यद्वा भूतास्ता
हिंभ्यतिरस्यंतीति ये ते भूतभाः वेसत्यमार्गेणावयं वा समस्तदिग्व्या
दिकं रिपुभिर्दृढीप्यते ततश्च तदन्नचारिणो वयं लोके प्रभाजः स्याम
त्येवं प्रकारेण कोयं धर्मोदृढो लब्धविषयसुखानां विनाशकरइत्ये
वं प्रकारेण च धर्मोज्ञीरवः अधर्मतत्परा इति यावत् तान वति अव
नरणादिषु तिथ्यावन्नुसारात् हिनस्तीति भूतभावनः एतेन वय
स्य यदाह्वीति परित्राणाय साधूनामिति च पद्यद्वयार्थः प्रतिज्ञा
तार्थसमर्थकतया पुनरपि संग्रहीतः अयं वाभिप्रायः दुर्योधना
दयोसत्यपरतयाधर्मसंस्थाविप्लावकाः भूयं तु सत्यपाशावद्धाः
सत्यपि सामर्थ्ये वनवासादिदुःखं सोढवंतः अस्य अतोधर्मसंस्थाप
नार्थमेव युष्माकं प्रवृत्तिः मदवतरणं च तदर्थमेव ततश्च मत्कृते
व्यसंपादनान्मदीयानां युष्माकं न मरणाद्भयमस्तीति यद्वा भूतानि
पृथिव्यादीनि बिभर्ति धारयतीति भूतभृत् न च भूतस्थः तैर्नधार्यते
निराधारं स्वमहिम्नैव स्थित इतियावत् यद्वा भूतानि प्राणिनः प्रत्यक्ष
व्यवहारदर्शनात् सामीप्यात्स्वरक्ष्याप्रश्चाः तान्येवाहं धारयामि न
पुनस्ते मां धारयंति यतोहं भूतभावनः भूतस्वभावो न भवामि
यदेव हि भूतमयं तदेवाधारं विना प्रायः स्यातं न प्राप्नोति अयं तु म
मात्मा तथात्वेनाधारानपेक्षएव तिष्ठत्येतदपि ममैश्वर्यमिदानीम

त्यक्तमेवपश्यतेतिभावः यद्वा भूतभृदितिकोर्थः यद्यप्यहंशुद्ध
नावरणंप्रतिज्ञानवानस्मि तथापिभवाहशोभुस्वांशंसमर्थेहं।
जगद्धरिष्याम्येवेति ननुभूताधीनकर्तव्यस्यतवकीदृशोस्वात
त्र्यमित्यतआह नचभूतस्थइति भूताधीनस्थितिकोनभवामीत्य
र्थः तत्रहेतुमाह भूतभावनइति भूतंसत्यंभावयतीति सत्यानु
रोधात्स्वयमिहर्नीनकरोमीतिभावः ५॥

मधुभाष्य

नचेति नदृश्यपश्चद्धषाचासौनस्पृष्टःस्पर्शेनेनचेतिहि मोक्ष
धर्मेसंज्ञासंज्ञेतिच ममात्मादेहेएवम्भूतभावनः मद्दाविभू
तेमाहात्म्यप्रारंभेइतिहि मोक्षधर्मे मस्थानिनचमत्स्थानीत्य
स्यदृष्टांतमाह ५॥

भाषा अनुवाद

और देखो कि हम सबसे अलग हैं इस हेत स्थावर जङ्गम भूत हमारे मे नहीं स्थितहैं औरजो शङ्का करो कि पीछे तुमने अपना सर्व व्यापित औ सब के आश्रय यह कहा है तो कहतेहैं कि हमारी अघट घटनारूप चातुरी देखो कि मेरी योग मायाके विभव बलसे समुझने के अयोग्यहै पर मेरा कहना तो किसी अंशमे विरुद्ध नहींहै और आचार्य्य लोगभी भूत भावन पालनकर्ता कहते हैं तौभी हमारा उत्कृष्ट रूप भूत भावन नहीं है जैसे जीव देह धारण औ पालनकरते हुये अहङ्कारसे देह के साथ मिलत हैं तैसे निरहङ्कार है तैसे भूतों का लालन पालन करते हुये भी हम उनसे पृथक हैं यही मेरा ऐश्वर्य्यहै ५ ।

दोहा

नामोमे स्थितभूतहे योग विभव ममदेष भूतधरौं नाभूतस्थि
त भूतभावन मोहिवेष ५॥

यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान् तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ६

शांकरभाष्य १

यथोक्तेन श्लोकद्वयेन उक्तमर्थं दृष्टान्तेनोपपादयन्नाह यथेति यथा लोके आकाशस्थितः आकाशे स्थितो नित्यं सदा वायुः सर्वत्र गच्छतीति सर्वत्रगः महान् परिमाणतस्तथाकाशवत् सर्वगते मय्यसंश्लेषेणैव स्थितानि मत्स्थानीत्येवमुपधारय जानीहि ६

आनन्दगिरिकृतटीका २

सृष्टिस्थितिसंहाराणामसंगात्माधारत्वं मया ततमिदमित्यादिश्लोकद्वयेनोक्तोर्थस्तद्दृष्टान्तेनोपपादयन्नादौ दृष्टांतमाहेति योजना सदेत्युत्पत्तिस्थितिसंहारकालो गृह्यते आकाशादेर्महतोऽस्याधारत्वं कथमित्याशंक्याह महानिति यथा सर्वगामित्वात् परिमाणतो महान् वायुराकाशे सदा तिष्ठति तथा आकाशादीनि महान्त्यपि सर्वाणि भूतान्याकाशकल्पे शरीरे प्रतीच्यसंगे परस्मिन्नात्मनि संश्लेषमन्तरेण स्थितानीत्यर्थः ६

स्वामिकृतटीका ३

असंश्लिष्टयोरप्याधाराधेयभावं दृष्टान्तेनाह यथेति अवकाशं विनावस्थानानुपपत्तेः नित्यमाकाशे स्थितो वायुः सर्वगतोपि महानपि नाकाशेन संश्लिष्यते निरवयवेन संश्लेषायोगात् तथा सर्वाणि भूतानि मयि स्थितानि जानीहि ६

पैशाचभाष्यटीका ४

यथेति यथा अयं दृष्टान्तः आकाशस्थितश्चलः नित्यं सार्वकालं वायुः सर्वत्रगो महान् महापरिमाणः सर्वभूताधारत्वेन तथा तद्वत्सर्वाणि भूतानि मत्स्थानि मयि स्थितानीति उपधारय अवगच्छ ६

सर्वस्यास्वसंकल्पायत्तस्थि नित्वे रामानुजभाष्यटीका ५ निदर्शनमाह ॥

यथेति यथाकाशेनालंबने महान् वायुः स्थितः सर्वत्र गच्छति स तु वायुर्निरालंबनो मदायत्तस्थितिरिति मयैव धृत इति विज्ञायते तथैव सर्वाणि भूतानि तैरसंस्पृष्टे मयि स्थितानि मयैव धृतानीत्युपधारय यथाहुर्वेद

श्री
गी टी
न

25

विदः मेघोदयसागरसन्निवृत्तिरिंदोर्विभागः स्फुरणानि वायोः विद्युद्विभं
गो गतयः सहस्रांशोर्विष्णोर्विचित्राः प्रभवन्ति मायाः इति विष्णोरनयसा
धारणानि सर्वैश्वर्याणीत्यर्थः एतस्यैवाक्षरस्य प्रशासने गार्गि सू
र्याचंद्रमसौ विधृतौ तिष्ठतः भीषास्माद्वातः पवते भीषोदेति सूर्यः भी
षास्मादग्निश्चेंद्रश्च मृत्युर्धावति पंचम इत्येकं सकलेनार निरपेक्षभग
वत्संकल्पात्सर्वेषां स्थिति प्रवृत्तिश्चोक्ता [illegible]
[illegible]

अभिनवगुप्तकृतटीका ९

यद्वदाकाशवाय्वोरविनाभावित्वेऽपि असम्बन्धेन जातुचिन्नभः स्पृशता
श्रूयते एवं सकलसंसारविसर्पेऽपि भगवत्तत्त्वं सर्वजनविषयं नप्र
तिनियतकं हि ९

परमार्थप्रपाटीका ७

अथासंश्लिष्टयोराधाराधेयभावं दृष्टान्तेन द्रढयति यथेति ९ अवका
शं विना वस्थानानुपपत्तेर्नित्यमाकाशे स्थितो महान् सर्वगोऽपि वायुर्निर
वयवेनाकाशेन सह न संश्लिष्यते तथा सर्वाणि भूतानि मयि वर्तमानान्यपि
जाV न संश्लिष्यंत इत्युपधारयेनीहि तदुक्तं यथा विशुद्ध आकाशे सहसैवा
भ्रमंडलं भूत्वा विलीयते तद्वदात्मनीहाखिलं जगदिति ९

वनमालीटीका ८

ननु ननु कृतमलेपत्वेन सर्वभूताधारत्वं दृष्टान्तेनोपपादयति यथेति वा संग
स्वभावेऽप्याकाशे स्थितो नित्यं सर्वदा उत्पत्तिस्थितिसंहारकालेष्वपीति वायुः
सर्वदा चलनस्वभावः अत एव सर्वत्र गच्छतीति सर्वत्रगः महत्परिमाणतः
एतादृशोऽपि न कदाप्याकाशेन सह संसृज्यते तथा सर्वत्राभिमानशून्येऽसंग
ताद्युपपादकाचिंत्यानंतशक्तिमति मयि स्थितानि सर्वाणि भूतानि मदा
धीनानि मदाधारकाणि यत्कृतमद्रूपकारणत्वमुपधारय जानीहि अतिदुर्ज्ञेय
मसंभावनाविपरीतभावनादिनाक्रान्तमपि मत्प्रसादाज्जानीहीत्यभि
प्रायः ९

अममवैजयन्तीटीका ९

ननु निरालंबनेन त्वत्संकल्पेन सर्वाणि भूतानि कथं तिष्ठन्ति तदुक्तिमेवमेमन

स्यसंभावितेव प्रतिभातीत्याशंकायां सदृष्टांतमाह यथाकाशस्थित इति
यथाऽनवलंबनो महान्वायुरनवलम्बने महत्याकाशे नित्यं सर्वदैव स्थितः
मत्संकल्पाधीनेनैवास्य स्थितिर्भवेत् यथा च सर्वत्रगः सदधीनेनैव सर्व
त्रचराचरभूतानां बाह्याभ्यंतरेषु गच्छति तथा सर्वाणि भूतानि तानि चे
तनाचेतनात्मकब्रह्मादिस्थावरांतानि मत्स्थानि मयि तिष्ठंतीति मत्स्थानि
निरालम्बे मदीयसंकल्पे सदा मयि स्थितिप्रवृत्तिकानि भूतानि मत्संकल्पेनै
व तिष्ठंतीत्यर्थः इत्येवं त्वमुपधारय जानीहि एवं वेदविदोप्याहुः मेघोदय
स्सागरसंनिवृत्तिरिंदोर्विभागस्फुरणानि वायोः विद्युद्विभंगो गतिरुष्णरश्मे
र्विष्णोर्विचित्राः प्रभवंति मायाः इत्यत्र मायाशब्दः संकल्पवाची सन्नतस्य एवन
वैन्द्रजालिकवन्मिथ्यात्वपरस्य सत्यसंकल्पविष्णुनैव सत्याधारणे सार्थैना
त् तथाश्रुतयोप्याहुः एतस्य प्रशासने गार्गि सूर्याचंद्रमसौ विधृतौ ति
ष्ठतः भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेंद्रश्च मृत्यु
र्धावति पंचम इत्यादयोऽप्यनुसंधेया इत्यर्थः ६

असंश्लिष्टयोरप्याधाराधेयभावं दृष्टांतेनाह

मधुसूदनीटीका ६

¹स्थिति

यथैवासंगस्वभावे आकाशे स्थितो नित्यं सर्वदा उत्पत्तिसंहारकालेषु वा
तीति वायुः सदाचलनस्वभावः अत एव सर्वत्र गच्छतीति सर्वत्रगः महा
न् परिमाणतः एतादृशोपि न कदाकाशेन सह संसृज्यते तथैवासंगस्वभा
वे मयि संश्लेषमंतरेणैव सर्वाणि भूतान्याकाशादीनि महांति सर्वत्रगाणि
च स्थितानि इत्युपधारय विमृश्यावधारय [illegible]
[illegible] ६

सदानन्दीटीका ॥

आधाराधेयभावं श्रीभगवानाह सर्वगः दृष्टांतेन प्रबोधार्थमसंश्लिष्ट
योरपि १ यथासंगस्वभावेपि व्योम्नि वायुः स्थितः सदा सदाचलस्वभावो
पि महांश्च परिमाणतः २ ईदृशोपि न वै व्योम्ना सह संसृज्यते कदा तथैवा
संगचिद्रूपस्वभावे मयि सर्वगो ३ संश्लेषमंतरेणैव सर्वगानि महांत्यपि
आकाशादीनि भूतानि स्थितानीत्यवधारय ४ गगनवत्समसंस्थं विश्व
तांवै मध्यस्तमीशो व्रजति विविधधर्मैर्भिन्नमस्मत्समस्तं किरणजलमसत्यं रज्जुस
र्पो यथास्याद्भगवति परमात्मन्यद्वितीये तथेदं ५ । ६

श्री
गी टी
न
26

नीलकंठीटीका १२

श्लोकद्वयोक्तेऽर्थे दृष्टांतमाह यथेति यथा लोके आकाशे स्थितो नित्यं
सदा वायुः सर्वत्रगः परिमाणतश्च महान् तथा सर्वाणि भूतानि सर्वग
तेमयि असंश्लेषेणावस्थितानीत्येवमुपधारयेति शेषः किं तद्ब्रह्मेति प्र
श्नोत्तरं सूक्तं अक्षरं परमं ब्रह्मेति अक्षरसंज्ञं शुद्धं त्वंपदार्थमेव निरुपा
धिकं ब्रह्मेत्युक्तं तच्च निरुपाधिकं ब्रह्म श्लोकद्वयेन व्याख्यातं इदानीं तस्या
तटस्थेन जीवेनाभेदं सदृष्टांतमाह यथेति वायुः सूत्रात्मा वायुर्वै गौतम
तत्सूत्रमिति श्रुतेः सर्वत्रग इति समष्टिलिंगतावात्मस्य सर्वगतत्वं महानिति
बाह्यवायुव्यावृत्त्यर्थं स यथा आकाशस्थितः अव्याकृताकाशे स्वकारणे
स्थितः नित्यमिति कालत्रयेऽपि तस्याकाशसंबंधउक्तः सर्वाणि भूतानि
उपाधिनिष्कृष्टत्वंपदार्थरूपी चेतनवर्गः बहुत्वं लोकाभिप्रायेण यथाका
र्यं सर्वं उत्पत्तेः प्राक्तनाशादूर्ध्वं मध्ये च स्वकारणेनैवाभेदेन तिष्ठति एवं सर्वो
ऽपि जीववर्गः उत्पत्तेः प्राक्तनाशादूर्ध्वं मध्ये वा घटाकाशो महाका
शादिव परस्माद्ब्रह्मणः कालत्रयेऽपि नातिरिच्यत इत्यर्थः एतेन जीवब्रह्मा
भेदकथनेन स्वभावोऽध्यात्ममुच्यत इति यदुक्तं ब्रह्मैव जीव इति तद्वि
वृतं ६

आनंदीटीका १२

अत्र सर्वत्र दृष्टांतमाह यथा वायुः सर्वत्रगः अत एव महान् व्यापको नित्यमाकाशस्थित एव भवति
परममहत्त्वपरिमाणे आकाश एव लीयते तत एव चोदेति तत्स्थित एव च प्रवर्त
ते न चाकाशाद्वायोर्निष्कृतिः तथा सर्वाणि भूतानि मत्त एव प्रथमसमुदितानि
प्रलये मय्येवावस्थितानि पुनः सर्गमध्ये मन्निमित्त एव प्रवर्तंते न बाह्ये तेषु भूतेषु अव
स्थित इति दृष्टांततात्पर्यं एतदेव निगमयति एवं सर्वेषु भूतेषु चराचरात्मन
भिलक्षितः भूतप्रकृतिमास्थाय सहैव च विनैव च सहैवेयंतर्यामितया
विनैवेति कैवल्येन इति वा आकाशदृष्टांतो दर्शित एव जीवात्मपक्षेऽपि सहै
वेति जागरावस्थायां विनैवेति सुषुप्त्यवस्थादिषु [illegible] ६

अत्र केनचित्सादृश्यांशेन दृ रामकंठीटीका १४
ष्टांतमाह एवमनेन प्रकारेण मय्यनवच्छिन्ने महति स्थितान्याधेयत्वमापन्नानि तत
देशगतानि सर्वाणि महांति च भूतान्युपधारय बुध्यस्व कथं यथाकाशे

निरवच्छेदयासौ नित्यं सदैव स्थितो वायुः कीदृशः सर्वत्रगस्तत्तत्प्रदे
शेगतः कृत्स्नव्याप्तिः महांश्चान्यापेक्षया व्यापकः एवं मत्स्थानि भूता
नि शून्यस्थायेदं तात्पर्यं यथा वायोः सर्वत्र सर्वगत महत्वादयो धर्मा अप
र्यन्ताकाशावकाशैकनिबन्धनास्तथा सर्वभूतानां सर्वे धर्मा मत्स्वभावा
नुप्रवेशैकनिबन्धना इति तदेतन्निगमयितुमाह एवं हि सर्वभूतेषु च
रामनभिलक्षितः भूतप्रकृतिमास्थाय सहैव च विनैव च एवमनेन
वाय्वाकाशसंबन्धोपमेन प्रकारेण सर्वभूतेषु चरामि तानि व्याप्नोमि अ
भूतैरभिलक्षितश्चेदं तया केनचिदप्यनवधारितस्वरूपः किं कृत्वा चरा
मि भूतप्रकृतिं प्राग्युक्तचेतनात्मकक्षेत्रलक्षणां प्रकृतिं स्वभावमास्था
य अधिष्ठाय कथं चरामि सहैव विनैव च नित्यमन्योन्यसंबन्धात्सहैव
घटादिकलक्षणस्वरूपभेदाद्विनैवासौ मध्यस्थ्यक्ष्ययैवाद्यो हि विदकस्वरूपो
मम स्वभावो मध्यम दिक्कोऽज्ञा विनेवेयस्वरूपे [illegible]
[illegible] ९

नन्वेवं चेत्तवात्मा नास्तिकी

[illegible]टीका १५ नभूतस्य: तर्हि कारणानुप्रवेशं विना कार्यस्थितेरभावात्

यथा सर्वत्रगतो महान्वायुर्नित्यमाकाशे आधारे स्थित आधेयत्व
मापन्नः तथा सर्वाणि भूतानि मत्स्थानि मयि परमात्मन्येवाधा
रे स्थितानि आधीयत्वं प्राप्तानीत्युपधारय प्रमाणेनावधारय अथ
वाय्वाकाशयोरविनाभाविमपि सम्बन्धेन जातचिन्नभः
स्पृशतीत्युच्यते एवं सकलसंसारविसार्यपि भगवन्तं न सर्वज
नविषयमिति [illegible]
[illegible] ९

यथा मृदनुप्रवेशं विना घटास्थि
तेरभावान्मत्स्थानि सर्वभूतानी
न्त्वकिं रूपपादेत्याशंका दृष्टां
तद्वरः सरसाधाराधेयभावेन
नकाप्यनुपपत्तिरितिनिगम
यति ॥

पंचोलीटीका

श्लोकद्वयेनोक्तमर्थं दृष्टान्तेनोपपादयन्नाह यथेति यथाऽअ
संगस्वभावे आकाशे महान्महत्परिमाणः सर्वत्रगो वायुः नि
त्यं सर्वदाकाशमसंस्पृशन् आकाशे स्थितस्तथा सर्वाणि भूता
नि मत्स्थानि मयि स्थितानि मां न स्पृशन्तीत्युपधारय जानीहि ६

भगवीरसमिद्धोधिनी॥

ननुभवदाश्रितानांकथंभवन्निर्वर्त्यनिर्वर्त्तनेशक्तिमत्त्वमि
त्याशंकामाकाशमरुद्दृष्टान्तेनापनोदितुमाह यथाकाश
स्थितइति सदाकाशेस्थितोवायुर्यथासर्वत्रविषयेप्रतिहत
गतित्वप्रकत्वादिधर्मवान्भवति तथैवमदाश्रयाणिसर्वा
णिभूतानिप्राणिनोमद्दत्तदिव्यशक्तिकत्वेनमन्निर्वर्त्यनि
र्वर्तयंतीत्युपधारयबुद्ध्यस्व अतोमदेकशरणेनत्वयाप्येत
द्भीष्मादिहननंस्वकर्मैवेतिभावः ६॥

मधुभाष्य

यथाकाशस्थितइति नह्याकाशस्थितोपिवाउःस्पर्शं
प्राप्नोति ज्ञानप्रदर्शनार्थंप्रलयादिप्रपंचयति ६॥

भाषा अनुवाद

अन मिल वस्तुभी आधार आधेय अर्थात् रहने की जगह औ रहने वाली वस्तु होसकै है यह दृष्टान्त देखाय कहते हैं कि आकाश के विना रहने का असम्भव है इस से आकाशमे स्थित जो वायु सो सर्वगत औ महान होके भी आकाशके साथ मिलने को कोई उपाय न रहनेसे जैसे आकाशके साथ नहीं मिलते है तैसे भूत मेरे मे रहते भी अलग जानो अर्थात् जैसे आधाररूप आकाशमे रहि कर वायु निर्लिप्त है तैसे भूतोंके रहते हुये भी आधार स्वरूप ब्रह्म निर्लिप्त है ६।

दोहा

जिमनभ नित्य स्थित रहैं वायुमहा सभगांहि तैसें जानहु सर्वथ
हृ भूतरहैं मोमांहि ६

सर्वभूतानिकौंतेय प्रकृतिंयान्तिमामिकां कल्पक्षये
पुनस्तानिकल्पादौविसृजाम्यहं ७

शांकरभाष्यं १

एवं वाय्वाकाश इव मयि स्थितानि सर्वभूतानि सर्वाणि भूतानि स्थितिकाले तानि सर्वभूतानि कौन्तेय प्रकृतिं त्रिगुणात्मिकामपरां निकृष्टां यान्ति मामिकां मदीयां कल्पक्षये प्रलये प्रलयकाले पुनर्भूयस्तानि भूतान्युत्पत्तिकाले कल्पादौ विसृजाम्युत्पादयाम्यहं पूर्ववत् ७

आनन्दगिरिकृतटीका २

आकाशेवाय्वादिस्थितिवदाकाशादीनि भूतानि स्थितिकाले परमेश्वरे स्थितानि चेत्तर्हि प्रलयकाले ततोमत्र तिष्ठेयुरित्याशंक्याह एवमिति प्रकृतिशब्दस्य स्वभाववचनत्वं व्यावर्तयति त्रिगुणात्मिकामिति सा चापरेयमिति प्रागेव सूचितेत्याह अपरामिति तस्याश्चेश्वराधीनत्वेन तात्स्थ्यमाहमदीयामिति प्रलयकाले भूतानि यथोक्तां प्रकृतिं यान्ति चेदुत्पत्तिकालेपि तत्तत्तेषामुत्पत्तिरीश्वराधीनत्वं भूतसृष्टेर्न स्यादित्याशंक्याह पुनरिति ७

स्वामिकृतटीका ३

तदेवमसंगस्यैवयोगमायया स्थिति हेतुत्वमुक्तं तथैव सृष्टि प्रलय हेतुत्वंचाह कल्पक्षये प्रलयकाले सर्वाणिभूतानि मदीयां प्रकृतिंयांति त्रिगुणात्मिकायां मायायां लीयंते पुनः कल्पादौ सृष्टिकाले तानि विशेषेणसृजामि ७

पैशाचभाष्यटीका ४

सर्वभूतानिकौन्तेय मामिकां प्रकृतिं प्रसवधर्मिणीं यांति गच्छंति तत्र लीयंत इत्यर्थः कल्पक्षये कल्पते सृज्यत इतिकल्पः महदादि प्रपंचस्तस्य क्षयः महाप्रलयस्तत्र पुनस्तानि भूतानि कल्पांतरादौ विसृजामि ७

रामानुजभाष्यटीका ५

तथा तत्संकल्पादेवसर्वेषांउत्पत्तिप्रलयावपीत्याह ॥

श्री
गी टी
न
२९

सर्वभूतानीति स्थावरजंगमात्मकानि सर्वाणि भूतानि मामिकां मदु
पाधिभूतां प्रकृतिं तमः शब्दवाच्यां नामरूपविभागानर्हां कल्पक्षये चतुर्यु
गावसानसमये मत्संकल्पाद्यान्ति तान्येव भूतानि कल्पादौ विसृजाम्यहं
यथाहमग्रे आसीदिदं तमोभूतं सोभिध्याय शरीरात् स्वादिति श्रुति
रपि अव्यक्तमक्षरे लीयते अक्षरं तमसि लीयते तमः परे देवे एकीभवति
तम आसीत्तमसा गूढमग्रे प्रकेतमिति च ७

अभिनवगुप्तकृतटीका ९ महतिमिव यान्त्युपामु

सत्यार्थं ७ ॥

परमार्थप्रपाटीका ७

तदेवमसंगत्वेपि जगत्कारणत्वं जगतश्च मिथ्यात्वमुक्त्वा इतं नश्वरत्वं च
मायया कृतत्वाद्भवतीत्याह सर्वभूतानीति द्वाभ्यां हे कौन्तेय कल्पक्ष
ये प्रलये सर्वभूतानि मामिकां मत्संबन्धिनीं प्रकृतिं यान्ति तथा कल्पा
ग्रा४ दौ पुनस्तानि विसृजामि कुतः प्रकृतेर्वशात् प्राचीनकर्मनिमित्तस्वभाव
बलात् अवश्यमनिवार्यं ७

वनमालीटीका ८

असंगतया सर्वजगत्कारकत्वेनाद्भुतमैश्वर्यमुक्त्वा विश्वलयोदयादिकर्तृत्वेना
पि तदाह सर्वभूतानीति सर्वाणि भूतानि कल्पक्षये प्रलयकाले त्रिगुणात्मि
कां प्रकृतिं जगदुपादानभूतां यान्ति तत्र कारणे सूक्ष्मरूपेण लीयन्ते स्थूलाव
स्थां विहाय सूक्ष्मरूपेण तिष्ठन्तीत्यर्थः ननु प्रकृतावेव भूतानां लये न तव कोपयो
गस्तत्राह मामिकां मदधीनां यत्र प्रकृतौ भूतानि लीयन्ते सा मदधीना मयि
लीना चातः सूक्ष्मरूपेण प्रकृतिस्वरूपेण तानि मय्येव लीनानीत्यर्थः प्रकृति
र्मया व्याप्ता तादृक्ताव्यक्तस्वरूपिणी पुरुषश्चाप्युभावेतौ लीयन्ते परमात्मनी
ति वैष्णवोक्तेः यद्वा सर्वज्ञो चिन्त्यानन्ताद्भुतशक्तिः पुनस्तानि सर्वाणि भूतानि
प्रकृतिरूपेण मय्येव स्वस्मिन् संस्थापितानि हे हतः प्रातः पाण्डवाणि तिव
कल्पादौ विशेषेण सृजामि प्रकटीकरोमि ७

कुसुमवैजयन्तीटीका ९

सर्वेषां भूतानां स्थितिप्रवृत्तिर्मत्संकल्पादेव भवतीत्युक्त्वा इदानीं तेषामुत्प

नियम्यावरणमसंकल्पादेवेत्याह द्वाभ्यां सर्वभूतानीति हे कौंतेय
कुंतीपुत्र कल्पक्षये ब्रह्मणो दिनांते सर्वभूतानि चराचरात्मकानि मामि
कां मच्छक्तिरूपां प्रकृतिं तमःशब्दाभिधेयां प्रलयात्मसि लीयंते तमः
परे देव एकीभवतीति श्रुतेः मत्संकल्पादेव यांति प्राप्नुवंति प्रकृतिशक्ति
केनैव विलीयंते इत्यर्थः पुनः कल्पादौ ब्रह्मदिनारंभे तान्येव वैविध्यानि भू
तानि विचित्रानंतशक्तिमानहमेव विसृजामि एकोऽहं बहुस्यां प्रजायेय ना
मरूपे व्याकरवाणीत्यादिश्रुतिसिद्धेन संकल्पेनाहमेव सृष्टिं करोमीत्यर्थः ७

मधुसूदनीटीका ९

एवमुत्पत्तिकाले स्थितिकाले च कल्पितेन प्रपंचेनासंगस्यात्मनोऽसंश्लेषमुक्त्वा प्रलयेपि
तमाह॥ सर्वाणि भूतानि कल्पक्षये प्रलयकाले मामिकां मच्छक्तित्वेन कल्पितां प्र
कृतिं त्रिगुणात्मिकां मायां स्वकारणभूतां यांति तत्रैव सूक्ष्मरूपेण लीयंत
इत्यर्थः हे कौंतेय तस्मात्कार्यं पुनस्तानि कल्पादौ सर्गकाले विसृजामि प्रकृ
तावविभागापन्नानि विभागेन व्यनज्मि अहं सर्वज्ञः सर्वशक्तिरीश्वरः किं
निमित्ता परमेश्वरस्येयं सृष्टिर्न तावत् स्वभोगार्था तस्य सर्वसाक्षिभूतचेत
न्यमात्रस्य भोक्तृत्वाभावात् तथा चैवासंसारित्वेनेश्वरत्वव्याघातात् नाप्यन्यो
भोक्तास्यदर्थेयं सृष्टिः चेतनांतराभावात् ईश्वरस्यैव सर्वत्र जीवरूपेण स्थि
तत्वात् अचेतनस्य [illegible] भोक्तृत्वात् अत एव नापवर्गार्था
पि सृष्टिः बंधाभावादपवर्गविरोधित्वाच्चेत्याद्यनुपपत्तिः सृष्टेर्मायामय
त्वे साधयंती नास्माकं प्रतिकूलेति न परिहर्तव्या मिथ्यैव मायामयत्वात्
मिथ्यात्वं प्रपंचस्य वक्तुमारभते त्रिभिः ७

सदानंदीटीका ९

एवं सृष्टौ स्थितौ संगाभावमुक्त्वा विलेजडैः असंगत्वमथेदानीं प्रलये प्याह
चात्मनः १ लये सर्वाणि भूतानि मच्छक्तित्वेन कल्पितां प्रकृतिं यांति मायायां
त्वोली यंते तत्रैव यतः २ सर्गकाले विभागेन पुनस्तानि व्यनज्म्यहं सर्व
ज्ञः सर्वशक्तिस्त्वविभागं गतानामपि ३ । ७

नीलकंठीटीका ९

नन्वेवं उपाधिरहितस्यैव ब्रह्मणो लयविक्षेपादिपायेः का गतिरित्याशंक्याह
सर्वेति सर्वाणि भूतानि स्थावरजंगमशरीराणि मामिकां मम मायाविनः
प्रकृतिं त्रिगुणात्मिकां अपरां स्वलभूम्याद्यात्मिकां यांति प्रविशंति कदा

श्री गी टी न

यांतिकल्पक्षये पुनस्तान्येवभूतानिप्रकृतौसूक्ष्माविवसंस्कारात्मना

स्थितानिपक्वतांगतानिकल्पादौविसृजामिविविधरूपेणासृजाम्यहं

कारणात्मामायावी १

आनंदीटीका १३ ॥ तदेवप्रतिपादयति ॥

विविधंसर्गमेवाह १

मदिच्छोद्भावितत्वमेषांप्रतिपा रामकंठीटीका १४

दयितुमाह ॥ — एतानिचेतनाचेतनानिसर्वभूतानिमहाकल्पावसानेमदीयांप्रकृतिंस्वभा

वंयांतिमदिच्छयैवमयिप्रलीयंतइत्यर्थः तानिचकल्पादौकल्पान्तरांभेरह

मेवविसृजामिचतुर्दशविधभेदेनेवाऽवभासयामि ततयान्येवप्रलीना

नितान्येवपुनःसृजामीत्यत्रार्थः ईश्वरेच्छायाअपर्यनुयोज्यत्वात्तंऽपिच

तुर्दशविधमेवभूतसर्गंप्रलयोत्पादःवस्थयोःसंहरतिसृजतिचपरमेश्वरइ

तितात्पर्यं [illegible] १

एवमुत्पत्तिकालेस्थितिकालेच व्यासकृतटीका १५ भूतेषु स्वात्मनोसंसंगमुक्त्वाप्र

लयेपितमाह ॥ — हेकौंतेय सर्वाणिचराचराणिभूतानिजीवाःकल्पक्षयेप्रलयकालेमाम

कीमदीयामेश्वरींसाधारणांत्रिगुणात्मिकांप्रकृतिमव्यक्तरूपांयान्ति तत्रै

वलीयन्तेइत्यर्थः तत्रसामान्यांभूतप्रकृतिंप्राप्तिभूर्च्छादिरूपात् पुनर्भूयः लि

कल्पादौसृष्टिकालेतानिप्रकृतावविभागापन्नानिभूतानिविसृजामिविभा नि

गेनव्यनज्मि अहंसर्वज्ञःसर्वशक्तिरीश्वरः[illegible]

१

पंचोलीटीका

तदेवमसंगस्यैवयथायोगमाययास्थितिहेतुत्वमुक्तंतथैवसृष्टि

प्रलयहेतुत्वमपीत्याह सर्वभूतानीति हेकौंतेयकल्पक्षयेसर्व

भूतानिब्रह्मादिस्थावरांतानिमामकींमदीयांत्रिगुणात्मिकां अप

रांप्रकृतिंयांतिकल्पादौपुनस्तानिअहंविसृजामिविशेषेणासृजा

मीति १

रणवीरसमिद्धोधिनी॥

अथात्मेश्वर्यंप्रकटयितुमाह सर्वभूतानीति कल्पक्षयेप्रलयकालेम

वोक्तानि भूतानि चतुर्दशविधानि मामकीं प्रकृतिं मत्सायुज्यं यांति अ
हंतानि च चतुर्दशविधेनैव भेदेन कल्पादौ कल्पारंभे पुनः कल्पाद्या
मि अतः पर्यंते सर्वैरेतैर्मध्येव प्रलीयते ततश्चावश्यंभावित्यर्थे मा॰
त्वं विमुक्तो भूरिति भावः अथच सर्वभूतानि सर्वपामिज्ञादौ भूता
नि समवर्त्तीनि उक्तलक्षणसायुज्ययोगारूढानीतियावत् मामकीं
मत्संबंधिनी प्रकृतिं स्वभावं यांति कदा कल्पक्षये अथ प्रेमान्याय
कल्पात्सृदेपारूपं समंजसमिति कोर्थः कल्पस्य पुरुकव्यवहारस्य
क्षयेहानौ सत्यां अतएवाहं तानि दृष्टान्त्येव कल्पादौ आदानमादि॰
ग्रहणं उपसर्गयोः किरिति किप्रत्ययः कल्पस्य पुरुहरवनाक्रम
स्यादावादानार्थं यद्वा कल्पस्य पुरुकल्पस्यादावारंभे विसृजामि
मि विनियुंजे इत्यर्थः यद्वा कल्पस्य कल्पविधिक्रमावितिकोर्थात्
विधेर्वैरवोदितस्य धर्मस्येतियावत् अथव कल्पस्य पुरुकव्यवहार
स्य क्षयेहानौ सत्यां सर्वभूतानि सर्वेषु समदर्शीनि सायुज्ययोगारू
ढाः तद्विषयप्रवणाः इतियावत् मामकीं मदीयां प्रकृतिं प्रकर्षेणाव
र्णाश्रमविभागानतिक्रमरूपेण क्रियते इति प्रकृतिः कर्मक्रि॰
किन् मया कर्तव्यं विधिवयादिकं यांति निष्पादयंति अथचैवल
क्षणं मत्स्वभावं यांति प्राप्नुवंति कल्पादौ पुनः उक्तलक्षणकल्प
स्यादौ जनैः कृते स्वीकारे सति प्राप्तधर्मस्थितौ सत्यामितियावत्
अहं तानि भूतानि विसृजामि त्यागेन विहाय तेदानमुत्सर्जनविस
र्जने इति कोर्थात्यजामि अयमत्र भावः धर्मक्षानौ सत्यां भवाद्ध
पोष्टस्वतेजोंशं समर्प्य तैरेव करणभूतैः प्रापस्तस्थापितायां म
र्यादायां स्वतेजोंशं तेभ्यः प्रत्याहरामीति ७॥

मधुभाष्य

सर्वभूतानीत्यादिना प्रकृत्यवष्टंभक्लप्तयथाकश्चित्समर्थोपि॰
पादेन गंतुलीलयामवष्टभ्य गच्छति सर्वभूतगणोपियुक्तं नैवतं

ज्ञात्वमर्दसीतिमोक्षधर्मे सर्वभूतगुहाशयंदेवमाशात्वमर्द
सीतिच विदित्वासमसूक्ष्मात्मिष्वङ्गंचमहेश्वरं प्रधानविनि
योगस्थ: परंब्रह्माधिगच्छतिश्रुतिच नकश्चविद्धत्किरनंतरू
पाविदन्यनेतस्यमहेश्वरस्य तथापिमायामधिरुह्यदेवः प्र
वर्ततेसृष्टिविलापनेष्विति स्वेन्द्रविलेषु मध्यनंतगुणनंते
गुणतोनंतविग्रहइति भागवते अथकस्माडुच्यतेपरंब्रह्म
इदंतिहृदयतिचाथाथर्वणे पराम्यशक्तिर्विविधेवश्रूयतइ
तिच विलोर्दकेविषात्मिप्रकृतेवंधः पार्थिवानिविममेरजांसि
नतेविस्रोजायमानोनजातोदेवमहित्वः परमंतमापेत्यादेश्च
प्रकृतेर्वंशादवशंत्वमेवैतन्सजेते सर्वकर्माण्यनंतशक्तोपि
स्वमाययैव मायावशंचावशंलोकमेतनतस्मात्स्वस्यस्यास्ति
पासीराविस्मावितिगोजनस्विलेषु उदासीनवन्नतूदासीनः
तदर्थमाह असक्तमिति अवाक्यनावदइतिश्रुतिः इत्यंकर्म
वकालस्वस्वभावोजीवपवच यदनुग्रहतःसंतिनसंतियदुपे
क्षये इतिभागवते यस्यात्सर्वैवसर्वकर्मशक्तिः कृतस्तस्य
सर्वकर्मबंधइतिभावः नकर्मणावर्द्धतेनोकनीयानितिहि
श्रुतिः यःकर्मापिनियमयतिकथंचततंबध्नाति उदासीन
वदितिचेत्स्वयमेवप्रकृतिःसूयतइत्यनंतराह ७॥

भाषा अनुवाद

इस से असङ्गरूप ईश्वर की योग मायासे चराचर की स्थिति ईश्वर मे कही गई अब सोई योग मायासे सृष्टि औ पालन के भी हेतु ई श्वरैहैं यह कहते हैं कि प्रलय के समय मे सकल भूत सत्व रज तम गुण मयी मेरी प्रकृति मे लीन होते फेरि सृष्टिके समय मे स्थूल सूक्ष्म नानारूप भूतोंको मे सिर्जन करता हूं हे कौन्तेय अर्जु न ७ ।

दोहा

भूतसभीयहप्रकृतिमहतममममायामेजाय कल्पक्षये मे फेरतिन
कल्पआदरचौं भाय ७॥

31

प्रकृतिंस्वामवष्टभ्य विसृजामिपुनःपुनः भूतग्राममि
दंकृत्स्न मवशंप्रकृतेर्वशात् ८

शाङ्करभाष्यं १

एवमविद्यालक्षणां प्रकृतिमिति प्रकृतिं स्वां स्वीयामवष्टभ्य वशीकृत्य विसृजामि पुनः पुनः प्रकृतितोजातं भूतग्रामं भूतसमुदायं इमं वर्तमानं कृत्स्नं समग्रमवशमस्वतन्त्रमविद्यादिदोषैः परवशीकृतं प्रकृतेर्वशात् स्वभाववशात् ८

आनन्दगिरिकृतटीका २

तर्हिंकीदृशी प्रकृतिः सा च कथं स्रष्टारमुपष्टम्भेत्याशंक्याह एवमिति संसारस्यानादित्वद्योतनार्थं पुनः पुनरित्युक्तं भूतसमुदायस्याविद्यास्मितादिदोषपरवशत्वे हेतुमाह स्वभाववशादिति ८

स्वामिकृतटीका ३

नन्वसंगोनिर्विकारश्चत्वंकथंसृजसीति अपेक्षायामाह प्रकृतिमिति स्वीयांस्वाधीनां प्रकृतिमवष्टभ्य अधिष्ठाय प्रलये लीनंसन्तं चतुर्विधं इमं सर्वभूतग्रामं कर्मादिपरवशं पुनःपुनः विविधंसृजामि' कथं प्रकृतेर्वशात् प्राचीनकर्मणो निमित्तात्स्वभावबलात् ८ 'विशेषेण सृजामीति वा

पैशाचभाष्यटीका ४

प्रकृतिंस्वामवष्टभ्य आश्रित्य विसृजामि पुनःपुनः भूयो भूयो अवशं परवशं प्रकृतेर्वशात्स्याथात्म्यात् ८

रामानुजभाष्यटीका ५

प्रकृतिमिति स्वकीयां विचित्रपरिणामिनीं प्रकृतिमवष्टभ्य अष्टधापरिणमय्य इमं चतुर्विधं देवतिर्यङ्मनुष्यस्थावरात्मकं भूतग्रामं मदीयायाः मोहिन्याः गुणमय्याः प्रकृतेर्वशात् अवशंकाले काले पुनर्विसृजामि [illegible] ८

अभिनवगुप्तकृतटीका ६

स्वांप्रकृतिमवष्टभ्येति एतावता जडोपि स्वतोयं भावग्रामः [illegible] परप्रकृत्यनुयात् प्रकाप्तां प्राप्तः

श्री
गी टी
न

[illegible] ८

परमार्थप्रपाटीका ७

नन्वेवं नानाविधानि कर्माणि कुर्वतस्तवापि जीववद्बन्धः कथं नस्या
दित्याह नचेति । तानि सृष्ट्यादीनि कर्माणि मां न बध्नन्ति कर्मासक्ति
र्हि बंधहेतुः अवाप्तसकलकामत्वात् मम नास्ति किंभूतं मां उदासीन
नु वदासीनं वर्तमानं नंउदासीनत्वे कर्तृत्वानुपपत्तेः कर्तृत्वेच उदासीन
त्वानुपपत्ते रतउदासीनवदित्युक्तं ८

वनमालीटीका ८

स्वस्य कर्तृत्वरूपं प्रधानकारणत्वं प्रकृतेर्जीवादृष्टकालादेर्निमित्तमात्र
त्वमित्याशयेनाह प्रकृतिमिति स्वां मायां विचित्रपरिणामिनीं प्रकृतिम
वष्टभ्य अधिष्ठाय परिणामयन्निमं स्वेदजोद्भिदंडजजरायुजादिभेदेन चतुर्विधं
भूतसमूहं मदधीनायाः प्रकृतेः कार्यत्वात्प्रकृतिपदवाच्यायाः कर्मरूपावि
द्याया वशादवशं पुनःपुनः सृष्टिकाले समागते स्वतो ऽहं विशेषेण सृजा
मि ८

कृष्णवैजयन्तीटीका ९

किं प्रकृतिमिति स्वामात्मीयामपराख्यां प्रकृतिं त्रिगुणमयीमवष्टभ्याधि
ष्ठाय स्वसंकल्पमात्रेणैव भूम्याद्यात्मनाष्टधा विभक्तेत्यर्थः इमं नामरूपवि
भागेन प्रमत्वं कृत्स्नं समग्रं भूतग्रामं चराचरात्मकं चतुर्विधं भूतसमूहं पु
नःपुनः काले काले विसृजामि विशेषेण देवतिर्यगाद्यसमानाकारेणा
हं परमेश्वरः सृजामि न तु भूतग्रामः स्वयमेव कृतो नो मयैव इत्यपेक्षाया
माह अवशमिति मायाशब्दवाच्याया त्रिगुणमय्या मदीयायाः प्रकृतेर्व
शात्प्रभावादवशमस्वतंत्रमित्यनेन स्वभावतो ऽप्यस्य समस्तदोषस्याविद्या
स्व वंतःशक्तिकस्य संकल्पेन ततः सृष्ट्यादि कर्म कुर्वतो ऽपि मम न तत्र स्वाम्य
त्वं येनापि परिश्रमलेशश्च भवतीत्युचितम् ८

मधुसूदनीटीका ९

प्रकृतिं मायाख्यामनिर्वचनीयां स्वां स्वस्मिन् कल्पितां अवष्टभ्य स्वसत्तास्फू

स्विमां स्वीकृत्य तस्याः प्रकृतेर्मायाया वशाद् अविद्यास्मितारागद्वेषाभिनि
वेशाकारेणावरणविक्षेपात्मकशक्तिप्रभावाज्जायमानमिमं सर्वं प्रमा
णसन्निधापितं भूतग्राममाकाशादिभूतसमुदायमहं मायावीव पुनः
पुनर्विसृजामि विविधं सृजामि कल्पनामात्रेण स्वप्नदृगिव स्वप्नप्रपंचं
८

सदानन्दीटीका ११

किंनिमित्तेश्वरस्येयं सृष्टिर्नो भोगसिद्धये नास्ति चिन्मात्ररूपत्वाद् भोक्तृत्वं
नास्ति तस्यैव १ अत एव न मोक्तार्थो वृथाभावनयेशितुः न चाप्यमो
क्तिभोक्तृत्वं तदस्यास्ति चेतनं २ जीवरूपेण तस्यैवमसर्वत्र स्थितभाव
तः प्रचितो नास्ति भोक्तृत्वमित्याद्युपपत्तितः ३ सृष्टेर्मायामयत्वं येस्मा
द्येतैत्र वादिनः प्रातिकूल्यान्न चास्माकं निराकार्यानतेकिल ४ इत्य
भिप्रेत्य मिथ्यात्वं जगतो मायिकस्य च वक्तुमारभते श्रीशास्त्रिभिः स्लोकैः
सदाग्रगीः ५ प्रकृतिं स्वामनिर्वाच्यां मायां स्वाश्रितकल्पितां स्वसत्तास्फु
र्तिदानेन स्वीकृत्याहमीश्वरः ६ मायायाः प्रकृतेस्तस्याः प्रभावाद्दावि
लं जगत् स्वाविद्यादिपराधीनं प्रमाणैः सन्निधापितं ७ भूतभौतिकसं
घं च मायावीव पुनः पुनः विविधं स्वप्नदृग्वत्तु संकल्पेन सृजाम्यहं ८ ग
गनपवनतेजोवारिमह्यो विवर्ता भगवत इति सिद्धं सर्ववेदान्तजाले नहि
तरणमपि विश्लोभित्रसमो लभेत विधिशतमपि न ह्येवविश्लो विभिन्नं ९।८

नीलकंठीटीका १२

एतदेवाह प्रकृतिमिति एवमविद्यालक्षणां स्वां प्रकृतिं अवष्टभ्य आ
श्रित्य तां विना केवलस्य स्रष्टृत्वासंभवात् इमं भूतग्रामं पुनः पुनर्विविधं सृ
जामि किंभूतं प्रकृतेर्वशात् स्वभाववशात् अवशं रागद्वेषाद्यधीनं ८

आनंदीटीका १३

अहं परमेश्वरः इमं दृश्यमानं कृत्स्नं सचराचरं भूतानां ग्रामं समूहं चतुर्दश
विधं प्रकृतेर्वशादवशं प्रकृतेः सात्विकाराजस्यास्तामस्या वा परतंत्रं स्वां प्र
कृतिं यस्यास्वकीया प्रकृतिस्तामवष्टभ्य पुनः पुनरहं विसृजामि निजानि
जकर्माशयानुरूपेणैव विविधेन संयोजयामीत्यर्थः तापसायनयो विप्राये
व वैमानिकागणाः नक्षत्राणि च दैत्याश्च प्रथमा सात्विकी गतिः यज्ञान

श्री
गी टी
न

33

ऋषयो देवा वेदा ज्योतींषि वत्सराः पितरश्चैव साध्याश्च द्वितीया सात्त्विकी
गतिः ब्रह्मा विश्वसृजो धर्मो महानव्यक्तमेव च उत्तमां सात्त्विकीमेतां गति
माहुर्मनीषिणः अत्र सत्कार्यकर्तो धीरः आरम्भी विषयी च यः स राजसो मनुष्ये
षु पुनर्जन्माधिगच्छति मनुः झल्ला मल्ला नटाश्चैव पुरुषाश्च कुवृत्तयः
द्यूतपानप्रसक्ताश्च प्रथमा राजसी गतिः राजानः क्षत्रियाश्चैव राज्ञां चैव पु
रोहिताः वादयुद्धप्रधानाश्च द्वितीया राजसी गतिः गंधर्वा गुह्यकाश्चैव वि
विधाश्चराश्च ये तथैवाप्सरसः सर्वा राजसेषूत्तमा गतिः अथ तामसल
क्षणमाह निद्रालुः क्रूरकृल्लुब्धो नास्तिको याचकस्तथा प्रमादवान् भिन्न २
वृत्तो भवेत्तिर्यक्षु तामसः निद्रालुः निद्राशीलः क्रूरकृत् परद्रोहकारी लुब्ध
कः नास्तिको प्रसिद्धो याचकः सततं द्रव्यभिक्षणशीलः प्रमादः कार्यानादरः
भिन्नवृत्तो दुराचारः स तामसः स तिर्यक्षु जायते मनुः स्थावराः कृमिकी
टाश्च मत्स्याः सर्पाः सरीसृपाः पशवश्च सृगालाश्च जघन्या तामसी गतिः
हस्तिनश्च तुरंगाश्च शूद्रा म्लेच्छाश्च गर्हिताः सिंहा व्याघ्रा वराहाश्च मध्यमा
तामसी गतिः अत्र च कर्मनानात्वेन फलनानात्वं [illegible]
[illegible] ८

रामकंठीटीका १८

एतदेव निगमयति स्वां प्रकृतिं निजस्वभावं नाम किं विकारेणान्तरमवष्टभ्यावलम्ब्येदं सर्वं भू
तग्रामं प्राणिसमूहं पुनः पुनर्भूयो नादिबंधप्रवृत्तकल्पादिकालकल्पन
या सृजाम्येवं भूतग्रामस्यापि प्रकृतेर्वशात्स्वभावपारतंत्र्यादेवाऽवशांत्स भै म
तंत्रं कल्पान्ते च तथैव संहरामीत्यनुवर्तनीयं [illegible] ८

कथं विसृजसीत्यपेक्षायामा लासिकी [illegible]टीका १५

ह॥ स्वां प्रकृतिं निजमैश्वर्यं स्वभावं वेद्योल्लासकं नाम किं विकारेणान्तरमवष्ट
भ्यपरामर्शेनावलम्ब्येमं सर्वप्रमाणप्रमितिप्रमेयकृत्स्नं च तत्तद्दशाविधं भू
तसमूहं विसृजामि गुणवैषम्यविमर्दादिहेतुना विविधैः स्थूलदेहैः संयो
जयामीत्यर्थः स्वस्याः स्वस्या उल्लासनायाः प्रकृतेर्वशात् स्वतात्पर्येका
नुरोधेन विविधं सृजामि कथं पुनः पुनरनादिप्रवृत्तकल्पादिकालकल्पन
याऽवश्यो यः कीदृशमवशमविद्यादिदोषैः परवशीकृतम् स्वस्वभाव
मपि स्वाये सृजामीत्यनेन स्वरूपे कर्मणोऽपि मत्येन मम स्वरूपविस्मर

३३

णामित्यमेवकर्मणोभावमितिसूचितम् [illegible]
कर्माणि [illegible]
[illegible] ८

पंचोलीटीका

ननु असंगस्य निर्विकारिणस्तव कथं सृष्ट्यादिहेतुत्वमित्यपेक्षायामाह प्रकृतिमिति इमं कृत्स्नं भूतग्रामं भूतसमुदायं प्रकृतेर्वशात् अवशं अस्वतंत्रं अविद्यालक्षणां त्रिगुणात्मिकां स्वां प्रकृतिमवष्टभ्याश्रित्य पुनः पुनः विसृजामि उत्पादयामि ८

रणवीरसमिद्बोधिनी॥

एतच्चानवरतं मम कर्तव्यमित्याह प्रकृतिमिति स्वां प्रकृतिं त्वच्छमर्पितं स्वकीयं तेजोंशमवष्टभ्य प्रत्याहृत्य इमं कृत्स्नं भूतग्रामं पुनः पुनर्विसृजामि पुनस्स्वीकरोमीति शेषः कीदृशं प्रकृतेर्वशान्मत्स्वभावस्य पारतंत्र्याद्वशमस्वतंत्रं अथ पूर्वपद्यस्यादिव्याख्या कल्पानुसारेणास्य मर्थसंघटना स्वां प्रकृतिं निजस्वभावमवष्टभ्य अंतर्भावितण्यर्थतया लंबयित्वा इदं प्रत्यक्षतउपलभ्यमानं कृत्स्नं भूतग्रामं पुरा विकृतं साम्ययोगारूढं तत्त्रियसमूढं पुनः पुनर्विसृजामि विनियुंजे दुष्टदमनपूर्वधर्मसंस्थापने इति शेषः कीदृशं प्रकृतेर्मत्स्वभावस्य वशादायत्तत्वादवशमस्वतंत्रं ८॥

मधुभाष

भाषा अनुवाद

जो कहो कि तुम असङ्ग निर्विकार सो कैसे सृष्टि करते हो इस अ पेक्षापर कहतेहैं कि मै अपने आधीन प्रकृति को अंगीकार करि प्राचीन कर्म्मों के स्वभाव वश पराधीन कर्म्म के वश भूत सक लकों फेरि नानारूप सिर्जन करता रहताहूं ८ ।

दोहा

मै प्रकृति निज आश्रय कर विरचित वार हिं वार भूतनिकर इह
सर्व को अवश प्रकृति के द्वार ८

35

नचमांतानिकर्म्माणि निबध्नन्तिधनञ्जय उदासीनव
दासीन मसक्तंतेषुकर्म्मसु ९

शाङ्करभाष्य १

तर्हितस्यैव परमेश्वरस्य भूतग्रामं विषमं विदधतः तन्निमित्ताभ्यां धर्म्मा
धर्म्माभ्यां सम्बन्धः स्यादितीदमाह भगवान् न च मामिति न च मा
मीशं तानि भूतग्रामस्य विषम विसर्गनिमित्तानि कर्म्माणि निबध्न
न्ति धनञ्जय तत्र कर्म्मणामसम्बद्धत्वे कारणमाह उदासीनवदासी
नं यथोदासीन उपेक्षकः कश्चित् तद्वदासीन मात्मनोऽविक्रियत्वमस
क्तं फलसङ्गरहितमभिमानवर्जित महं करोमीति तेषु कर्म्मसु अतोऽ
न्यस्यापि कर्तृत्वाभिमानाभावः फलसंगाभावश्चाबन्धकारणमन्यथा
कर्म्मभिर्बध्यते मूढः कोशकारवदित्यभिप्रायः ९

आनन्दगिरिकृतटीका २

यदि प्राकृतं भूतग्रामं स्वभावाद्विद्यातत्त्वं विषमं विदधासि तर्हि
तव विषमसृष्टिप्रयुक्तं धर्म्मादिमत्त्वमित्यनीश्वरत्वापत्तिरिति शंकते
तर्हीति तत्रेति सप्तम्या परमेश्वरो निरुच्यते ईश्वरस्य फलसंगाभावा
त् कर्तृत्वाभिमानाभावाच्च कर्म्मासम्बन्धवदीश्वरादन्यस्यापि तदुभया
भावो धर्म्माद्यसम्बन्धे कारणमित्याह अतोऽन्यस्येति यदि कर्म्मसु कर्तृ
त्वाभिमानो वा कस्यचित् कर्म्मफलसंगो वा स्यात्तत्राह अन्यथेति ९ यो

स्वामिकृतटीका ३

नन्वेवं नानाविधानि कर्म्माणि कुर्वतस्तव जीववद्बंधः कथं न स्यादित्य
त आह न चेत्यादीति कर्म्माणि मां न निबध्नंति कर्म्मासक्तिर्हि बंधहे
तुः सा चाप्तकामत्वात् मम नास्ति अत उदासीनवद्वर्तमानस्य मे बंधं नोत्पा प
दयंति उदासीनत्वे कर्तृत्वानुपपत्तेः कर्तृत्वे चोदासीनत्वानुपपत्तेः उदा
सीनवत् स्थितमित्युक्तं ९

पैशाचभाष्यटीका ४

किं चास्य नचमांतानिकर्म्माणि बध्नंति नेति प्रकृतेन संबंधः धनं

श्री गी टी न

न्यथ जगदुत्पत्तिस्थापन संहारकर्माणि बंधहेतवो भवंतीत्यर्थः कुत
इत्यत्राह उदासीनः उपेक्षकस्तद्वदासीनमपक्षपातेन आसीनं मम
कर्मफलसंगरहितं तेषु सृष्टि स्थिति संहारेषु कर्मसु अतोऽव गम्यते
फला संगरहित कर्माणि नानि बध्नंतीति ९

एवं तर्हि विषमसृष्ट्यादी रामानुजभाष्यटीका ५ निकर्माणि नैर्घृण्यापादनेन

भगवंतं बध्नंतीत्याह ॥ न च मामिति विषम सृष्ट्यादि कर्माणि मां न निबध्नंति मयि नैर्घृ
ण्यादिकं नापादयंति यतः क्षेत्रज्ञानां पूर्वकृतान्येव कर्माणि देवादि
भावहेतवः अहं तु तत्र वैषम्ये असक्तत्वादुदासीनवदासीनः यथाह
सूत्रकारः वैषम्य नैर्घृण्ये न सापेक्षत्वात् नकर्मा विभागादितीति चे
त् न अनादित्वात् इति ९

अभिनवगुप्तकृतटीका ९

[illegible]
न च मेऽस्ति कर्मबन्धः वर्तमानोऽहमौदासीन्येन यतः अत एवाहं जग
न्निर्माणेनाश्रित व्यापारत्वाद्धेतुः ९

परमार्थप्रपाटीका १

अथ तदेवोपपादयति मयेति ५ मयाध्यक्षेणाधिष्ठात्रा कृत्वा प्रकृतिः
सचराचरं विश्वं सूयते जनयति अनेनैव मदधिष्ठानरूपेण हेतुना नि
मित्तभूतेन इदं जगद्धि परिवर्तते पुनः पुनर्जायते सन्निधि मात्रेणाधिष्ठा
तृत्वं कर्तृत्वमुदासीनत्वं चाविरुद्धमितिभावः अयेतदुक्तं भवति सत्ता
अयव्यतिरेकेण सत्ता वस्थानमेव नोपपद्यते शुक्तिकया विना रजतस्ये
व एवं सति रजतोत्पत्ति स्थिति विनाशान् शुक्तिर्न स्पृशति न तद्वत् प्रकृते
पि इत्यर्थः ॥ ९

वनमालीटीका ८

ननु विषमसृष्टिकर्तृत्वेन वैषम्य नैर्घृण्यादिकं भवतः स्यादित्यत्राह न च तानि
ना विषमसृष्ट्यादिकर्माणि मामचिंत्यानंतशक्तिं न निबध्नंति न मय्यवैष
म्यादिकमापादयंति प्रवाहानादिजीवादृष्टानुसारेण विषमसृष्टिकर्तृत्वा

३८

ममम वैषम्यादीतिभावः वैषम्यनैर्घृण्ये न सापेक्षत्वादिति सूत्रात् नचक
र्माधीनत्वं हरेः शंक्यं स एव साधु कर्म कारयतीत्यादिश्रुत्या कर्मणामपित
दधीनत्वोक्तेः नच विषमकर्मकारयितृत्वेन वैषम्याद्यापत्तिः ईश्वरस्य कर्मा
पेक्षयोत्तरोत्तरकर्मकारयितृत्वेन दोषाभावात् न कर्माविभागादिति चेन्न
अनादित्वादिति सूत्रात् ननु विषमकर्मापि तेनैव कारितमतः कर्मणो वि
भागो वैषम्यावारकत्वानुपपन्नं हरेः कर्तृत्वमिति चेन्न कर्मणां प्रवाहानादि
त्वात् ईश्वरः कर्मापेक्षयोत्तरकर्म कारयतीत्यर्थः जीवस्याप्यात्मनो निर्लेपत्व
हेतुमाह उदासीनवदिति यथा कश्चिदुपेक्षको द्वयोर्विवदमानयोर्जय
पराजययोः संसर्गी तत्कृतहर्षविषादाभ्यामसंस्पृष्टो निर्विकारश्चास्ते तद्व
न्निर्विकारतयासीनं अत एव निर्विकारत्वान्नैतत्कर्मसमसक्तं इदमहं करो
मीत्यभिमानस्याभावात्कर्माणि न निबध्नन्ति यथा तथाभिमानशून्यतयाप्य
पि यः कश्चित् कर्माणि करोति तमपि न निबध्नन्तीति भावः ९

कृसमवेजयन्तीटीका ९

नन्वेवं चेत्तर्हि विषमाविसृष्ट्यादीनि कर्माणि वैषम्यादिना जीवमिवेश्वरं
त्वामपि बध्नन्तीति चेत्तत्राह नच मामिति हे धनंजय यान्यज्ञेन तानि विषम
जगत्सृष्ट्यादिरूपाणि कर्माणि मामीश्वरं न निबध्नन्ति मयि वैषम्यादिदोष
मापादयन्ते न दोषेण जीवं जन्ममरणलक्षणबन्धनेन कुर्वन्ति चशब्दो हेत्वर्थे
नन्वायमाशयः हि यस्माज्जीवानामनादिकालसंचितानि देवतिर्यगादिवि
षमाकारकराणि शुभाशुभरूपाणि कर्माण्येव कारणानि निसृष्टहन्त्वतम
द्वैषम्यादिभावे भृत्युदयादितारतम्ये च हेतुत्वं भवामीति मत्स्या वैषम्यादिदोषो
मां न स्पृशति तथा सूत्रकारोऽप्याह वैषम्यनैर्घृण्ये न सापेक्षत्वात् न कर्म
विभागादिति चेन्नानादित्वादिति न तु तर्हि एवं केन प्रकारेण स्थितस्सन् क
र्माचरसि यत्त्वं दोषेण न बाध्यते इत्याशंकायां हेतुगर्भितं हि विशेषणमा
ह उदासीनवदिति यतो हेतोस्तेषु कर्मसूदासीनवदौदासीन्येनासीन
स्थितो यतस्तेषु सक्तोऽनासक्तोऽतो मां दोषो न बाधत इत्यर्थः उदासीनस्य
कर्तृत्वमसम्भवमत उदासीनवदित्युक्तं ९

मधुसूदनीटीका १०

अतः नचैनेवमहष्टिस्थिति प्रलयात्यानि तानि मायाविनेव समदृष्ट्यैव च मया
कर्माणि

क्रियमाणानि मां निबध्नंति अनुग्रहनिग्रहाभ्यां न मम कृतदुःकृतभागित्वं
कुर्वंति मिथ्याज्ञानत्वात् हे धनंजय युधिष्ठिरराजसूयार्थं सर्वान् राज्ञो जि
तवान् अमोहनवानिति महाप्रभावः सूचितः प्रोत्साहनार्थं तानि कर्माणि
कुतो न निबध्नंति तत्राह उदासीनवदासीनं यथा कश्चिदुपेक्षको द्वयोर्विव
दमानयोर्जयपराजयाऽसंसर्गी न तत्कृतहर्षविषादाभ्यामसंस्पृष्टो निर्विका
रस्तथा तेन त्वम् निर्विकारतयासीनं द्वयोर्विवदमानयोरिहाभावादुपेक्षकमा
त्रस्य धर्मेणावर्ते अन्वयः अत एव निर्विकारत्वात्तेषु सृष्ट्यादिकर्मसु असक्तं
अहं करोमीत्यभिमानलक्षणेन संगेन रहितं मां न निबध्नंति कर्माणीति युक्त
मेव अन्यस्यापि कर्तृत्वाभावे फलसंगाभावे च कर्माणि न [illegible]
[illegible] बंधकारणानीत्युक्तमनेन तदुभयसत्त्वे
त्कोशकार इव कर्मभिर्बध्यते इति द्रष्टव्यमभिप्रायः [illegible]
[illegible]
[illegible] ९

सदानंदीटीका ११

इति वर्गमिमं कृत्स्नं नारायणात्मा निर्विकारात्सृजन् न तत्कर्तृत्वसंबंधं भजामीत्याह
मा एतानि: १ सृष्टिस्थितिलयाख्यानि क्रियमाणानि मायया मायाविनेव कर्मा
णि तानि विषमदृशे वच २ निग्रहानुग्रहाभ्यां वा न निबध्नंति मां हरिं मिथ्यात्वा
देव कुर्वंति पुण्यपापादिभागिनं ३ उपेक्षको यथा कश्चिद् द्वयोर्विविदमा
नयोः जयाजयाद्यसंसर्गी न ताभ्यां निर्विकारधीः ४ निर्विकारतया तद्
दासीनं निरहंकृतिं तेषु कर्मसु तस्मान्मां न निबध्नंति तानि वै: ५ अन्यस्या
पि फलासंगाभावो निरभिमानिता सर्वकर्मस्वबंधस्य कारणं हरिणेरितं ९१९

नीलकंठीटीका १२

ननु विषमां सृष्टिं कुर्वतस्तव वैषम्यनैर्घृण्ये स्यातामत आह न चेति तानि
विषमसृष्टिरूपाणि कर्माणि मां न निबध्नंति तत्र हेतुः उदासीनवदासीनमि
ति यथा पर्जन्यो बीजविशेषेषु रागं द्वेषं वाऽकृत्वा उदासीनः सन्वर्षति
एवमीश्वरोपि पुण्यवत्सु रागं पापिषु द्वेषं वाऽकुर्वन् जगत्सृजति तत्तदृ प्राणिना
णां कर्मबीजवशादेव विभिन्नफलं प्राप्नुवंतीति नेश्वरे वैषम्यादीत्यर्थः ९

धानंदीटीका १३

न मां कर्माणि लिंपंतीत्युक्तं हि स्पष्टं लक्षयति ॥

तानिकर्माणिउत्तममध्यमाधमादिवैचित्र्येणविषमाण्यपिकृत्वा
निमामेनकर्तारंपरमेश्वरंननिबध्नन्तिएतदेवस्पष्टकरणायहृषितेनस
म्पादयंति अत्रहेतुगर्भंविशेषणमाह उदासीनवदित्यादि यथान्यो
पियःकश्चनकर्मकुर्वाणोपिकर्मफलेष्वनासक्तःउदासीनस्तिष्ठ
॰ति तितंकर्माणिननिबध्नंतिनबंधकानिभवंति तथेत्यर्थः अपिचायम
त्रवाक्यार्थःजीवास्तुकल्पमाणेनयेनस्वस्वकर्मभोगार्थंसृज्यंते
विलीयंतेच अर्हंतपरमेश्वरः तेषांकर्मविपाकंविदित्वातदनुरू
पेणतत्तद्भोगैःसंयोजनायतत्तत्सर्गकर्तेत्यर्थः [illegible]
९
रामकंठीटीका १४
किंच तानिसर्गसंहारादिरूपाणिकर्माणिनपुनर्मांनिबध्नंति मन्मायो
ज्ञावितनानादेवत्ववनिधृमितविपाकारंभकत्वादिनानपरंतेबीज
वंति यथाजीवानांकर्माणिज्ञानात्सुभोगलक्षणविपाकारंभक
त्वेनसंसारबंधकारणत्वमापद्यंतेनतथासर्गादिकर्माणिममेत्यर्थः
कीदृशंसंतंमांन निबध्नंतिहेतुगर्भंविशेषणमाह तेषुकर्मसुसक्त
त्वान्ममत्वादिग्रहाभावेनाऽनिमग्नचित्तत्वाउदासीनवमध्यस्थवदासीनं
स्थितम् यथापरकीयकर्मसुपरोक्षेतानिमग्नत्वन्नफलदातीतिमग्न
मानस्ताटस्थ्यमनुभवंस्तैस्तैःकर्मभिःस्वफलभोक्तृत्वादिनानियम्य
ते तथासर्गादिभिःकर्मभिर्ननिबध्यो यतस्तानिसर्गादीनिकर्माणि
स्वचित्तवैभवस्वमायोज्ज्ञावितान्योन्यभेदात्तेत्रत्वान्यति ममसर्वतः
स्वेच्छामात्रेणतथावभासकत्वमेवकर्तृत्वं तेषुतावदहिमन्मायामो
हिताःसंतोन्योन्यभेदेनावभासमानानांसर्गाद्यवभासावस्थायोगि
त्वंप्रतिपद्यंते ममपुनरेतेसर्वेभावात्मतत्सर्गाद्यवस्थात्वेनाप्यद्वयवि
मात्रलक्षणस्वभावावभियंते इत्यनेनप्रकारेणतेषुकर्मसूदासीन
वदासीनंमामेतानिननिबध्नंतीत्यर्थः एषचार्थः प्रागेवपुनःपुनस्त
त्कर्तारमपिमांविद्ध्यकर्तारमव्ययमित्यादिना नमांकर्माणिलि
म्पंतिनमेकामःफलेस्पृहेत्यादिनाचप्रतिपादितः [illegible]
[illegible]
[illegible] ९

श्री गी टी

कथंनबंधःस्यादित्याशंक्याह॥

38

नन्वेवंनाना लासिकी [illegible]टीका १५ विधानि कर्माणि कुर्वतस्तव जीवव
त्तानि सृष्ट्यादीनि कर्माणि मामीश्वरं नैव निबध्नंति फलपरतन्त्रं न
कुर्वन्ति अत्र हेतुगर्भं विशेषणमाह तेषु कर्मसु असक्तमपि असक्त
त्वान्ममतकर्तृत्वादिग्रहाभावेनाऽनिमग्नं संकल्पनात्तटस्थवदासी
नं स्वस्वरूपे विश्रान्तम् एवमासक्तिराहित्येन कर्म नबन्धकारणमि
त्युपदिष्टम् [illegible]
[illegible]ति ९

पंचोलीटीका

ततएव भूतयामे विषमं विदधतस्तन्निमित्तधर्माधर्मसंबंध :
स्यादित्यत्राह नचेति हे धनंजय चतुर तानि विषमसृष्टिकृता
नि कर्माणि मां न निबध्नंति स्वसमहेश्वरं च तेषु कर्मसु स्वशक्ते फला
पेक्षया रहितमुदासीनवदासीनं कर्तृत्वाद्यभिमानरहितं ९

रणवीरसमिद्धोधिनी

ननु यदि विलक्षणैवेवमूर्त्या जगद्भासि त्वं प्रवृत्तोसि तत्कथं तेषु
स्वतंत्रेषु भूतेषु स्वयं स्थितो भवते दैवलं संछ्रियते तथा च प्रतिज्ञा
भंगरूपदोषतादवस्थ्यमित्यत आह नच मामिति तानि तैर्मदत्त
प्राणितैः क्षत्रियप्रवरैर्निवर्तितानि च कर्माणि उत्सृष्टमनादीनि मा
न निबध्नंति बद्धं न संपादयंति मदनुष्ठितानि न भवंति अतश्च प्र
तिज्ञा न मम नेति भावः अत्र च हेतुगर्भं विशेषणमाह उदासीन
वत्तटस्थवदासीनं निषण्णं तेषु च कर्मसु असंगमसक्तं एतेन देहे
नाकरणादिति भावः उदासीनवदिति वतेश्चायमर्थः यद्यप्य
हमेतेषां हनने प्रवृत्त एव तथापि प्रतिज्ञापालनार्थं रूपांतरे
ण तथा करोमि न पुनरेतेन देहेन ब्रह्मादिभिः स्वयमेव वादत्त
वरानुरोधादिदमुदासीनं तेन मम भूति एतेन च कथं न स्वयमे
व वमीश्वरः सन्नुपान्ने मीत्याशंका परास्ता ९॥

ਸਤੁਮਾਸ

੫॥

भाषा अनुवाद

और जो कहो कि इस प्रकार नाना प्रकार कर्म्मकारी जो तुम तो तुमारा जीवके समान बन्धन क्यौं न होय तो कहते हैं कि वे कर्म्म हमको बन्ध नहीं कर शकते क्यौं कि कर्म्ममे जो आसक्ति सोई बन्धनका कारणहैं और हम इराण कामहैं इससे वह आशक्ति हमको नहींहै हमतो उदासीन के ऐसे वर्त्तमानहै इस उदासीन के समान कर्म्म करो कछु डर नहींहै कोई कर्म तुम कोभी न लगेंगे ९ ।

दोहा

नहियनंजय कर्मसो मोकहू बांधतकोय उदासीनज्यों स्थितर
हों कर्म प्रसंगीहोय ९ ॥

39

मयाध्यक्षेणप्रकृतिः सूयतेसचराचरं हेतुनानेनकौ
न्तेय जगद्विपरिवर्त्तते ९

शाङ्करभाष्य १

तत्र भूतग्राममिमं विसृजाम्युदासीनवदासीनमितिच विरुद्धमुच्यते
तत्परिहारार्थमाह मयेति मया सर्वतो दृशिमात्रस्वरूपेण विक्रियात्म
नाध्यक्षेण मम माया त्रिगुणात्मिकाऽविद्यालक्षणा प्रकृतिः सूयते
उत्पादयति सचराचरं जगत् तथाच मन्त्रवर्णः एकोदेवः सर्वभूतेषु गू
ढः सर्वव्यापी सर्वभूतान्तरात्मा कर्म्माध्यक्षः सर्वभूताधिवासः साक्षी
चेता केवलोनिर्गुणश्चेति साक्षिमात्रेण हेतुनानिमित्तेनानेनाध्यक्षत्वेन
कौन्तेय जगत् सचराचरं व्यक्ताव्यक्तात्मकं विपरिवर्त्तते सर्वावस्थासु
दृशिकर्मत्वापत्तिनिमित्ता हि जगतः सर्वा प्रवृत्तिरहमिदं भोक्ष्ये पश्या
मीदं शृणोमीदं सुखमनुभवामि दुःखमनुभवामि तदर्थमिदं करिष्या
म्येतदर्थमिदं करिष्ये इदं ज्ञास्यामीत्याद्यवगतिनिष्ठा अवगत्यवसा
ना योऽस्याध्यक्षः परमेव्योमन्नित्यादयश्च मन्त्रा एतमर्थं दर्शयन्ति तत
श्चैकस्य देवस्य सर्वाध्यक्षभूतचैतन्यमात्रस्य परमार्थतः सर्वभोगान
भिसम्बन्धिनोऽन्यस्य चेतनान्तरस्याभावे भोक्त्रन्तरस्याभावात् किंनि
मित्तेयं सृष्टिरित्यत्र प्रश्नप्रतिवचनेऽनुपपन्ने कोऽद्धा वेद क इह प्रवो
चत् कुत आयाताः कुत इयं विसृष्टिरित्यादिमन्त्रवर्णेभ्यो दर्शितञ्च
भगवता अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवइति ९

आनंदगिरिकृतटीका २

ईश्वरे स्रष्टृत्वमौदासीन्यञ्च विरुद्धमिति शंकते तत्रेति दृर्वग्रन्थः
समस्तार्थः विरोधपरिहारार्थमुत्तरश्लोकमवतारयति तदिति तृतीया
द्वयं समानाधिकरणमित्यभ्युपेत्य व्याचष्टे मयेत्यादिना प्रकृतिशब्दा
र्थमाह ममेति तस्या अपि ज्ञानत्वं व्यावर्त्तयति त्रिगुणेति पराभिप्रे
तंप्रधानं व्युदस्यति अविद्येति साक्षित्वे प्रमाणमाह तथाचेति मूर्तित्र
यात्मना भेदं वारयति एकइति अखण्डाद्वयं प्रमाह देव इति आदि
त्यवन्नाटस्यं प्रत्यादिशति सर्वभूतेष्विति किमिति तर्हि सर्वैर्नोपल

श्री
गी टी
न

भ्यते तत्राह शुद्धइति शुक्त्यादिवत्परिच्छिन्नत्वं व्यवच्छिनत्ति सर्वव्यापीति
तर्हि नभोवज्जडात्मत्वं नेत्याह सर्वभूतेति तर्हि तत्र तत्र कर्म्मतत्फल
सम्बन्धित्वं स्यात्तत्राह कर्म्मेति सर्वाधिष्ठानत्वमाह सर्वेति सर्वेषु भूते
षु सत्तास्फूर्तिप्रदत्वेन संनिधिर्वासोच्यते नकेवलं कर्म्मणामेवायमध्यक्षो
पि तु तद्वतामपीत्याह साक्षीति दर्शनकर्तृत्वशङ्कां व्यावर्तयति चेतेति
अद्वितीयत्वं केवलत्वं धर्म्माधर्म्मादिराहित्यमाह निर्गुणइति किं बहुना
सर्वविशेषशून्यइति चकारार्थः उदासीनस्यापीश्वरस्य साक्षित्वमात्रे
निमित्तीकृत्य जगदेतत् पौनःपुन्येन सर्गसंहाराद्भवतीत्याह हेतु
नेति कार्यवत् कारणस्यापि साक्ष्यधीना प्रवृत्तिरिति वक्तुं यथाक्य
क्तात्मकमित्युक्तं सर्वावस्थास्वित्यनेन सृष्टिस्थितिसंहारावस्था गृह्यन्ते
तथापि जगतः सर्गादिभ्यो भिन्ना प्रवृत्तिः स्वाभाविकी नेश्वरायत्तेत्या
शंक्याह दृशीति नहि दृशा व्याप्यत्वं विना जडवर्गस्य कापि प्रवृत्ति
रिति हिशब्दार्थः तामेव प्रवृत्तिमुदाहरति अहमित्यादिना भोगस्य वि
षयोपलम्भाभावासम्भवात्तानाविधां विषयोपलब्धिं दर्शयति पश्या
मीति भोगफलमिदानीं कथयति सुखमिति विहितप्रतिषिद्धाचरण
निमित्तं सुखं दुःखञ्चेत्याह तदर्थमिति न च विमर्षपूर्वकं विहिते वि
नानुष्ठानमित्याह इदमिति इत्याद्या प्रवृत्तिरितिसम्बन्धः सा च प्रवृत्तिः
सर्वा दृक्कर्म्मत्वापत्तिरेवेत्येव विवृणोति इत्युक्तं निगमयति अवगती
ति तत्रैव च प्रवृत्तेरवसान मित्याह अवगतिरवसान इति परस्याध्यक्ष
त्वमात्रेण जगच्चेष्टेत्यत्र प्रमाणमाह योऽस्येति अस्य जगतो योऽध्यक्षो नि
र्विकारः स परमे प्रकृष्टे हार्दे व्योम्नि स्थितो निर्विकारः न परमे प्रकृष्टे
हार्दे व्योम्नि स्थितोऽनुविज्ञेयइत्यर्थः ईश्वरस्य साक्षित्वमात्रेण स्रष्टृत्वे
स्थिते फलितमाह ततश्चेति किं निमित्ता परस्येयं सृष्टिर्न तावद्भोगार्था
परस्य परमार्थतो भोगासम्बन्धित्वात्तस्य सर्वसाक्षीभूतचैतन्यमात्रत्वात्
चान्यो भोक्ताचेतनान्तराभावादीश्वरस्यैकत्वादचेतनस्याभोक्तृत्वात् न च
सृष्टिरपवर्गार्था तद्विरोधित्वात्सैवं प्रश्नो वा तदुत्तरं प्रति वचनं वा
युक्तं परस्य मायानिबन्धने सर्गे तस्यानवकाशत्वादित्यर्थः परस्यात्म
नोऽनुविज्ञेयत्वे श्रुतिमुदाहरति कोऽद्धेति तस्मिन् प्रवक्तापि संसारस्य

ण्डले नास्तीत्याह कश्हेति जगतः सृष्टिकर्तृत्वेन परस्य हेयमाशंक्य
कूटस्थात्मनो न सृष्टिर्जातेत्याह कृत इति न हीयं विविधा सृष्टिर्
व्यस्मादपि कस्माच्चिदुपपद्यते अन्यस्य वस्तुनोऽभावादित्याह कृत इ
ति कथं तर्हि सृष्टिरित्याशंक्या ज्ञानाधीनेत्याह दर्शितश्चेति १०

स्वामिकृतटीका ३

तदेवोपपादयति मयाध्यक्षेणाधिष्ठात्रा निमित्तभूतेन प्रकृतिः सचराचरं विश्वं सूयते जनयति अनेन मदधिष्ठानेन हेतुना इदं जगत् विपरिवर्तते पुनः पुनर्जायते सन्निधिमात्रेणाधिष्ठातृत्वात् कर्तृत्वमुदासीनत्वं चाविरुद्धमितिभावः १०

पैशाचभाष्यटीका ४

आत्मन उदासीनत्वं दर्शयितुमाह मयाध्यक्षेण साक्षिणा प्रकृति सूयते सचराचरं स्थावर जंगम भूत सहितं हेतुना निमित्तमात्रेण नेनेश्वरेण जगद्धि परि वर्तते संसृज्यते संह्रीयते वेत्यर्थः १०

रामानुजभाष्यटीका ५

मयेति तस्मात् क्षेत्रज्ञ कर्मानुगुणं मदीया प्रकृतिः सत्यसंकल्पेन मयाध्यक्षेणेक्षिता चराचरं जगत्सूयते अनेन क्षेत्रज्ञ कर्मानुगुणमदीयेक्षणेन हेतुना जगद्विपरिवर्तत इति सत्यसंकल्पत्वे नैर्घृण्यादिदोषरहितत्वमित्येवमादि विस्वदेवस्तनौ रैश्वरे यौगपद्य यथा ह श्रुतिः अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः मायां तु प्रकृतिं विद्यात् मायिनं तु महेश्वरमिति १०

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं १० ॥

परमार्थप्रपाटीका ७

अथादितो निरूपितार्थे ऋक्शाखीयश्रुतिसंदर्भस्य किंस्विदासीदधिष्ठानमारंभणं कतमत्स्वित् कथासीत् यतो भूमिं जनयन् विश्वकर्मा वि द्यामौर्णोन्महिना विश्वचक्षाः १ नासदासीन्नोसदासीत्तदानीं नासीद्रजो नो व्योमा परो यत् किमावरीवः कुहकस्य शर्मन्नंभः किमासीद्गहनं

मयाध्यक्षेणाधिष्ठात्राकृता प्रकृतिः सचराचरं विश्वं सूयते जनयति अनेनैव मदधिष्ठानरूपेण हेतुना निमित्तभूतेन इदं जगद्विपरिवर्तते पुनः पुनर्जायते सन्निधिमात्रेणाधिष्ठातृत्वे कर्तृत्वमुदासीनत्वं चाविरुद्धमितिभावः अत्रेतदुक्तं भवति सत्ताश्रयव्यतिरेकेन सत्तावस्थानमेव नोपपद्यते शक्तिक्रियाविनारजनस्यैवमेवं सतिरञ्जनोत्पत्तिस्थितिविनाशनृशक्तिर्न स्पृशति तद्वद्ब्रह्म तन्तेपि इत्यर्थः ॥+

श्री
गी टी
न

41

गभीरं २ नमृत्युरासीदमृतंनचासीन्नरात्रिया अन्हआसीत् प्रकेतः
आनीदवातंस्वधयातदेकं तस्माद्धान्यन्नपरःकिंचनासेति ३ आसांक्र
मेणशब्दमाभाष्यं । किंस्विदासीदिति पूर्वमंत्रे जगत्प्रलयकालेजग
त्संहृत्यपश्चात्सिसृक्षायांपृथिव्यादिव्योमोत्पादनवेलायांअधिष्ठानंकिं
स्विदासीत् किंनामाभून्नकिंचिदित्यर्थः तथा आरंभणं कतमत्स्वित्
आरभ्यतेऽनेनेत्यारंभणमुपादानकारणं कतमद्भवेत् तदपिनेत्यर्थः
यद्यपिसंभवेदारंभणंकथासीत्कथमभूत् किंसदसद्वाभवेदित्यर्थः ३
भयमपिनोपपद्यते सत्त्वेद्वैतत्वभंगः असत्त्वेतदात्मकयोःपृथिव्यादि
व्योम्नोरुपादानानर्हत्वात् तामसकिंचनमिषदित्यादिश्रुतेश्चयतोयस्माद
धिष्ठानादारंभणाच्चविश्वचक्षुः सर्वद्रष्टापरमेश्वरोभूमिंजनयन् वर्तते
तथाद्यांदिवंव्योर्णोत् व्यहृणोत् सृष्टवान् महिनास्वमहत्वेन अथेत
स्यमन्त्रस्योत्तरप्रतिपादिकांश्रुतिमाह नासदिति अनयासृष्टेःप्राक्कृति
रस्तसमस्तप्रपंचस्यप्रलयावस्थानिरूप्यते प्रलयदशायामवस्थितंयदस्य
जगतोमूलकारणंतदसत्शशविषाणवन्निरूपाख्यंनासीत् नहितादृ
शात्कारणादस्यसतोजगतउत्पत्तिःसंभवति तथानोसदासीत् परमा
र्थतःपरमात्मनोऽन्यत्सदात्मकत्वमानेद्वैतत्वप्रसंगः नापिव्यवहारसत्
प्रत्येव्यवहाराभावस्यवक्ष्यमाणत्वात् तस्मादुभयविलक्षणमनिर्वाच्य
मेवासीदित्यर्थः अथव्यावहारिकसत्वंनिषेधयति तदानीमिति लो
कारजोऽप्युच्यतइतियास्कः अत्रसामान्यापन्नमेकवचनं एवंव्यवहार
मतो पृथिव्यादीनामभावादित्यर्थः तथा व्योमांतरिक्षं तदपिनासी
त् परइति सकारांतंपरस्तादित्यर्थेवर्तते व्योम्नः परस्ताद्युलोकमथ
ति सप्तलोकांतं यदस्ति तदपि नासीदित्यर्थः अनेनब्रह्मांडमपिनि
षिद्धंभवतियतएतद्ब्रह्मसमानेभूतजातंसर्वंनासीत् किंतच्छक्तिकारज
नवत्स्वप्नवोत्पन्नमितिअक्षयानिरुक्ते नन्वास्यासीदितियातोस्तदानी
मित्यव्ययस्यचभूतकालवाचित्वात्व्योमादीनामसंभवेपिकिंकालआसी
दितिचेत्र आनीदवातमिति अन्यातस्यापिनिषेधात् अतःसकल
मपिदृश्यजातं प्राक्सृष्टेरपितसदसद्विलक्षणोपादानकंप्रातिभासिक

मितिपर्यवसन्नं अथैतस्य ज्ञानैकनाश्यत्वेन प्रातिभासिकत्वं दृष्टान्तीकुर्वन्ना
ह किमावरीवरिति प्रागुक्तं दृश्यजातं शर्मन्निति शर्माणिपवाधितेब्रह्मणि
किमावरीवः किमावरकं भवति वा नेत्यर्थः अनेन यत्सदसद्विलक्षण
मासीत् तस्याश्रयाऽव्यामोहकमित्युक्तं यथा कुहकस्यैन्द्रजालिकस्य गह
नं गभीरमक्षोभ्यमम्भः तेन मायया रचितमम्भः मध्यप्रवेशमात्रं सत्कुहकस्या
वरकं भवति वा नेत्यर्थः किंच न मृत्युरिति तदानीं शर्मणि केवलस्वरू
पे मृत्युर्जन्ममरणात्मको बन्धः अमृतं मोक्षो वा नासीत् यथा सूर्ये रात्र्या
ह्नःप्रकेतो ज्ञानेनास्ति तद्वत् तर्हि किं न आनीदिति एकं अवातम
प्राणमूर्द्ध्वं ब्रह्मैवासीत् अप्राणो ह्यमना इति श्रुतेः तया अप्राणमना
मागोचरमिति च एवं तस्य यथा स्वस्मिन् ध्रियते कल्प्यते सा स्वधा माया तया
कृत्वा आसीत् कल्परूपेणासीदित्यत्र आनीदिति धातुः अनुक्तः एवं माया
शबलितं ब्रह्मात्मसत्तमासीदित्युक्ते हेति निश्चयेन तस्मादन्यत् किंचकि
मपि नास नासीत् परस्तादग्रेऽवसानेपि तदेव ९

वनमालीटीका ८

नतु जगत् प्रकृत्यधीनं त्वमुदासीनश्चेत् प्रकृतेरेव स्वातंत्र्यं स्यादत आह
मयेति मया सर्वेश्वरेणाध्यक्षेणाधिष्ठात्रा स्वामिना प्रकृतिस्त्रिगुणात्मिका सचरा
चरसहितं विश्वं सूयते जनयति न केवलं प्रकृतिस्वामित्वेन तद्धेतुत्वेन च
प्रयोजकत्वं किंतु कर्तृत्वरूपेहेतुत्वमपीत्याह हेतुनेति अनेन सर्वचेष्टकेन
सर्वान्तर्यामिणा मया सचराचरं जगच्चक्रवत्परिवर्तते पुनः पुनरुत्पद्यते
नश्यति चेत्यर्थः एतादृशं मदद्भुतैश्वर्यज्ञानमतिगोप्यं येन केनापि दुःप्राप
तिरतिशयानंदाविर्भावरूपमोक्षकारणं महताप्रयत्नेन संपाद्यमिति।
भावः १०

कुसुमवैजयन्तीटीका ९

नन्वजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां स्वरूपामित्यादिश्रु
तिभ्यः प्रकृतेरेव प्रजोत्पत्तिः श्रूयते न तु त्वत्केन प्रकारेणेत्याशंक्य मदीक्ष
णसंकल्पादिनाप्रेरितैव सा जगज्जनयतीत्यभिप्रेत्याह मयाध्यक्षेणेति
मया सत्यसंकल्पेन परमपुरुषेणाध्यक्षेण प्रकृतिप्रेरकेण ईक्षणवता ते
न तत्कर्मानुगुणतया वीक्षिता प्रेरिता प्रकृतिर्माया सचराचरं देवतिर्यग्म

श्री
गी टी
५

द्विविधमाकाराभ्यां चराचराभ्यां सह वर्तमानं चेतनाचेतनात्मकं जगद्
[illegible]सूयते जनयति हे कौन्तेय उक्तं तीर्थश्रेष्ठैर्नतेन यथा पाण्डुनाथेरितेव प
तिव्रता कुलीना सजनयत यथा [illegible]
[illegible] प्रकृतिरपि मत्प्रेरितैव जगज्जनयतीति सूचितं अनेन हेतुना
पूर्वकर्मानुगुणमत्शीलनप्रकारेण हेतुना कारणेन जगद्धि वर्तते पुनः
पुनरुद्भवति इत्येवं प्रकारेण वैषम्यादिदोषवर्जितात्मसत्यसंकल्पात् पर
मपुरुषान्ममतो जगदुत्पत्तिः स्या न तु केवलायाः प्रकृतेरिति भावः १०

भूतग्राममिमं विसृजामि मधुसूदनीटीका १० उदासीनवदासीनमिति च परस्परविरुद्ध
मित्याशंकापरिहारार्थं पुनर्मायामयत्वमेव प्रकटयति इति ॥+
मया सर्वतो दृशिमात्रस्वरूपेणाविक्रियेणाध्यक्षेण नियन्त्राभासकेनावभा
सिता प्रकृतिस्त्रिगुणात्मिका सत्वासत्वादिभिरनिर्वाच्या माया सूयते उत्पाद
यति सचराचरं जगन्माया विनापि स्थितेव मायाकल्पितगजतुरगादि
कं न त्वहं स्वकार्यमायाभासनमन्तरेण करोमि व्यापारान्तरं हेतुना निमित्ते
नानेनाध्यक्षत्वेन हे कौन्तेय जगत्सचराचरं विपरिवर्तते विविधं परिव
र्तते जन्मादिविनाशान्तं विकारजातमनुवरतमासादयतीत्यर्थः अतो भा
सकत्वमात्रेण व्यापारेण विसृजामीत्युक्तं तावता चादित्यादेरिव कर्तृत्वा
भावादुदासीनवदासीनमित्युक्तमिति न विरोधः तदुक्तं अस्य द्वैतेन्द्रजाल
स्य यदुपादानकारणं अज्ञानं तदुपासत्य ब्रह्मकारणमुच्यते इति श्रुति
स्मृतिवादाश्चात्रार्थे सहस्रश उदाहार्याः [illegible]
[illegible] १०

सदानन्दीटीका ११

भूतग्रामं सृजामीति न योदासीनवत्स्थितिः इत्यन्योन्यविरुद्धं स्यादित्याशं
क्याह माधवः १ मयाऽध्यक्षरूपेणाध्यक्षेणाविक्रियात्मना नियंत्री
प्रकृतिर्माया भासकेनावभासिता २ सत्वादिभिरनिर्वाच्या सूयते यस
विलं जगत् माया विनापि स्थिता माया यथाध्यक्षं गजादिकं ३ सृजत्यहं
तथाध्यक्षः सृजामीदं चराचरं न त्वहं सर्वकार्याणि मायाभासनमन्तरा ४
व्यापारान्तरमप्यत्र विदध्ये विक्रियान्विताः अनेनाध्यक्षभावेन निमित्तेन च
राचरं ५ जननादिविनाशान्तं विकारमनुयात्यदः अतोऽहं भासकत्वात्ये
व्यापारेण सृजामि तत् ६ तावतादित्यवन्नास्ति कर्तृत्वं मम सर्वथा उदा

सीनवदासीनमसक्तेन विरुद्धता ७ अस्यैवैतेनेदं जालस्य यदुपादानकार
णं अज्ञानं तदुपाश्रितब्रह्मकारणमुच्यते ८ अस्यैवं तत्परब्रह्मत्वस्य का
र्येन कारणं अधिष्ठानत्वमात्रेण जगति ब्रह्मगीयते ९ इत्यंकेऽपि हेत
त्वेमायया तत्त्वतः प्रकृतिः सर्वजगतश्चिदधीना सदैव हि अतस्त
दुभयेनैव विरुद्धं स्यात्परस्परम् ९०॥९

नीलकंठीटीका १२

ननु विरुद्धमिदमुदासीनवदासीनमिति परस्परविरुद्धत्वात् इत्याशंक्याह
मयेति मयाध्यक्षेण अधिष्ठात्रा अयस्कांतकल्पेन प्रवर्तकेन प्रकृतिः
सचराचरं जगत् सूयते उत्पादयति अनेन अध्यक्षत्वेनैव हेतुना हे कौंतेय ज
गद्विपरिवर्तते जन्माद्यवस्थासु भ्रमति अयस्कांतवदहमुदासीनस्सन्नपि
प्रवर्तकश्च भवामीति भावः तथा च मंत्रवर्णः एको देवः सर्वभूतेषु गूढः
सर्वव्यापी सर्वभूतांतरात्मा कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केव
लो निर्गुणश्चेति एकस्यैव देवस्य सर्वाध्यक्षत्वं साक्षित्वं च प्रतिपादयति ९

करणप्रकारमेवाह॥ आनंदटीका १३ सर्व

मयाध्यक्षेण सर्गादिकरणाधिकृतेन स्वतंत्रेण नियंत्रा प्रेरिता प्रकृतिः मम
माख्या योगशक्तिर्गुणमयापरापरात्मिका त्रिगुणप्रधानसंज्ञा प्रवर्तिता स्वकीया शक्तिः
सचराचरं विश्वं सूयते जनयति मदधिष्ठानं विना परतंत्रायाः प्रकृतेर्नाधिष्ठा
नत्वं एतेन निजनिजकर्मभोगार्थं मम सर्वज्ञस्य प्रेरणया हेतुना जगद्विपरि
वर्तते नानारूपतां भजते संसारचक्रे च परिभ्रमति [illegible]
[illegible]
[illegible]
[illegible] र्थं प्रवर्तत ९

यद्येवं वस्तुस्थित्या परमेश्वरेणेदं जग रामकंठीटीका १४ त्तात्सर्गादिकर्मणा वियुनक्ति तत्केनेदं जग
ज्यते इत्यत आह॥ मयापरमेश्वरेण नित्यस्वभावमात्रावस्थितेनैवाध्यक्षेणाधिष्ठात्रा हेतुभूते
न प्रकृतिः मममायाख्या चेतनाचेतनप्रविभागेन प्रतिपादितपरापरस्वरू
पा स्वभावस्तु निरवाऽपर्यंतस्थावरजंगमभेदभिन्नं जगत्सूयते जनयत्यनेन
हेतुना निमित्तेनेदं जगद्विपरिवर्तते सर्गस्थितिसंहारप्रबंधचक्रे परिभ्रम
ति [illegible] ९

मेतद्वचनसंगतिरित्याशंक्योपपादयति ॥
ननूदासीनवत्वकलासिकी टीका १० ...नात्रुपपत्तेः कर्तृत्वे चोदासीन्यानुपपत्तेः कथ
मयेत्यध्यक्षेण सर्वतो दृशिमात्रस्वरूपेणाध्यक्षेणाधिष्ठानेन सा तिराचहेत
भूतेन प्रकृतिस्त्रिगुणसाम्यात्मिका स्वरूपाच्छादनरूपाशक्तिः सचराचरस्था
वरजंगमात्मकभोक्तृरूपजीवभेदयुक्तं जगत्त्रजातं भोग्यरूपं सूयते जनय
ति हेकौन्तेयानेनाध्यक्षत्वेन हेतुना जगद्भोक्तृभोग्यभेदभिन्नं विपरिवर्तते
सर्गस्थितिसंहारप्रबन्धचक्रे परिभ्राम्यति यथाशुक्तिकयाधिष्ठानेन त
त्त्वानवधारणरूपा सथा प्रतिपत्तिः रजतमुत्पादयति यथावा राज्ञा क
र्मसाक्षिभूतेन सता सेनं जयपराजयादिकं विदधाति तद्वत्प्रकृतिरपि
तद्वत्सम् अस्मदैतेन्द्रजालस्य यदुपादानकारणं भ्रान्तानं तदुपाश्रियब्रह्म
कारणमुच्यत इति एवमनुमानेन श्रीटीकास्तदमाः १०

पंचोलीटीका

तत्रभूतग्रामं विसृजामि उदासीनवदासीनमिति च विरुद्धं भातीति त
द्विरोधपरिहारार्थमाह मयेति हे कौन्तेय प्रकृतिः त्रिगुणात्मिका वि
द्या मया चैतन्यरूपेणाविक्रियेणाध्यक्षेण साक्षिणा चराचरं जगत्सूय
ते उत्पादयति अनेनाध्यक्षत्वेन निमित्तेन सचराचरं जगद्विपरिवर्तते पु
नः पुनः जायते १०

रमावीरसमिद्बोधिनी

मयेति अनेनैव वदेनना प्रतिज्ञाभंगहेतुनि इष्टवधादीनि कर्माणि
मां निबध्नमाकार्षुरित्यभिप्रायेणैव देवभूतेन अध्यक्षेण सत्यज्ञा
भूतेनाधिष्ठाना वा मया प्रकृतिः सप्तमाध्यायप्रतिपादितापरापर
भेदेन द्विविधा स्ववर्णोचितकर्मसाधनीभूता सचराचरं चराचरैः
गज तुरग रथादिभिः सदैव सूयते उत्पाद्यते तत एव च जगद्विप
रिवर्तते विपरीता भवति १०॥

मधुभाष्य

मयेति प्रकृतिसूतिद्रष्टा कर्ताप्यहमेवेत्यर्थः तथाच श्रुतिः यतः

प्रसूताजगतःप्रसूतीतोयेनजीवान्व्यससर्जभूम्यामिति
तस्मिंकेविकल्पंवामवजानंतिकावतेषांगतिरित्यतआह
१०॥

भाषा अनुवाद

कोई कहते हैं कि अधिष्ठाता कारण स्वरूप मेरे बलसे यह प्रकृति चराचर विश्व को वार वार उत्पन्न करतीहै तात्पर्य यह कि मेरी सान्निध्य से प्रकृति सृष्टि करने को समर्थ होतीहै इससे हमको कर्तृत्व औ उदासीनत्व दोनो असङ्गत नहीं हैं क्यों कि माया हमारे सहाय बिन असमर्थहै १० ।

दोहा

मोऽधिपतिकर रचतहै प्रकृति चराचर कोय हे अर्जुन इह हेतु
सें जगत हि वर्तत सोय १०॥

44.

अवजानन्ति मां मूढा मानुषीं तनुमाश्रितं परं भावम
जानन्तो मम भूतमहेश्वरं ॥११॥

शांकरभाष्य १

एवं मां नित्य शुद्ध बुद्ध मुक्तस्वभावं सर्वजन्तूनामात्मानमपि सन्तं अवेति
अवजानन्त्यवज्ञा परिभवं कुर्वन्ति मां मूढा अविवेकिनो मानुषीं म
नुष्यसम्बन्धिनीं तनुं देहमाश्रितं मनुष्यदेहेन व्यवहरन्तमित्येतत्
परं प्रकृष्टं भावं परमात्मतत्त्वमाकाशकल्पमाकाशादप्यन्तरतमम
जानन्तो मम भूत महेश्वरं सर्वभूतानां महान्तमीश्वरं स्वमात्मानं त
तश्च तस्य ममावज्ञानभावनेनाहताः ते वराकाः ॥

आनन्दगिरिकृतटीका २

सर्वात्मत्वे सर्वभूताधिवासो नित्यमुक्तश्चेत् तर्हि किमिति त्वामेवा
त्मत्वेन भेदेन वा सर्वे न भजन्ते तत्राह एवमिति विपर्यस्तबुद्धि
त्वं भगवदवज्ञायां कारणमित्याह मूढा इति भगवतो मनुष्यदेह
सम्बन्धाभिमानात् विपर्यासः सम्भवतीत्याह मानुषीमिति अस्मदादि
वदेहतादात्म्याभिमानं भगवतो व्यावर्तयति मनुष्येति भगवत्तत्त्वम
वज्ञानतामविवेके मूलाज्ञानं हेतुमाह परमिति ईश्वरावज्ञानात्
किंभवतीत्यपेक्षायां तदवज्ञानप्रतिबन्धदुरितः शोच्या भवन्तीत्याह
ततश्चेति भगवदवज्ञानादेव हेतोरवजानन्तस्ते जन्तवो वराकाः शो
च्याः सर्वपुरुषार्थबाह्याः स्युरिति सम्बन्धः तत्र हेतुं सूचयति तस्येति
प्रकृतस्य भगवतोवज्ञानमनादरेण निरन्तरा तस्य भावनं पौनः
पुन्यं तेन हता स्वजनित दुरितप्रभावात् प्रतिबन्धदुरितय इत्यर्थः ॥

स्वामिकृतटीका ३

नन्वेवंभूतं परमेश्वरं त्वां किमिति केचिन्नाद्रियन्ते तत्राह द्वाभ्यां स
र्वभूतेषु महेश्वरस्वरूपं मदीयं परं तत्त्वं अजानन्तो मूर्खाः स्वाधेयं दुःखे
यमिति मामवमन्यन्ते अतस्ते हेतुः शुद्धसत्त्वमयीमपि तनुं भक्तेच्छा
वशात् मनुष्याकारामाश्रितवन्तं ॥

श्री
गी टी
न

पैशाचभाष्यटीका ४

अवजानंति मां मूढाः अज्ञाः मानुषीं मनुष्योचितां तनुं शरीरमाश्रि
तमधिष्ठितं परं प्रकृष्टं भावमत्र भावमजानंतः अनवगच्छंतो
ममेश्वरस्य भूतस्य महेश्वरं भूतानि प्राणिनस्तेषां वा महांतमीश्वरं ॥

रामानुजभाष्यटीका ५

अवजानंतीति मां भूतमहेश्वरं सर्वज्ञं सत्यसंकल्पं निखिलजगदेक
कारणं परमकारुणिकतया सर्वेषां समाश्रयणीयत्वाय मानुषीं त
नुमाश्रितं एवं लक्षणमिदं परं भावमजानंतो मनुष्यत्व समाश्रयण
मात्रेण मामितरसमजातीयं मत्वा तिरस्कुर्वंतीत्यर्थः ॥

अभिनवगुप्तकृतटीका ६

सोहं सर्वजनान्तःशायी सर्वस्यात्मपररूपतया वर्त्मास्पदं यन्मनुष्या
दिचतुर्दशविध सर्गव्यतिरिक्त ईश्वरो योनोपलभ्यते स कथमस्तीति ॥

परमार्थप्रपाटीका ७

अथ भगवान् स्वकीयमप्रत्यक्षत्वं प्रकटयन् जगत्कारणीभूतमायागतमो
ऽन्धं जीवेषु प्रवर्ततस्य माह अवजानंतीति मम परमुत्कृष्टं भावं तत्त्वं प्रक
टमपि अजानंतो मूढाः सर्वभूतमहेश्वरं अवजानंति अवमन्यंते मत्स्व
रूपेन सर्वभूतनिवासत्वेस्मति तदंतर्यामित्वेनेश्वरं नियंतारं न गणयंति
कथमवाग्मनस गोचरं चिन्मात्रं ज्ञास्यंतीत्याह मानुषीमिति किंभूतं मां
मानुषीं तनुमाश्रितं भक्तानुकंपया लातं स्वलभां शुद्धसत्वमयीं मनोहा
रिणीं मनुष्याकारां मूर्तिमधिष्ठाय विभ्रतं तदुक्तं विश्वप्रकाशमपि
योजनषट्सहस्रविस्तारमुकमलाभिर्यदिहार्कबिंबमसौ वितन्लि
मितमीक्षत एतदेवं पश्यंति मर्त्यमिव विश्वविभुं विमूढा इति श्रुति
रपि ऋग्वेदे मया सोन्नमत्ति यो विपश्यति यः प्राणिति य ईं शृणोत्युक्तं
अमंतवो मां त उपाक्षियंति श्रुधि श्रुत श्रद्धिवं ते वदामीति भाष्यं अभ
णस्य ब्रह्मरूपस्य महर्षेः कन्यावाङ्ग्राम्भ्री ब्रह्म रूपिणी वदति योन्नम
त्ति स भोक्तृशक्तिरूपया मयैव कृतान्नमत्ति तथायः मनोभिरामं वि

एवं विपश्यति सादरमवलोकयति शृणोति त्रासोँ सादिकं करोति।
यईश्शृणोति समयैव कृत्वा शृणोति तच्छ्रावकः स्वोचितानं विषयं विषयस्थि
ति तस्य स्वस्वोचितयात्रिव्यवस्थि एवंसति यईदृशी अंतर्यामिरूपेण बा
ह्यस्थिता अपकारिणीं नजानंतितेमां अमंतवः अमस्मानंः अजानंतो म
द्विषय ज्ञानरहिताः संतउपलयंति उपलीणः संसारेण दीना याताया
तयातनाभिर्दीना भवंति हेश्रुतविश्रुत सखे श्रुधि मया वक्ष्यमाणं शृण
किंनश्रोतव्यं। अद्विंषअद्विः अज्ञातया उक्तं अश्वथानेनलभ्यामित्यर्थः
ईदृशं अध्यात्मकं वक्ततेवदामि १०

वनमालीटीका ८

नवेतादृशं भवदैश्वर्यं सर्वेऽपि जानंतीत्यत आह अवजानंतीति सर्वेश्व
रोयमिति ना द्रियंते निंदंति च मूढा अविवेकिनो जना स्तेषां अमेहेतेस्तच
यतिमानुषीं तनुमाश्रितमिति यथाप्येककर्माधीना देहभान्नुवंति तथायम
पिकर्मवशाद्दृस देवहृहे आमवानितिओत्या ज्ञादिनमद्यथार्थज्ञानात्सं
तःपरंभावंभूतमहेश्वरंभूतं सर्वदा विद्यमानमीश्वरमैश्वर्यमच्चिदानंद
घनं निमदेहाभिमानो मशक्ति दौर्बल्येनपरिच्छिन्नतयाप्रतीयमानोप्यनं
तपारोनिर्विशेषप्रपंचवैभवः स्वभक्तानुग्रहायाविर्भूतोतीन्द्रियोपि परम
कृपयास्मदृग्गोचरतांगतश्च नजानंतश्चेत्यर्थः ११

कृष्णमेवजयन्तीटीका ९

नत्रु यद्येवंभूतमहिमानमसितर्हितोकेचिज्जनाः कुतोनाद्रियन्ते इत्याशं
क्य तेषां मज्ज्ञानाभावेनराजसतामसकर्मभीरजस्तमः स्वभावत्वादतस्ते मे
नादरं कुर्वंतीत्याह द्वाभ्यां अवजानंतीति येकेचिन्मूढा राजसतामस
लक्षणैः स्वकर्मभिर्मोहिता स्तेमम सर्वेश्वरस्य परं सर्वोत्कृष्टमसाधारणं भा
वं स्वभावमजानन्तोयमेव सर्वकारणं सर्वनियन्ता चिन्त्यानंतगुणशक्ति
कोजगज्जीवोद्धरणाय एवेहावतीर्णो मोहप्रदः सम्यक्संकल्पश्चैवंमस्व भा
वमविदन्तः सन्तो भूतमहेश्वरम् भूतानां चेतनाचेतनरूपाणां महेश्वरं
परमस्वामिनं मानुषीं तनुमाश्रितं मानुषवेशं बद्धलीलानुकूलनृतिं तनं
दिव्यमूर्तिमाश्रितं तादात्म्यसंबंधेन नित्यमेव प्राप्तं मां सर्वत्तंवेदवेद्यंशा
स्त्रयोनिं केशवोघाघमरनिकरवंद्ययोगिध्येयपदाम्बुजं सर्वेश्वरं अवजा

श्री
गी टी
न

नेतिकेनचित्सर्वोमाज्ञितेनयुगपेनेवतुहिबलचानर्थसौंदर्यादिगुण
संपन्नोदेहोऽनेनप्राप्तोऽयमीश्वरस्तेकालयवनजरासंध्यादिभयात्किमि
तिपलायितः क्रतोवासिंधुशरणमगच्छदित्येवमितिराराजकुमारस
मानत्वुआऽवमन्यंतेइत्यर्थः मानुषीतनुमाश्रितमित्यनेनद्विभुजचतुर्भु
जयोर्भगवद्विग्रहयोरेकतरस्यापिप्रधानार्चनादिनामोदप्रदत्वंसूचितम्
नतुचतुर्भुजस्यदिव्यत्वात्तस्यैवयामोहः संभवत्येवमात्रसंदेहः किंतद्विभुज
स्यतुपांचभौतिकत्वात्तस्यैवयाकथंमोहः स्यादितिचेन्न द्विभुजस्यापिदिव्या
प्राकृतिकत्वेनपांचभौतिकत्वाभावात् तथाहि गोपालतापिन्यांनेहोचुः किं
तद्रूपंकिंरसनंकथंवाहोतदुजनं सर्वंविविदिषतामाख्याहीतिसनकादि
भिर्ब्रह्मस्वरूपंकिमितिपृष्टः सन्नजउहोवाच हेरण्यागोपवेषमभ्राभंतरु
णंकल्पद्रुमाश्रितंसत्पुंडरीकनयनंमेघाभंवैद्युताम्बरं द्विभुजंज्ञानमुद्रा
ढ्यंवनमालिनमीश्वरंगोपीगोपगवावीतंसुरद्रुमतलाश्रयंदिव्यालंकर
णोपेतंरत्न पंकजमध्यगंकालिंदीजलकल्लोलसङ्गिमारुतसेवितंचिं
तयंश्चेतसाकृष्णंमुक्तोभवतिसंसृतेरितिब्रह्मांडोक्तेर्मेरुद्विभुजस्यगोपवेष
स्यकृष्णस्यचिंतनेनचिंतकस्यसंसारान्मुक्तिश्रूयतेएवंचद्विभुजस्यपाञ्च
भौतिकत्वकल्पनागतोपिनाप्रियतस्यापिदिव्यत्वश्रवणात्तदुक्तंतदुहोवा
चब्रह्मसवनंचरतोमेध्यातःस्तुतःपरार्धांतेसोऽबुध्यतगोपवेषोमेपुरुषः
पुरस्तादाविर्बभूवेतिमंत्रेणद्विभुजरूपगोपवेषस्यानादिनमप्राकृतत्वंदि
व्यत्वंचोक्तंभवतिसएववसुदेवगृहेप्याविर्भावमात्रेणवसुदेवनंदजीवत्वस
मुत्पन्नदेहवानित्यर्थः ब्रह्मसवनंब्रह्मणःसवमयंप्रथमपरार्धे चरतोवर्त
मानस्यमेध्यातस्तुतः परमेश्वरःपरार्धांतेराधमेसगोपवेषोऽवतरनयो
गनिद्रातउत्थितस्तथामेममपुरस्तात्पुरुषः आविर्बभूवेतिमन्त्रार्थः
ननुप्रकृतिग्रहे इत्थंचतुर्भुजत्वेनाविर्भूतःपश्चात्तुबभूवप्राकृतःशिशुरि
तिद्विभुजत्वस्यप्राकृतत्वश्रवणात्कथंदिव्यत्वंनिश्चीयतेइतिचेन्नद्विभुज
त्वस्यापिचतुर्भुजत्वस्यैवस्वेच्छयाविर्भूतत्वात् प्रकृत्यात्वस्वरूपस्वभावे
नयस्मोजातइतिप्राकृतःशिशुःमनुष्यशिशुवदाकृतिकोयमेवार्थोमा
नुषींतनुमाश्रितमित्यस्यापीत्यर्थः वस्तुतस्तुउभाभ्यामपिद्विभुजचतु
र्भुजाभ्यांविग्रहाभ्यांमानुषविग्रहएवसिद्धमितितेनैवरूपेणचतुर्भुजेनेति

पार्थसारथितया चतुर्भुजं तं प्रतिदृष्ट्वेदं मानुषं रूपमित्यादि पार्थवाक्या
त् तस्मादुभयोरपि भेदाभावेन मोक्षप्रदत्वमस्त्येव तयोर्भगवद्विग्रह
त्वाविशेषादित्यर्थः ११

एवंनित्यशुद्धबुद्धमुक्त **मधुसूदनीटीका** ९ स्वभावसर्वज्ञं तन्नामात्मनमानंदघनमनंतमपि संतं ॥
अवजानंति मांसाक्षादीश्वरोयमिति नाद्रियंते निंदंति वा मूढा अवि
वेकिनो जनास्तेषामवज्ञाहेतुं भ्रमं सूचयति मानुषीं तनुमाश्रितं म
नुष्यतया प्रतीयमानां मूर्तिमात्मेच्छया भक्तानुग्रहार्थं गृहीतवंतं म
नुष्यतया प्रतीयमानेन देहेन व्यवहरंतमिति यावत् ततश्च मनुष्यो
यमिति भ्रांत्याच्छादितांतःकरणाः मम परं भावं प्रकृष्टं पारमार्थिकं
तत्वं सर्वभूतानां महांतमीश्वरमजानंतो यन्नाद्रियंते निंदंति वा तद
नुरूपमेव मूढत्वमस्य [illegible]
[illegible] ११

सदानन्दीटीका ११

एवं नित्यविशुद्धं मामानंदघनमद्वयं नित्यमुक्तस्वभावं तमात्मानं स
र्वदेहिनां १ परमेश्वरोयं साक्षादिमे वेदा इति निश्चयात् नाद्रियंतेथवा
मूढा निंदंत्येवाविवेकिनः २ तेषां सूचयतीशोपि ह्यवज्ञाकारणं भ्र
मं मनुष्यत्वेन तनुमाभासमानां निजेच्छया ३ मूर्तिं गृहीतवंतं मां
स्वभक्तानुग्रहाय च तथा व्यवहरंतं च नटनाटकनयाद्भुतं ४ मनुष्यो
यमिति भ्रांत्या हतांतःकरणाः शठाः प्रकृष्टं वास्तवं तत्वमजानंतो म
मेशितुः ५ ब्रह्मादिसर्वभूतानां महांतं परमेश्वरं इत्थं मां नाद्रियं
ते वा निंदंत्येवाविवेकिनः ६ तस्मात्तद्रूपमेवास्ति मूढत्वमस्येति चा
ध्वनिः ७ । ११

नीलकंठीटीका १२

एवंभूतं मां संतं मूढाः अवजानंति यतो मानुषीं तनुमाश्रितं मनुष्यदेहे
न व्यवहरंतं मम परं प्रकृष्टं भावं तत्वमजानंतः भूतानां महेश्वरं मा
मवजानंतीति संबंधः ११ ॥

+ एवंपरापरात्मत्वेनसाधारणात्मगुणोल्लंघयित्वाप्रकृतिविकारोपाधिभिर्नानात्वंप्रतिपन्नस्या
परस्मात्मनोजीवस्यैवगुणोल्लंघयित्वाउपक्रममाणः अव्यक्तंव्यक्तिमापन्नमितिसमस्तमय
ुक्तंतदेवार्जुनस्याविश्वासदाढ्यार्थंपुनराह ॥+

श्री
गी टी
न

47

आनंदीटीका १२

+ मूढाअहंकारात्मनात्मसामोहितास्समास्तज्ञानाजीवाः ममाव्ययंज
न्मादिविकाररहितं अनुत्तमंसर्वतत्वोर्ध्ववर्तिनंपरंभावस्वरूपलक्ष
णंपरमैश्वर्यस्वभावमजानंतः मांमानुषींतनुमाश्रितमवजानंतिअ
यमपिकश्चित्सामान्योजीवोमनुष्याद्युत्पन्नइत्यवगणयंति [illegible]
[illegible] ॥

एवमज्ञत्वैश्वर्यैकास्पदं ॥ रामकंठीटीका १४

मूढामायाभृषितनरवत्तानामांयथोक्तस्वभावमवजानंति निरतोदि
तनिरतिशयप्रकाशप्रद्योतनस्वभावमपिमोहबलोत्साहाविच्छेदा
मज्ञिस्तामायामप्यवस्तामाश्रयंतिकीदृशंमामवजानंतिमानुषींतनु
माश्रितं मानुषीग्रहणमुपलक्षणार्थं तेनमनुष्यादिभेदेनासोमभि
मानतनाकृतिविशेषरूपांपारमार्थिकस्वरूपतिरोधानतिरस्कारिणीं
माश्रितमतएवतेमूढाकीदृशंमामवजानंति एवंविधयामन्मायया
मदीयंपरमेतस्मानानाचेतनाचेतनभावलक्षणप्रपंचाद्विलक्षणं
तथाव्ययमविनश्वरमतएवानुत्तमम्मत्तनरोत्तरंविचार्यमाणप्रकर्षेसम
विद्यमानोमत्तउत्तमः प्रकृष्टोयस्मात्तंतथाविधंपारमार्थिकीस्वनाम
जानंतः संतोमामेवविमर्शाभावादवध्यमानायतस्तेमूढाः संतः ॥

एवमज्ञत्वैश्वर्यैकास्पदमपि ॥ लासिकी [illegible]टीका १५

मूढाअविवेकिनोजनामामीश्वरंमनुष्याकारंशुद्धसत्वमयीमपित
नुंदेहंकारणेनाश्रितवंतमवजानंतिअवममन्यंते मनुष्यादिवन्नद
शाविधसर्गव्यतिरिक्तईश्वरोयेनोपलभ्यते सकथमस्तीतिकुतश्चा
ह ममपरमुत्कृष्टंभावंपारमार्थिकंस्वभावमजानंतोनुपलभमानाः
कीदृशंभूतानांमहान्तमीश्वरंहातन्मोणयथेष्टविनियोक्तारं [illegible] ॥

पंचोलीटीका

एवंमांनित्यशुद्धबुद्धमुक्तस्वभावंसर्वज्ञंत्वनामात्मानमपिसंतं
केचित्तुदुरात्मानोनाद्रियंतेइत्याह अवजानंतीतिमूढाः अ
विवेकिनः ममभूतमहेश्वरंसर्वभूतानांमहांतमीश्वरंपरमुत्कृ

हंभावंपरमार्थतत्त्वमजानंतः मांमानुषींतनुंमनुष्यदेहंआश्रितम
वजानंतिअवगणयंति ११

स्नावीरसमिद्धोधिनी ॥

अवजानंतीति मूढायथाप्रतिपादितत्तानन्यास्माष्वप्रकृ
त्याश्रिताजनामनुष्यशरीरिणंमामवजानंति मानुषीमितुप
लक्षणमन्यासामपितनूनां यद्यप्यमीश्वरःस्यात्तर्हिदिव्यस्वरूपं
परित्यज्यमानिंद्यामनित्यांचमनुष्यादीनांतनुंकिमित्याश्रयेत अ
तोयमप्येकोस्माकंमध्येअन्येएवंरूपामवज्ञामाश्रयंति कीदृशाः
संतः ममभूतमहेश्वरंसर्वजगदीश्वरंपरंस्वरूप अस्मान्मनुष्य
शरीरान्रूपेवर्तमानंचभावस्वरूपमजानंतः ममाव्ययमनुत्तम
मितिपाठेपरंस्वरूपमनुत्तममखंडितफलेवाभिप्रायंदुष्टमना
दिलक्षणांमर्यादांतियमनलक्षणांवाजानंतः ११ ॥

मधुभाष्य

अवजानंतीत्यादिना मानुषींतनुं मूढानांमनुष्यवत्प्रतीतं न
तुमनुष्यरूपं उक्तंचमोक्षधर्मे यत्किंचिदिहलोकेवैदेहबद्धं
विशांपते सर्वंपंचभिराविष्टंभूतैरीश्वरबुद्धिजैः ईश्वरोहिजग
त्स्रष्टाप्रभुर्नारायणोविराट् भूतांतरात्मावरदःसगुणोनिर्गु
णोपिच भूतप्रलयमव्यक्तंशृणुष्वनृपसत्तमेतिच अवतार
प्रसंगेचैतदुक्तं अतोनावतारास्तुदृष्टकर्माकाः रूपाण्यनेका
न्यसृजत्प्रादुर्भावभवायसः वाराहंनारसिंहंचवामनंमानुषं
तथेति नवैवप्रथमसर्गकालएवावताररूपविभागस्तुउक्तः अ
तोनतेषांमानुषत्वादिविनाश्रांति भूतंमहदीश्वरंवेतिभूतमहे
श्वरं तथाहिबाभ्रव्यशाखायां अनाद्यनंतंपरमंमहांतंरूपमीशं
वरेण्यमपिवीर्यमिति अस्यमहतोभूतस्यनिश्वसितमितिच अथ
गुणोहिनब्रह्मविकाधिकमहत्ताजिकेतिच मोक्षधर्मे ११ ॥

भाषा अनुवाद

और जो कहो कि ऐसे जो परमेश्वर तमतो तमको कोई कोई आद
र नहीं क्यों करतेहैं तो दो श्लोकसे कहतेहैं कि सर्व भूत के ईश्वर
जो हमसो हमारा परमतत्व जो लोग नहीं जानते तेई मूढ हमा
रा निरादर करतेहैं इसमे कारण यहहै कि हम विशुद्ध सत्व रूप
होयके भी अपने भक्तोंकी इच्छा वशते मनुष्यके नाई शरीर ध
रते औ तैसे ही कर्म्म करतेहैं इससे लोग अपने समान मानते
११।

दोहा

मानुष तनको आश्रितजानत मोकोंमूढ भूतेश्वर नजान
मोहिपरं भाव मम गूढ ११॥

49

मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः राक्षसी
मासुरीं चैव प्रकृतिं मोहिनीं श्रिताः १२

शाङ्करभाष्यं १

कथं मोघाशेति मोघाशा वृथा आशा आशिषो येषां ते मोघाशास्त
था मोघकर्माणो यानि चाग्निहोत्रादीनि तैरनुष्ठीयमानानि कर्माणि
तानि च तेषां भगवत्परिभवात् स्वात्मभूतस्यावज्ञानान्मोघान्येव निः
फलानि कर्माणि भवन्तीति मोघकर्माणस्तथा मोघज्ञानाः मोघं
निःफलं ज्ञानं येषां ते मोघज्ञानाः ज्ञानमपि तेषां निःफलमेव स्यात्
विचेतसो विगतविवेकाश्च ते भवन्तीत्यभिप्रायः किञ्च ते भवन्ति रा
क्षसीं रक्षसां प्रकृतिं स्वभावं आसुरीमसुराणाञ्च प्रकृतिं मोहनीं
मोहकरीं देहात्मवादिनीं श्रिता आश्रिताः छिन्धि भिन्धि पिब खाद
परस्वमपहरेत्येवं वदनशीलाः क्रूरकर्मकर्त्तारो भवन्तीत्यर्थः असु
र्या नाम ते लोका इति श्रुतेः १२

आनन्दगिरिकृतटीका २

भगवन्तमवजानतां प्रसङ्गपूर्वकं प्रोक्तं विशदयति कथमिति भग
वन्निन्दापराणां न काचिदपि प्रार्थनार्थवतीत्याह वृथेति ननु भगव
न्तं निन्दतोऽपि नित्यं नैमित्तिकमपि कर्मानुतिष्ठन्ति तदनुष्ठानाच्च तेषां
प्रार्थनाः सार्था भविष्यन्तीति नेत्याह तथेति परिभवस्तिरस्करणं अ
वज्ञानमनादरणं तेषामपि शास्त्रार्थविज्ञानवतां तद्द्वारा प्रार्थनार्थ
वत्तेत्याशंक्याह तथा मोघेति तथापि यौक्तिकविवेकवशात्तत्सार्थ
तास्तत्फलमित्याशंक्याह विचेतस इति न केवलमुक्तविशेषणवत्त्वमे
व तेषां किन्तु वर्त्तमानदेहपातादनन्तरं तमस्यतिक्रूरयोनिप्राप्तिश्च
निश्चितेत्याह किञ्चेति मोहकारीमिति प्रकृतिद्वयेऽपि तुल्यं विशेषणं छि
न्धि भिन्धि पिब खादेति प्राणिहिंसापरो रक्षसां स्वभावोऽसुराणां स्व
भावस्तु न देहिनो यद्यपि परस्वमेवापहरेत्यादिरूपः मोहो मिथ्याज्ञा
नं उक्तमेव स्फुटयति छिन्धीति १२

श्री
गी टी
न

50

स्वामिकृतटीका ३

किंच मत्तोन्यद्देवतांतरं क्षिप्रफलं दास्यतीति एवंभूता मोघा निष्फलैव आशा येषां ते अतएव मद्विमुखत्वात् मोघानि व्यर्थानि कर्माणि येषां ते मोघमेव नानाकुतर्काश्रितं शास्त्रज्ञानं येषां ते अतएव विचेतसो विक्षिप्तचित्ताः सर्वत्र हेतुः राक्षसीं तामसीं हिंसादिप्रचुरां आसुरींच कामदर्पादिबहुलां मोहनीं बुद्धिभ्रंशकरीं प्रकृतिं स्वभावमाश्रिताः संतो मामवजानंतीति पूर्वेणैवान्वयः १२

पैशाचभाष्यटीका ४

कथंभूतास्ते अजानंत इत्यत आह मोघा आशा येषां ते मोघाशाः मोघप्रार्थनाः मृगतृष्णा जलपिपासावत् मोघानि कर्माणि येषां ते मोघकर्माणः मृगतृष्णोदकपिपासास्वर्गतृष्णमोघज्ञानं येषां ते मोघज्ञानाः मृगतृष्णा जलज्ञानवत् विचेतसः विगतविवेकाः राक्षसीयं राक्षसी प्रकृतिस्तामसी असुराणामियमासुरी प्रकृतिः तामसी राजसी मासुरी चैव प्रकृतिं मोहिनीं श्रिताः १२

रामानुजभाष्यटीका ५

मोघाशेति ममममनुष्यत्वे परमकारुण्यादिपरत्वनिरोधनकरीं राक्षसीं आसुरींच मोहिनीं प्रकृतिमाश्रिताः मोघाशाः मोघवांछिताः मोघकर्माणो मोघारंभाः मोघज्ञानाः सर्वेषु मदीयेषु सचराचरेषु मयि च विपरीततया निष्फलज्ञानाः विचेतसः सर्वत्र विगतयथार्थज्ञाना मां सर्वेश्वरं इतरसमं ज्ञात्वा अपलपयंते कर्तुमिच्छंति यच्च दिष्टपारंभान कुर्वते तत्सर्वं मोघं भवतीत्यर्थः १२

अभिनवगुप्तकृतटीका ६

तेषां कर्मज्ञानमाकांक्षाचेति सर्वं निष्फलमवस्तु विषयत्वात् आसुरीं राक्षसीं चेति उद्धिक्तरजस्तमो धर्माण इति १२

परमार्थप्रपाटीका ७

८५ अथ तेषां मूढत्वमेव प्रकटयति मोघाशा इति मोघा निष्फला तद्देवतोपासनया क्षणभंगुरा तुच्छफलाशा येषां ते अतएव मद्विमुखत्वान्मोघानि संतानि कर्माणि येषां ते तथा मोघं कुतर्काश्रितं ज्ञानं येषां ते वि

चेतसो विक्षिप्तचेतसः अथ सर्वत्र हेतुमाह राक्षसीमित्यादि राक्षसीं ता
मसीं हिंसाप्रचुरां आसुरीं कामक्रोधदर्पबहुलां मोहिनीं बुद्धिभ्रंशकरीं
प्रकृतिं स्वभावमाश्रिताः सन्तो मामवजानन्तीति शेषेणान्वयः तदुक्तं का
विद्यामोहस्मृतिः परपुरुषरता राक्षसी प्राङ्दासीत्सा गर्भिण्येभिकौचविष
ममज्ञनयत्सुचप्रतामिथाने यास्येकं नीचमार्गे रतिजडमपरं धावतीतस्त
तोमत् वाद्यातः स्मयममहरति तदपरं किंपुनस्तत्समाजः इति १२

वनमालीटीका ८

तेषामज्ञानफलमाह मोघाशा इति ईश्वरं विनैवाकर्माण्येवास्मत्फले
दास्यतीत्येवंरूपा मोघा निःफलैवाशा फलप्रार्थना येषां ते अतएवेश्वरवि
मुखत्वात् मोघानि श्रममात्ररूपाण्यग्निहोत्रादीनि कर्माणि येषां ते मोघ
मीश्वराप्रतिपादककुतर्कशास्त्रजनितं ज्ञानं येषां ते कुतएवं यतो विचेतसो
भगवदवज्ञाजनितदुरितप्रतिबद्धविवेकविज्ञानाः किं च ते भगवदज्ञा
नाद्राक्षसीं तामसीं अविहितहिंसाहेतुद्वेषप्रभावां आसुरीं राजसीं शास्त्रा
नभ्यनुज्ञातविषयभोगहेतुरागप्रभावां च मोहनीं शास्त्रीयज्ञानभ्रंशहेतुं
प्रकृतिं स्वभावमाश्रिता एव भवन्ति १२

कुसमवैजयन्तीटीका ९

ननु सर्वेश्वरं त्वामवजानतां तेषां का गतिः स्यादित्यपेक्षायां विशेषणाक
थनेनैव तद्गतिमाह मोघाशा इति मोघाशाः मोघा व्यर्था आशा ऐहि
कामुष्मिकफलभोगप्राप्तिरूपा येषां ते तथा तेष्वस्मिकादिदेवभक्ता अपि
मद्देवताज्ञानात्तेषां सर्वाः स्वर्गभोगेच्छा न सिध्यन्तीत्यर्थः मोघकर्माणो मो
घं निष्फलं कर्माग्निहोत्रादिरूपं कर्म येषां ते तथा मद्देवताज्ञानात्तेषां सर्वं नित्य
नैमित्तिकादिलक्षणं निष्काममपि सर्वं परिश्रममात्रफलं भवतीत्यर्थः मोघ
ज्ञाना मोघं व्यर्थं ज्ञानं शास्त्रीयमनुभवरूपं वा येषां ते तथा मद्देवताज्ञानात्तेषां
सर्वं ज्ञानमयथार्थरूपत्वेन विपरीतं भवतीत्यर्थः ननु चित्तस्य स्वभावतया नैव
मस्मेवं कुतस्ते भवन्तीति चेत्तत्राह विचेतसः विगतविपरीतप्राप्तं चेतो ये
षां ते तथा मद्देवताज्ञानात्तेषां चित्ते शास्त्रप्रतिपाद्यवस्तुयाथात्म्यस्वरूपस्फूर्ति
र्नष्टा भवतीत्यर्थः तथोक्तं भुह्वेस्वं वेयोवेनिर्भोग्निके देहकृतस्य परमात्मनः
स सर्वस्याहदिः कार्यः श्रौतस्मार्तविधानतः अर्चनस्यावलोकापि स चे

श्री
गी टी
न

लब्धानमाचरेदिति अत एव राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः राक्ष
सी हिंसादिप्रचुरा तामसी आसुरी कामगर्वादिबहुला राजसी मोहिनी स्वपर
स्वरूपग्रहणादिविवेकविलोपिनी प्रकृतिं स्वभावं श्रिताः आश्रिताः निरयनिवा
साही क्लिष्टत्वमनिंद्यास्ते दुर्गतिरूपां गतिं प्राप्नुवंतीति भावः १२

तेच भगवदज्ञाननिंदनजनितम मधुसूदनीटीका १० हाडुरितप्रतिबद्धबुद्धयो निरंतरं निरयवासा

र्हाएव — ईश्वरमंतरेण कर्माण्येव नः फलं दास्यंतीत्येवंरूपा मोघा निष्फलैवाशा फल
प्रार्थना येषां ते अत एवेश्वरविमुखत्वान्मोघानि श्रममात्ररूपाण्यग्निहोत्रा
दीनि कर्माणि येषां ते तथा मोघमीश्वराप्रतिपादककुतर्कशास्त्रजनितं ज्ञा
नं येषां ते कुत एवं यतो विचेतसो भगवदवज्ञानजनितदुरितप्रतिबद्धवि
वेकविज्ञानाः किंच ते भगवदज्ञानवशात् राक्षसीं तामसीमविहित
हिंसाहेतुद्वेषप्रधानां आसुरीं च राजसीं शास्त्रानभ्यनुज्ञातविषयभोगहे
तुरागप्रधानां च मोहिनीं शास्त्रीयज्ञानभ्रंशहेतुं प्रकृतिं स्वभावमाश्रिता
एव भवंति ततश्च त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः कामः क्रोधस्त
था लोभस्तस्मात्कनरकद्वारभागितया नरकयातनामेव ते सततमनुभवंती
त्यर्थः [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] १२

सदानन्दीटीका ११

तेश्रीनारायणावज्ञानिंदनोद्भूतपातकैः विभ्रांतबुद्धयो नित्यं निरयार्हा
इतीर्यते १ फलं दास्यंति कर्माणि विनेश्वरमपत्नतः इत्येवं निष्फलैवा
शा येषां ते व्यर्थजीवनाः २ अत ईश्वरवैमुख्याच्छ्रममात्रात्मकानि च अग्नि
होत्रादिकर्माणि येषां ते व्यर्थचेष्टिताः ३ तथैव निष्फलं येषां ज्ञानं शास्त्रांतकु
तर्कजं ईशनिंदादिजैः पापैः प्रतिबद्धधियो यतः ४ मदवज्ञावशात्ते च राक्ष
सीं तामसीं जनाः तथा हिंसाद्यहेतुद्वेषप्रधानामासुरीं तथा ५ शास्त्र
निषिद्धभोगादिरागलोभादिकारिणीं मोहिनीं शास्त्रजज्ञानभ्रंशहेतुं प्र

51

माश्रिताः ९ प्रकृतिं दुःखभावाद्योनिरयार्हान्तनमश्नुते ९ । १२

नीलकंठीटीका १२

मद्वक्तानाश्वतेमोघाशाः वृथैव आशा आशिषो येषां ते मोघाशाः
तथा मोघकर्माणः निष्फलोद्योगाः मोघज्ञानाः निष्फलज्ञानाः
यतो विचेतसः निर्विवेकाः यतो राक्षसीमासुरींच राजसतमःप्रधानां
मोहिनीं मोहकरीं प्रकृतिं श्रिताः छिंधि भिंधि पिब खाद परस्वमपह
रेत्येवंशीलाः क्रूरकर्माणो भवंतीत्यर्थः १२

मूढत्वमेवलक्षयति ॥

आनंदीटीका १३

मोहिनीं तमसः प्राचुर्येण ज्ञानमाच्छादयंतीमासुरीं राक्षसीं च प्रकृ
तिमाश्रितानां जीवानां विचेतसां विगततत्त्वज्ञानानां मां परमेश्वरमभ
जतां यद्देवदास्यामीत्यादिवत्स्माणाशास्त्रहापि मोघा विरुद्धफलैव
तेषामित्यन्निरयपतनोक्तेः तथैव कर्म क्रियमाणं मोघमेव तेषां ज्ञान
मपि वत्स्माणं विरुद्धमेव १२

रामकंठीटीका १४

मोहनीं स्वभावाज्ञानकारिणीं प्रकृतिं गुणमयं स्वभावं श्रिता देहात्मका
हंकारनिबंधनस्थितयो तएव कीदृशीं प्रकृतिमासुरीं रजोलेशानुगत
तमःप्रधानां तथा राक्षसीं केवलतमःप्रधानां शुभमाधमाः स्वरसर्ग
भेदत्वेन प्राक्प्रस्तावनायामुक्तस्वरूपां यत एवंविधां प्रकृतिं श्रिताः
ततो मोघाशा मोघा फलशून्या आशा येषां ते तथाविधाः ते ह्यासुरराक्ष
सप्रकृतित्वाद्रजस्तमोमयत्वे सति कामात्मानो भोगविषयं संकल्पं कु
र्वंति न तु तत्फलप्राप्तिहेतुं शास्त्रोदितं कर्मारंभंते ततो मोघाशा इत्यु
क्तं तथा मोघकर्माणो यदपि कर्मारंभंते तत्त्वज्ञानोपायनियमाभावा
न्मोघं निष्फलं येषां ते तथाविधाः वस्तुतो हि राजसतामसयोः कर्मणोर्ल
क्षणं तद्यथा यत्तु कामेप्सुना कर्म साहंकारेण वा पुनः क्रियते बहुलायासं
तद्राजसमिति स्मृतं अनुबंधं क्षयं हिंसामनवेक्ष्य च पौरुषं मो
हादारभ्यते कर्म यत्तत्तामसमुच्यते इति तथैवंविधं कर्तृलक्षणमपि
रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः हर्षशोकान्वितः कर्ता रा
जसः परिकीर्त्यते तथा अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः

श्री
गी टी
न

5

विषादीदीर्घसूत्री च कर्त्ता तामस उच्यते तथा मोघज्ञाना आस्तिकी र्वि
तकर्मा निष्फलिहेतवा कर्मारंभश्चर्वता वित्तानमपि मोघं निष्फलमे
षां तेन श्लोका: स्नानपूर्वकं हि कर्म स्नानं सेवचाहुरादि प्रकृत्याश्रि
तत्वात्संबंधिनो विपर्ययप्रतिपत्तिदोषसंबंधात्कर्मफलेन विसंवा
दान्निष्फलता स्थिनैव तथा चैवं विधत्वानलक्षणमपि वक्ष्यति इ
थमेकेन तु यज्ज्ञानेन नानाभावान्पृथग्विधान् वेत्ति सर्वेषु भूतेषु मद्रा
जसमिति स्मृतं तथा यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहेतुकं
अतत्वार्थवदल्पं च तत्तामसमुदाहृतमिति मोघज्ञाना विचेतसः
नत्वार्थनिष्ठ नाभावात्सदपि विगतं सम्यग्ज्ञानलक्षणं सकार्याकर
णाद्विद्यमानमेव चेतोंतःकरणं येषां ते तथाविधाः [illegible]
माया क्रोडीकृता णामासुरप्रकृत्याश्रितानां [illegible]
[illegible]
[illegible] १२ लासिकी [illegible]टीका १५

किंच तेषां कर्मज्ञानमाकांक्षा च सर्वं निष्फलमवस्त्वविषयत्वात् यतो वि
चेतसो विवेकशून्याः तथा ऽसुरीमुद्धिक्तरजसं कामदर्पादिबहुलां रा
क्षसीम् तामसीं हिंसादिबहुलाम् मोहिनीं स्वभावाच्छादिकां प्रकृतिं नी
स्वभावमाश्रिताः संतः मामवजानन्ति इति शेषेणैवान्वयः [illegible]
[illegible] १२

पंचोलीटीका

यतो नाङ्गीकुर्वंतः अत आह मोघाशेति यत एव मोघाशाः निःफलक
ताभिलाषाः परमेश्वरं भगवतं या फलाशया कर्माणि प्रवृत्ताः अ
त एव फलदातुः भगवतो नाम्नो मोघकर्माणः अत एव मोघज्ञाना वि
चेतसः विगतविवेकाः राक्षसीं आसुरीं च मोहिनीं मोहकरीं प्रकृ
तिं स्वभावमाश्रिताः मामवजानंति भगवतमिति १२

रामाकीरमामिहोमिनी॥

मोघाशा इति निष्फलं तेषां तत्तल्लोकाभिलषणं तदर्थं कर्म

तुष्टानेन्नानेनवायथार्थं भवति तेषांचित्तंच इदंकर्तव्यमिदंने
तिविवेकास्खलतीत्यर्थः यतस्तेरागत्वसा स्वसंबंधिनेस्वभा
वे किंकर्तव्यतायांमोहोत्पादकेश्रिताः ॥१२॥

मध्वभाष्य

तेषांफलम् मोघाय इति भगवद्द्वेषिभिरप्यासितमानुषि
कंनकिंचिदाप्यते सत्त्वादिकर्माणिचतेषांद्वेषेव ज्ञानंचके
नापिब्रह्मरुद्रादिभक्त्याद्युपायेननकश्चित्तकषार्थश्चानुषि
कस्तेनाप्यतइत्यर्थः वक्ष्यतिच तानहंद्विषतः क्रूरान्संसारे
ष्वित्यादि मोक्षयर्थमेव कर्मणामनसावाचायोद्विष्याद्विभुम
व्ययम् मज्जंतिपितरस्तस्यनरकेशाश्वतीःसमाः योहिद्वेष्टा
हिबुधश्रेष्ठंदेवंनारायणंहरिं कथंनसभवेद्वेष्यआलोकां
तस्यकस्यचिदिति सर्वोत्कृष्टेज्ञानभक्तीदिव्यस्यनारायणे
पुष्करविष्टरोपि सर्वाविमोहेषद्युतद्यतस्मिन्नृणांनतद्यो
ष्वस्यसमोनचैवेति सामवेदेशाण्डिल्यशाखायां कामात्
स्नेहाद्भयाद्द्वेषाद्यथाभक्त्येश्वरेमनः आवेश्यतदघंहित्वाब
हवस्तद्गतिंगताः गोप्यःकामाद्भयात्कंसोद्वेषाच्चैद्यादयोन
पाः संबंधाद्वृष्णयःस्नेहाद्यूयंभक्त्यावयंविभो वैरेणयंन
पतयःशिशुपालपौंड्रसाल्वादयोगतिविलासविलोकना
द्यैः ध्यायंतआकृतधियः शयनासनादौतत्साम्यमापुरनु
रक्तधियः पुनः किमित्यादिभागवते भक्तप्रियत्वज्ञापना
यैवनित्यध्यानकृत्यर्थंच स्वभक्तस्यकदाचित्पापबलात्
द्वेषिणोपिभक्तिफलं भगवान्ददातीति भक्ताएवहि सर्वे
शिशुपालादयः पापबलाद्द्वेषिणः तत्पश्चेपूर्वपार्षदत्व
पापादिकथनाचैतज्ज्ञायते अन्यथाकिमितितदप्रकृतमध्ये

त भागवतः साम्यकथनं द्वेषिणामपि तुप्पूर्ववतनमुक्ति
फलमेव ददातीत्यतिव्यापयितुं न मे भक्तः प्रणश्यतीति नव
भावो हि भावकारणमित्यादि विरोधः द्वेषभाविनां द्वेषएव भ
वतीति हि युक्तम् अन्यथा गुरुद्वेषिणामपि गुरुत्वं भवतीत्य
तिप्रसङ्गापत्तेः न चाकृतार्थत्वे विशेषः तेषामेव हिरण्यकशि
पादीनां पापप्रतीतेः हिरण्यकशिपुश्चापि भगवन्निंदया त
मः विविक्षुरत्यगात् सूनोः प्रह्लादस्यानुभावतः इति यदनिंद
त्पिता मऽयं त्वद्भक्ते मयि वापवान् इत्यादि रम्य तस्मात्पिता
मे पूयेत दुरंताद् दुस्तरादघात् इति प्रह्लादेन भगवतो वरया
चनाच्च तत्र द्वेषस्य प्रतिषेधः कुत्रचिद्दैवत उक्तिरिति विशे
षः यस्मिन्नुक्त्यैवैतच्च निषिध्य उक्तः मद्दासानामपि विरो
धः श्लोकः पुरस्तात् प्रयुक्ति मद्भयोग्युक्तिमन्येव बलवंतीवा
क्यानि युक्तश्लोकान्येषां न च तेषां काविकृतिः साम्ये
पि वाक्ययोर्लोकानुकूलं न च कूलयोर्लोकानुकूलमेव
बलवत् लोकानुकूलत्वं च भक्तप्रियत्वं नेतरत् उक्तं च ते
षां पूर्वं भक्तत्वं मन्ये हरान्भागवतान्ह्ययीशो सरम्भमार्गा
भिनिविष्टचित्तान् इत्यादि अतो न भगवद्द्वेषिणां काचि
त्क्षतिरिति सिद्धं द्वेषकारणमाह राजसी मिति नेतरे द्वि
षंतीति दर्शयितुं देवानाह १२॥

भाषा अनुवाद

और जो मनुष्य हमसे भिन्न और देवतोंसे कि शीघ्र फल देय गे ऐसी निःफल आशा करते हैं और हमसे विमुख जो फलके हेत कर्म्म करैं हैं और जिनके शास्त्रसे जो ज्ञान सो नाना कुतर्क युक्त है वेई सकल विचेतस कहे विक्षिप्त चित लोग अनर्थ के हेत हिंसादि तामस कर्म्म तथा काम अभिमान से भरी ऐसी जो राजसी बुद्धि तिसके आश्रित होय हमको न जानि हमारा निरादर करते हैं १२।

दोहा

वृथा आश वृथाकर्महूं वृथा ज्ञान अनचेत राक्षस असुरस्वभाव के आश्रे मोह समेत १२॥

53

महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः भजंत्य
नन्यमनसो ज्ञात्वा भूतादिमव्ययं १३

आनंदगिरि शांकरभाष्यटीका १

केपुनर्भगवंतं भजंते तानाह येपुनरिति महान् प्रकृष्टोयत्नादिभिः
साधितआत्मा मनोयेषामितिमुख्यतिमाश्रियाह अत्रहेति नशाष्टो
वधारणेप्रकृतिं विशिनष्टिशमेति अनन्यस्मिन्मत्यभूतेमयिपरस्मि
न्नेवमनोयेषामितिमुख्यतयाव्याकरोति अनन्यचित्ता इति अन्तानेमेवा
नुपपत्तेः शास्त्रोपपत्तिभ्यामादौ न ज्ञात्वाननंतः सेवंते इत्याहज्ञात्वेति १३

शांकरभाष्य आनंदगिरिकृतटीका २

येपुनः श्रद्दधानैः भगवद्भक्तिलक्षणे मोक्षमार्गे प्रवृत्ता महात्मानस्तु
अक्षुद्रचित्तास्ते मामीश्वरं पार्थ दैवीं देवानां प्रकृतिं शमदमदयादिल
क्षणामाश्रिताः संतो भजंति सेवंते अनन्यमनसोऽनन्यचित्ता ज्ञात्वा भू
तादिं भूतानामादिकारणमव्ययं १३

स्वामिकृतटीका ३

केतर्हि त्वामाराधयंतीत्यतआह महात्मान इति केमहात्मानः कामाद्य
नभिभूतचित्ताः अतः अभयं सत्त्वसंशुद्धिरित्यादिनावक्ष्यमाणां दैवीं प्रकृति
माश्रिताः अतएवमव्यतिरेकेणनास्त्यन्यस्मिन् मनोयेषां ते भूतादिंज
गत्कारणमव्ययं नित्यंच मां ज्ञात्वा भजंति १३

पैशाचभाष्यटीका ४

महात्मानः प्रशस्तांतःकरणाः मामीश्वरं त्वा पार्थ देवानामियं दैवी सा
त्विकी तामाश्रिताः भजंति सेवंते अनन्यमनसो न विद्यते ईश्वराद्न्यत्र
मनो येषां ते अनन्यमनसः ज्ञात्वा अनुगम्य भूतादिं मां सकलभूतानांतः म
करणमव्ययं विनाशरहितं १३

रामानुजभाष्यटीका ५

महात्मान इति येतु स्वकृतैः पुण्यसंचयैर्मां शरणमुपागम्य विध्वस्त स
मस्तपापबंधा दैवीं प्रकृतिमाश्रिता महात्मानस्ते भूतादिमव्ययं वाङ्मन
सागोचरकर्मस्वरूपं परमकारुणिकतया साधुपरित्राणाय मनुष्यत्वे
नावतीर्णं मां ज्ञात्वाऽनन्यमनसो भजंते मत्प्रियत्वातिरेकेण मद्भजने

श्री
गी टी
न

54

नविनामनसमात्मनश्चबाह्यकरणानांचधारणमलभमानामज्ञ
नैकप्रयोजनामांभजंति १३

अभिनवगुप्तकृतटीका ९ दैविकींसात्विकीम्

स्पष्टार्थं १३

परमार्थप्रपाटीका ७

केतर्हित्वामाराधयंतीत्याशंकायांत्वामनुपासकाःसंतीत्याह महात्मा
नइति महान् कामक्रोधजयशीलआत्मामनोयेषांतेमहात्मानः
दैवींमोक्षसाधनीभूतांप्रकृतिंस्वभावंआश्रिताःसंतःअनन्यमनसः
अव्यभिचारिणाभक्त्योपेतामद्भक्तामांसगुणब्रह्मत्वेनभजंति ज्ञानि
नस्तुमामव्ययमनाद्यंतंभूतादिंस्थूलसूक्ष्मप्रपंचकारणीभूतंनिर्गु
णब्रह्मरूपंज्ञात्वाभजंति १३

वनमालीटीका ८

भगवदेकशरणाएवभगवंतंभजंतेसर्वोक्तंत्वनमंतानेलभंतेचेत्या
ह महेतिमहाननेकजन्मकृतसत्कृतैःसंस्कृतःत्वद्कामाद्यनभिभूत
आत्माचित्तंयेषांतेअभयंसत्वसंशुद्धिरित्यादिवक्ष्यमाणांदैवींसात्विकीं
प्रकृतिमाश्रिताःनविद्यते मदन्यस्मिन्मनोयेषांतेभूतादिंसर्वजगत्का
रणमव्ययंसदेकाकारंमांसर्वेश्वरंसदनंतगुणालयंज्ञात्वाभजंतेसेव
तेततस्तादृशंमामपरोक्षीकुर्वंतिततोमत्प्रसादेनसंसारान्मुच्यंतइ
तिभावः १३

कुसुमवैजयंतीटीका ९

ननुयेत्वमानुषींतनुमाश्रितंत्वामाद्रियंतेतेकीदृशाःसुविस्पष्टतायामा
ह द्वाभ्याम् महात्मानस्त्विति हेपार्थ इत्याद्युक्तयेतुमहात्मानःमहान्रा
जसतामसस्वभावरहितआत्माचित्तंयेषांतेतथा रागलोभादिप्रकृतिविर
हिताइत्यर्थः महान्महान्प्राकृतविषयवासनाशून्यः आत्माचित्तंयेषांते
तथा यद्वा महान्कामक्रोधाद्यनभिभूतआत्मामनोयेषांतेतथा [illegible]
[illegible] यद्वा महान्काम
क्रोधाद्यनभिभूतआत्मामनोयेषांतेतथा यद्वा महान्सुरासुरनरा
दिस्वाद्यनीयआत्मादेहोयेषांतेतथाअनेकजन्मार्जितपुण्यपुंजैर्लब्धो
यस्यायंभारतभूमौमानुषदेहोयेनकुलभक्तिपुरःसरेनाभिमानप्राकृते

48

नापि नित्यप्राकृतं दिव्यविग्रहं जना गच्छंतीति तत्रकिंच रहितेन देवदेहे
नापि वर्यं नाशमोः हो अस्मान् पिपिगीत्येवं स्वसंदेहं विनिन् एतत्क्रम
भक्तदेहस्यैव स्वाधीकुर्वन्तीत्यर्थः यद्वा महान्देवादिभिः पूजनीयः आ
त्मा देहो येषां ते तथा यद्वा महान् चेतनाचेतनब्रह्मस्वरूपविदात्मा
चित्तं येषां ते तथा इत्यनेन त्रयाणां तत्वानां मध्ये एकतमस्याप्यज्ञाना
भावे साधनानुपपत्तिरात्मनोत्ताभाव इति सूचितम् यद्वा महात्मा
नो महोदारचित्ताः परदुःखेन स्वयं दुःखितो भूत्वा तद्दुःखेतत्पराणस्व
भावा इत्यर्थः एवंभूता एव ते कुत इत्यपेक्षायामाह यतो ऽनन्यमनसः
नास्त्यन्येषु शिवब्रह्मादिदेवांतरेषु मनो येषां ते तथा विस्रंविनास्वा
भीष्टफलदं परमप्राप्यं परमाराध्यं जगत्कारणं वान्यदेवं न मन्यंत इ
त्यर्थः न देवकृतो यतो दैवीं प्रकृतिमाश्रिताः सात्विकं स्वभावमा
स्थिताः अभयं सत्वसंशुद्धिरित्यादिना वक्ष्यते यद्वा देवस्य विष्णोर्वि
मां दैवीं जीवभूतां परां प्रकृतिमाश्रिताः अहं चेतनरूपो भगवदंश
भूत इत्यंतश्चेतनरूपान्दीवक्लृप्तादिनानाविषयाकाराभूताः स्वचेष्
यामां वंचयिता सर्ववदग्रेपितं सारापक्रूपे पानयिष्यतीत्येवं विविच्या
चेतनप्रकृतिनियुक्तात्मस्वरूपेणैवावस्थिता इत्यर्थः यद्वा विष्णुदे
वस्येयं दैवी तां प्रकृतिं दमाकामप्पशौशील्यादिभगवद्गुणस्वभाव
माश्रिताः यदाराध्यस्वभावमाराधकः प्राप्नोतीति दैवतस्य कार्यं स्मि
श्रुतिशीलार्ननम्याग्म्याराधकस्य तद्गुणस्वभावप्राप्त्येव शीतन्नि
वृत्तिः स्यादित्यर्थेत्यर्थः भूतादिं भूतानां चेतनाचेतनरूपाणामादिः
कारणं तमव्ययं व्ययशून्यं नित्यमित्यर्थः साधूनां सतामवनाय सतां
[illegible] विनाशनाय
धर्मसंस्थापनाय च भूभारहरणाय च विधिशिवेंद्रादिसुरैः संप्रार्थि
तः स्वस्वाभाविकानंताचिंत्यगुणगणशक्त्यादिकमजहदेव वसुदेवगृ
हे नराकारेण स्वेच्छया वतीर्णोऽयं नारायण इति निश्चित्य मां सर्व
कारणं सर्वेश्वरं नमस्कारपूर्वकं भजंति सेवंते विशेषणत्रयेणापीह
शाल्लपवमञ्जनाधिकारिणस्त एव चेश्वरं मां स्वाधीनं कुर्वंति य
थावेकरोपि न ददात्मन्य इति द्योतितम् ॥१२॥

+ भगवद्विमुखानां फलकामनायाः तत्प्रयुक्तस्य नित्यनैमित्तिककाम्यकर्मानुष्ठानस्य तत्प्रयुक्तस्य शास्त्रीयज्ञानस्य च वैयर्थ्यात् पारलौकिकफलतत्साधनशून्यत्वेन नापीहलौकिकं किं फलमस्ति तेषां विवेकविज्ञानशून्यतया विचेतसो हि ते अतः सर्वपुरुषार्थबाह्याः शोच्या एव नाके सर्वपुरुषार्थभाजो शोच्याः ये सर्वेषां ते च काराङ्न्वकं अथ

मधुसूदनीटीका १

श्री भगवदेकशरणास्तु उच्यते ॥

गी टी ९

+ महानेनेकजन्मकृतसुकृतैः संस्कृतः क्षुद्रकामाद्यनभिभूत आत्मा अन्तःकरणं येषां त एव अभयं सत्त्वसंशुद्धिरित्यादि वक्ष्यमाणां दैवीं सात्त्विकीं प्रकृतिमाश्रिताः अतएवास्मिन्मत्व्यतिरिक्ते नास्ति मनो येषां तेऽनन्यमनसो भूतादिं सर्वजगत्कारणमव्ययमविनाशिनं च मामीश्वरं ज्ञात्वा भजन्ति सेवन्ते [illegible]
[illegible] १३

सदानंदीटीका ११

फलाशाकर्मचज्ञानमैहिकामुष्मिकार्थदं भगवद्विमुखानां स्याद्वि
फलं मूढचेतसां १ अतः सर्वपुमर्थेभ्यो बाह्याः शोच्यास्त एव च वराका
इति संप्रोक्तमिदानीं केतरे नराः २ भगवच्छरणा ये स्युः पुरुषार्थैक
भागिनः अशोच्याः सेति शिष्टानां तत्राह भगवान्स्वयं ३ बहुजन्मा
र्जितैः पुण्यैर्येषां धीः संस्कृता भवेत् कामैरनभिभूतास्ते महात्मानो
गुणाकराः ४ अभयं सत्त्वसंशुद्धिरित्यादिप्रकृतिं श्रिताः अतएव च
नान्यस्मिन्मनो येषां हि गोचरे ५ ते मां सर्वजगद्धेतुमविनाशिनमी
श्वरं ज्ञात्वाचार्योपदिष्टेन सेवन्ते वैदिकाध्वना ६। १३

नीलकंठीटीका १२

तथा ये महात्मानः अक्षुद्रचित्ताः तु शर्वेभ्यो संतं विलक्षणाः मां भ
जन्ति यतो दैवीं प्रकृतिं सत्त्वप्रधानां आश्रिताः अनन्यमनसः एकाग्रचेतसः किं
गतानुगतिकतया देवेन वा भजन्ति न किं तर्हि मां भूतादिं सर्वस्य
कारणं अव्ययं ज्ञात्वा मां वा भजन्ति १३

आनंदीटीका १३

महात्मा राजसतामसी अभिभूय सत्त्वाविर्भावात् शुद्धिः आत्मा येषां ते
[illegible] १३

रामकंठीटीका १४

+ प्रस्तावनाप्रतिपादितपरापरस्वरूपमय्याः परस्या दैव्याः प्रकृतेर्दै
वीसंपज्ज्ञानविवेकद्योतनशीलत्वाद्देवशब्दवाच्यानां संबन्धिनी
प्रकृतिस्स्वभावमाश्रिताः अत एव महात्मान उत्कृष्टस्वभावा मां प

+ एवमेकान्ततो मायाक्रीडीकृतानां आसुरप्रकृत्याश्रितानां बहिर्मुखत्वं प्रतिपाद्य विद्यानुगृहीतानां ग्रहनिवृत्तिविषयशास्त्रोपदेशमात्रश्रद्धानानां देवप्रकृत्याश्रितानां प्रतिपिपादयिषुः परदेवप्रकृत्याश्रितानां भावनां प्रतिपादयितुमाह ॥+

रमात्मानंभजंतेचतर्विधसेवया अनन्यमनसोमद्व्यतिरिक्तवस्तु
न्यत्राभावप्रवृत्तप्रतिपत्तिनान्मय्येवैकस्मिंस्तेषांमनोयेषांतेतथा
विधाः तानाचान्नुष्ठानमितिनिश्चितेः कीदृशंमांविदित्वाभजंतेभूता
दिं भूतानांचेतनाचेतनानांमध्येआदिंप्रथमं तथाव्ययंनित्यत्वा
न्मनत्वयोविद्यतइत्यर्थः सर्वभूतान्यापन्तवन्ति अहमादिरेवना
त्नवानित्यत्रनात्पर्यं [illegible] १३

केपुनस्त्वांभजन्तेइत्यत लासिकी [illegible]टीका १५

आह- नतेभ्योवैलक्षण्ये दैवींसात्विकींशमदमादिलक्षणांप्रकृतिंस्वभाव
माश्रिताजनाः अनन्यमनसोनविद्यतेमत्तोन्यस्मिन्कामेफलादौमनोये
षांतेतादृशाःसन्तः शास्त्रतोगुरूपदेशतोवामामुक्तलक्षणमीश्वरं
ज्ञात्वाप्रमाणेननिश्चित्यभजन्ति परप्रेमास्पदीकृत्योपासते कीदृ
शंमांभूतादिं भूतानांचराचराणामादिंकारणम् तथाव्ययमक्षयं
तेतमहात्मानःसर्वेनमाः [illegible]
[illegible] १३

पंचोलीटीका

ते:पुनःश्रद्धयानाभगवद्भक्तिलक्षणेमोक्षमार्गेप्रवृत्तामामाश्रि
यंतइत्याह महात्मानइति हेपार्थतेपुनःमहात्मानःअक्षुद्रवि
त्तादैवीप्रकृतिंदेवानांस्वभावंशमदमादयःश्रद्धादिलक्षणामा
श्रिताअनन्यमनसःसंतःभूतानामाकाशादीनांआदिंअव्ययंनि॰
त्यंचमांज्ञात्वाभजंति १३

रणवीरसमिद्बोधिनी॥

केपुनस्त्वांभजंतीत्याह महात्मानइति महांतोतिप्रशस्ता
आत्मानोबुद्धिधृतियत्नायेषांतेमहात्मानः प्रशस्यतरबुद्धि
धृतियत्नप्राणिनस्तेजस्विनश्चक्षत्रियप्रवराः मां अभूता
दिंनभूतः प्रागस्तआदिर्यस्यतमनादिमंतं तथाव्ययमनंतंच॰
विज्ञाय अतएव नविद्यतेन्यत्रदेवतांतरादौपुत्रमित्रदारा
गारादिषुमनोयेषांतेतादृग्भूता भजंतिप्रारणमसावितित

56

धियाश्रपद्यंते यतस्ते दैवीप्रकृतिं देवस्वभावमपय च देवानां
गत्वा मियं दैवीप्रकृतिः प्रकृष्टसत्वधर्मो विनाकृतिधेत्नोऽ
द्रदमनादिलक्षणलाभास्थितःः शुद्धादिव्यापायमाचरंत
इति यावत् १३॥

मधुभाष्य

महात्मन इत्यादिना सर्वत्रैकपवनारायणः स्थितपकाबे
न एकत्वेन सर्वतोवैलक्षण्येन न बहुधादिरूपमाभाति
शुक्लमिव लोहितमिवाथो नीलमिवाथान्येन सिति दिम
नस्तुजातीये दैवमेवापरः स्तुतःप्रकारेण बहवो बहुधा
प्रतिष्ठाते विज्ञानमाह १३॥

दोहा

पार्थ महात्मपुरुषमोहि देव स्वभावप्रभूत भजतयकमन
जान मोहि अव्ययआदिप्रभूत १३॥

सततंकीर्तयंतोमां यतंतश्चदृढव्रताः नमस्यंतश्च
मांभक्त्या नित्ययुक्ताउपासते १४

आनंदगिरि शांकरभाष्यटीका १

अथाय मविनाशिनं भजनप्रकारंइच्छति कथमिति तत्प्रकार
माह सततमिति सर्वदेति श्रवणावस्थायांगृहीतेकीर्तनंवेदांतश्र
वणे प्रवीणे जपश्च व्रते ब्रह्मचर्यादिनमस्यंतेमां प्रतिचेतसा प्र
ह्वीभवंतो भक्त्यापरेण प्रेम्णानित्ययुक्ताःसंतः तदासंयुक्ताः १४

शांकरभाष्य आनंदगिरिकृतटीका २

कथंसततंसर्वदाभगवंतंब्रह्मस्वरूपंमांकीर्तयंतोयतंतश्चेंद्रियो
पसंहारेशमदयाःहिंसादिलक्षणैर्धर्मैः प्रयतंतोदृढव्रताःदृढंस्थि
रमचलंव्रतंयेषांतेदृढव्रतानमस्यंतश्चमांहृदयेशयमात्मानंभक्त्या
नित्ययुक्ताःसंतउपासतेसेवन्ते १४

स्वामिकृतटीका ३

तेषांभजनप्रकारमाह द्वाभ्यां सर्वदास्तोत्रमंत्रादिभिःकीर्तयंतः के
चिन्मामुपासतेसेवंतेदृढानिव्रतानिनियमायेषांतादृशाःसंतोयतं
तः पाठंतेचेंद्रियोपसंहारादिषुइज्यादिषुप्रयत्नंकुर्वंतश्च केचित्
भक्त्यानमस्यंतः प्रणमंतश्चामेनित्ययुक्ताअव्यवहिताःसेवंतेभक्त्येतिनि
त्ययुक्ताइतिचकीर्तनादिष्वपिद्रष्टव्यं १४

पैशाचभाष्यटीका ४

सततमिति सततंसर्वकालेकीर्तयंतःभाषमाणाः यतंतःयत
मानाःदृढव्रताःदृढंव्रतंयेषांतेदृढव्रतसंकल्पाः नमस्यंतःनम
स्कारंकुर्वंतः मामीश्वरंभक्त्याप्रीत्यानित्ययुक्ताउपासतेसेवंतेइत्यर्थः १४

रामानुजभाष्यटीका ५

जप सततमिति अत्यर्थमत्प्रियत्वेनमत्कीर्तनयतनमस्कारैर्विनात्मा
मात्मधारणमलभमानामद्गुणविशेषवाचीनिनामानिस्मृ
त्वापुलकितसर्वांगाहर्षगद्गदकंठानारायणकृष्णवासुदेवेत्येवमा
दीनिसततंकीर्तयंतस्तथैवयजंतः यत्कर्मार्चनादिकेषु वंदनस्तवन

श्री
गी टी
त

करणादिकेषु च दृढसंकल्पा यतमाना भक्तिभरावनमितमनोबुद्ध्य
भिमानाः पद्द्वयकरद्वयशिरोभिरष्टांगैरविचिंतितपङ्ककर्दमादिषु ध
रणितलेषु दण्डवत्प्रणिपतंतः संतः मां नित्ययुक्ता नित्ययोगकांक्षमा
णा महात्मानः मम दास्यव्यवसायिनः उपासते १४

अभिनवगुप्तकृतटीका ९ यजंतो वाग्मद्वचादियोगेः

स्पष्टार्थं १४

परमार्थप्रपाटीका १

अथ भक्तानां भजनप्रकारमाह सततमिति सततं निरंतरं कीर्त
यंतो मन्नाम श्रेष्ठं कुर्वंतस्तथा दृढव्रताः निश्चितसंकल्पाः संतो
यतंतः प्रयत्नं कुर्वंतः भगवानन्तरं भेन मद्दिष्टमूर्तीर्वी नमस्य
न्तः नमस्कारं कुर्वंतः नित्ययुक्ता नियमवंत उपासते श्रुतिरपि क
स्य नूनं कतमस्यामृतानां मनामहे चारुदेवस्य नाम अग्नेर्वयं प्रथम
स्यामृतानां मनामहे चारुदेवस्य नामेति भाष्यं अमृतानामोऽलप्र
दानां उपायानां मध्ये कस्य किं नाम कस्य कतमस्य कीदृशस्य देवस्य
नाम चारु मनामहे चारु मनोरमं सुखजनकं मन्यामहे इति प्रश्नः
ऽत्रोत्तरमाह अग्नेरिति अत्र कस्येत्यस्योत्तरमग्नेरिति अग्निर्वै देवाना
मवमो विष्णुः परम इति श्रुतेः अथ कतमस्येत्यस्योत्तरमाह प्रथमस्ये
ति सर्वेषामादिभूतस्य देवस्य विष्णोरित्यर्थः १४

वनमालीटीका ८

भजनप्रकारमाह सततमिति द्वाभ्यां ब्रह्मनिष्ठं गुरुमुपसद्य वेदान्त
वाक्येनोक्तमनंतगुणानां सततं निरंतरं कीर्तयंतः श्रवणव्यापारविषयी
कुर्वंतः गुरूपसदनेतरकाले स्वयं स्तोत्रादिभिर्मद्गुणकर्मप्रधाननाम
स्तुतिभिः कीर्तयंतः यतंतः विजातीयप्रत्ययानंतरितचेतोवृत्तिप्रवाहं म
यि कुर्वंतः दृढव्रताः दृढानि प्रतिपक्षेणाचालयितुमशक्यानि अहिंसा
सत्यास्तेयब्रह्मचर्यादीनि व्रतानि येषां ते भक्त्या नित्यप्रेम्णा मां नमस्य
न्तः साष्टांगदण्डवन्नमस्कारान् कुर्वंतः चकारात् श्रवणं कीर्तनं विष्णोः
स्मरणं पादसेवनं अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनमिति नवधा
भक्तिः संगृह्यते तथा भक्त्या मद्विषयेण परेण प्रेम्णा नित्ययुक्ताः सर्व

दासंयुक्ताः तदेवं शमदमादिसाधनसंपन्ना वेदांतश्रवणमननपरा
यणाः परमेश्वरे परमगुरौ प्रेमलक्षणनमस्कारादिना च विगतविघ्नाः परिश
र्णसर्वसाधनाः संतो मामुपासते विजातीयप्रत्ययानंतरितेन सजाती
यप्रत्ययप्रवाहेण श्रवणमननोत्तरभाविना सततं चिंतयंतीति महा
त्मानः अनेन निदिध्यासनं च परमसाधनं दर्शितं एतादृशो साधन
योः कलेसति गुह्यतमं यदुक्तं भगवदर्पितोस्तं तदनायासेन भवतीति
भावः १४

कृष्णसमवैजयंतीटीका ९

केनप्रकारेण ते त्वां भजंतीत्यपेक्षायां तत्प्रकारमाह सततमिति नि
त्ययुक्ताः भाविनं नित्यमत्स्य योगकांक्षमाणाः अपि सायां श्रुतवक्ष्येति
लक्षणादर्शमानेपि श्रुतकालिकनिष्ठाप्रत्ययः महात्मानो भक्त्या केवल
यामनिष्टया श्रद्धया मां सर्वेश्वरमुपासते सेवंते यद्वा भक्त्या नित्ययुक्ता
महात्मानो [illegible] मा
मुपासते ज्ञानादिसाधनांतरापेक्षारहितेन केवलमद्भक्त्यैव नित्ययु
क्ताः संतो मदुपासनं कुर्वंतीत्यर्थः किं कुर्वंतः संतः सततं कीर्तयंतो
मां भक्त्या सततं सर्वदा देशकालावस्थादिशुद्ध्यशुद्धिविचारानपेक्षवे
नमां श्रुतिरूपेण मां कीर्तयंतः अष्टादशाक्षरादीन् मन्मंत्रान् जपंतः गोपा
लस्तवराजादिभिर्मा स्तुवंतः कवचोपनिषत्सुगीतादीनि पठंतः ममा
नंतमधुराणि मंगलगुणकर्मानुबंधीनि गोविंद गोपाल गोवर्द्धनधर
गोपीजनमनोहर नवनीतचौर रकालियमर्द्दन केशवादीनि नामानि
कीर्तयंतः उच्चस्वरेणोच्चारयंतः चयुनः भक्तानामानमस्यंतः पंचांगकरा
भ्यां जानुभ्यां उरसा शिरसा दृशा वचसा मनसा चेति प्रणामोऽष्टांगई
रितः इति रीत्या मद्विग्रहेभ्यो दंडवत्प्रणमंतः संतः द्वितीयांशे ह्येत व०
मत्कथाः शृण्वंतो मां स्मरंतो मामर्चयंतो मत्पादसेवनं कुर्वंतो मद्दासमा
त्मानं मन्यमाना मां मित्रं कुर्वंतो मय्येव सर्वमात्मात्मीयादिकमर्पयंत
इति संग्रहः तेपुनः किं कुर्वंतो यतंतः संतः स्वसमानाशयैः साधिक
बुद्धिभिर्वा साधुभिः सह मत्स्वरूपगुणश्रवणादिनिर्णयाय ये द्रियादिनि
ग्रहादिवा यत्नं कुर्वंतः यद्वा मत्प्राप्तिविरोधिनिवारणाय संसारयुक्तये
वा प्रयत्नवंतः यद्वा श्रवणकीर्तनार्चनादिषु सेवादिषु वा युक्तो त्सव

बहुतिशयानंदेन तत्तत्समयोचितं यत्नं कुर्वंत इत्यर्थः पुनः किंवि
शिष्टाः दृढव्रताः दृढानि विघ्नबाहुल्येनाप्यप्रच्युतानि व्रतान्येकाद
शीजन्माष्टम्यादीनि येषां ते यद्वा श्रवणकीर्तनार्चनवंदनादिषु
दृढानि दृढानि नियमा येषां ते तथा यद्वा भगवत्प्रसादाय। स्व
मालेपनादिकमेवाहमंगीकरोमि नान्यमिति दृढा नियमा इत्य
र्थः मामिति पदेन पुनः किं दोषावहं यत्नो मत्कीर्तनादीनामेव मदु
पासनत्वं स्यादिति वाक्यार्थत्वात् १४

नैकेन प्रकारेण भजंते इत्युच्यते द्वाभ्यां ॥ मधुसूदनीटीका ९

सततं सर्वदा ब्रह्मनिष्ठं गुरुमुपसृत्य वेदांतवाक्यविचारेणाथ उपस
दनोत्तरकाले च प्रणवजपोपनिषदावर्तनादिभिर्वा सर्वोपनिषत्प्र
तिपाद्यं ब्रह्मस्वरूपं कीर्तयंतः वेदांतशास्त्राध्ययनरूपश्रवणव्यापा
रविषयीकुर्वंत इति यावत् तथा यतंतश्च गुरुसन्निधावन्यत्र वा वे
दांताविरोधितर्कानुसंधानेनाप्रमाणशंकानास्कंदितरूपदिष्ट
मन्त्ररूपावधारणाय यतमानाः श्रवणनिर्धारितार्थबाधशंकापनो
दकतर्कानुसंधानरूपमननपरायणा इति यावत् तथा दृढव्रताः दृ
ढानि निश्चलानि प्रतिपक्षैरचाल्यत्वमशक्यानि अहिंसासत्यास्तेयब्रह्मचर्यापरि
ग्रहादीनि व्रतानि येषां ते शमदमादिसाधनसंपन्ना इति यावत् तथा
चोक्तं पतंजलिना अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः एते
जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतमिति जात्या
ब्राह्मणत्वादिकया देशेन तीर्थादिना कालेन चतुर्दश्यादिना समये
अहिंसादयः
न यज्ञाद्यंगत्वेनानवच्छिन्नाः सार्वभौमाः [illegible] क्षिप्तमूढविक्षि
प्तभूमिष्वपि भाव्यमानाः कुत्रापि जातौ कुत्रापि देशे कुत्रापि
काले यज्ञादिप्रयोजनेपि हिंसां न करिष्यामीत्येवंरूपेण किंचिदप्य
पर्युदस्य सामान्येन प्रवृत्ता एते महाव्रतमित्युच्यंते इत्यर्थः तथा नम
स्यंतश्च मां कायवाङ्मनोभिर्नमस्कुर्वंतश्च मां भगवंतं वासुदेवं सकल
कल्याणगुणनिधानमिष्टदेवतारूपेण गुरुरूपेण चापि बोद्धव्यं अ
र्चनं पादसेवनमित्याद्युक्तरूपेतरसिन्नकरमेव श्रवणमात्रमिति पुन
र्वचनं सगुणरूपपरामर्शार्थं अन्यथा वैयर्थ्यप्रसंगात् तथा भक्त्या
महद्विषयेण परेण प्रेम्णा नित्ययुक्ताः सर्वदा संयुक्ताः एतेन सर्वसाधन

४ ५ एवं चस्थितं चकारात् श्रवणं कीर्तनं
विष्णोः स्मरणं पादसेवनं अर्चनं व
न्दनं दास्यं सख्यमात्मनिवेदनमिति
वन्दनसहचरितश्रव

पौष्कलं प्रतिबंधकाभावश्च दर्शितः यस्य देवे परा भक्तिर्यथा देवे त
था गुरौ तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मन इति श्रुतेः एतं
जलिना चोक्तम् ततः प्रत्यक्चेतनाधिगमोप्यंतरायाभावश्चेति तत
ईश्वरप्रणिधानात् प्रत्यक्चेतनस्य स्वस्वरूपस्याधिगमः साक्षात्का
रो भवति अंतरायाणां विघ्नानां चाभावो भवतीति सूत्रस्यार्थः तदे
वं शमदमादिसाधनसंपन्ना वेदांतश्रवणमननपरायणाः परमे
श्वरे परमगुरौ चैव प्रणामनमस्कारादिना च विगतविघ्नाः परिपूर्णसर्व
साधनाः संतो मात्रुपासते विजातीयप्रत्ययानंतरितेन सजातीय
प्रत्ययप्रवाहेण श्रवणमननोत्तरभाविना सततं चिंतयंति महा
त्मानः अनेन निदिध्यासनं चरमसाधनं दर्शितं एतादृशसाधन
पौष्कल्ये सति यद्वेदांतवाक्यजन्यमखंडगोचरं साक्षात्काररूपमहं
ब्रह्मास्मीतिज्ञानं तत् सर्वशंकाकलंकास्पृष्टं सर्वसाधनफलभूतं
ह्युत्पत्तिमात्रेण दीप इव तमः सकलमज्ञानं तत्कार्यं च नाशय
तीति निरपेक्षमेव साक्षान्मोक्षहेतुर्न तु श्रमिजयक्रमेण भ्रूमध्ये प्र
णप्रवेशने मूर्धन्यनाड्या प्राणोत्क्रमणमर्चिरादिमार्गेण ब्रह्म
लोकगमनेन तद्भोगानंतरं कालविलंबं वा प्रतीक्षते अतो यत् साक्षात्प्रति
ज्ञातं इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ज्ञानमिति तदेतच्छ्रे
फलं वा स्याच्छुभात्मोक्षणं प्रागुक्तमेवेतीह श्वेनोक्तं एवमत्रायं गं
भीरो भगवतोभिप्रायः ३ ज्ञानार्थस्य प्रकट एव [illegible]
[illegible]
[illegible] १४

सदानंदीटीका ९

नेव केन प्रकारेण भजंतीत्युच्यतेधुना उपसन्नगुरुं ब्रह्मनिष्ठं वेदांत
सद्गुरुं १ विचारेण तत्त्वंकारजपोपनिषदीरणैः वेदांतप्रतिपाद्यं
मां कीर्तयंतो हृदयं सदा २ वेदांतश्रवणेनैव निश्चिन्वंतोहमेवेति दृढ
यतंतो मननेनित्यं समन्वेकैः श्रुतमादरात् ३ कुर्वंतः संयुताः शांति
दांति ह्रांत्यादिसाधनैः चालयितुमशक्याम्यहिंसामनस्सत्वो नितिच
ततानि प्रतिपदैश्च येषां ते दृढसंयमाः कायेन मनसा वाचा नम।

स्तुर्वंतश्चादरात् ५ मांसदावासुदेवंश्रीभगवंतंकृपानिधिं दृष्टदे
वतरूपेणगुरुरूपेणाचस्थितं ६ भक्त्यामद्विषयेणातिप्रेम्णायुक्ता
सदेवमां उपासतेसजातीयप्रत्ययेननिरंतरं ७ विजातीयतिरस्कृ
तानिदिध्यासननतत्पराः इतिसाधनपौष्कल्येसतिवेदांतवाक्यज ८
ब्रह्मैकगोचरंज्ञानंसाक्षात्कारात्मकंफलं भवत्येवततःस्वयोग्यकि
रिमाशयोहरेः९ ।१४

नीलकंठीटीका १२

भजनस्वरूपमाह सततमिति यतंतः इंद्रियोपसंहारशमदमादि
ष्वप्रयतमानाः दृढव्रताहिंसादीनिव्रतानियेषांतेदृढव्रताः नमस्य
तश्चमांहृदयेशयंप्रतिमादिरूपंवाभक्त्यानित्ययुक्ताःनित्यमवहिताः
संतउपासते १४

श्रवणादिभजनप्रकारमेवाह॥ आनंदीटीका १३

कीर्तयंतःश्रुतिभ्यःस्वयंश्रुत्वामांयथोक्तगुणंपरानपिश्रावयंतः य
तंतः मननार्थंशास्त्रोपपत्तिमभ्यस्यंतः दृढव्रताः निदिध्यासनपराः
एवंश्रवणादिप्रकारयाभक्त्यानित्ययुक्ताःज्ञानमप्रतिबध्नंतं कर्मानुति
ष्ठंतः अतएवनमस्यंतः कायवाङ्मनोभिर्मदेकशरणाउपासते
[illegible]
[illegible] १४

रामकंठीटीका १४

किंच तएवंदैवप्रकृत्याश्रिताःमद्भक्ताः सततमव्यवधानेनकीर्तयंतोमन्त्र
जपस्तुत्यादिनोद्घोषयंतः तथाध्यानादिनायतमानास्तथानम
स्यंतः प्रह्वीभवंतोमांभक्त्याहेतुभूतयानित्ययुक्ताःसन्तउपासते
वाङ्मनःकायव्यापारान्मदेकविषयान्कुर्वाणाःपरिचरंतीत्यर्थः
[illegible] १४

सात्विकी [illegible]टीका १५

अथतादृशभक्तिनिर्देशेभजनलक्षणमाह॥ तादृशामहात्मानोनित्ययुक्तानिमेषमात्रपरिमितंकालंयुक्ताःस्वात्म
निसमाहिताःसंतः मामुक्तस्वरूपमीश्वरंभक्त्यामुत्कृष्टेनप्रेमातिश
येनोपासतेसेवन्ते विशेषणद्वारेणोपासनालक्षणमाह सततं

सर्वदा मां कीर्तयंतः मंत्रजपस्तवनादिना उद्घोषयन्तः तथा यतन्तो ध्या
नादिना यतमानाः तथा नमस्यन्तश्च प्रह्वीभवन्तः एवं दृढव्रताः
कीर्तनप्रयत्ननमस्कारेषु वाङ्मनसकायव्यापारेषु मदेकविषयेषु
दृढमचलं व्रतं संकल्पो येषां ते [illegible] १४

पंचोलीटीका

एषां भजनप्रकारमाह सततमिति मां सततं कीर्तयंतश्च प्रयत
यंतः इंद्रियनिग्रहः शमदमादयः अहिंसादिधर्माश्च यतंतः य
त्नं कुर्वंतः दृढव्रताः दृढानि स्थिराणि व्रतानि येषां ते दृढव्रताः
च पुनः मां नमस्यंतः भक्त्या नित्ययुक्ता मां हृदये आत्मानं उपास
ते सेवंते १४

रणवीरसमिद्धोधिनी॥

सततमिति सप्रते सततं सर्वास्ववस्थासु मां कीर्तयंतः स्तु
वंतः तथा यतंतश्च ध्यानप्रयोगादिरूपं व्यापारं कुर्वंतश्च
कीदृशाः यतव्रताः स्थिरनियमाः प्रतिज्ञातविषुवथाः अदद
त्वा मयदत्तिष्ठेन्यथा स्वशरीरमश्नौ निदिपामीत्येवमचल
प्रतिज्ञाः मां च नमस्यंतः प्रह्वीभवंतः भक्त्यादेवभूतया मामु
पासते परिचरंति एवं नित्ययुक्ता नित्यं सर्वदा समाहिताः सं
तः अयंभावः मामेव सिद्धासिद्धौ विषये प्रमाणं कृत्वा स्व
कर्माचरणेनैवमुपासनात्तेषां संपन्नेति १४॥

मधुभाष्य

१४॥

61

दोहा

जपत निरंतर मोहिको दृढ व्रत यत्न हिं सोय। वंदत मोकों
भक्ति सें भुक्त निरंतर होय १४॥

[illegible]

[illegible]

[illegible]

ज्ञानयज्ञेनचाप्यन्ये यजंतोमामुपासते एकत्वे
नपृथक्त्वेन बहुधाविश्वतोमुखं १५

आनन्दगिरि शांकरभाष्यटीका १

उपासनप्रकारभेदप्रतिपित्सयाह ज्ञानेति तत्प्रकारभेदो
दाहरणार्थंश्लोकमवतारयति उच्यतइति इज्यते इज्यतेपरमेश्व
रोयेनेतिप्रकृतेज्ञानेयज्ञशब्दः ईश्वरंचेतिचकारोवधारणेदेवता
न्तरध्यानत्यागमधिकारिविशेषंसूचितंदर्शयति अन्यामिति अन्येचब्रह्म
निष्ठाइतियावत् ज्ञानयज्ञमेवविभजतेएकत्वेति उत्तमाधिकारि
णामुपासनमुक्त्वामध्यमाधिकारिणामुपासनप्रकारमाह केचि
च्चेति तेषामेवप्रकारान्तरेणोपासनमुदीरयति केचिदितिबहुप्र
कारेणादित्यादिरूपेणेतियावत् १५

शांकरभाष्य आनंदगिरिकृतटीका २

तेनकेनकेनप्रकारेणोपासतइत्युच्यते ज्ञानेति ज्ञानयज्ञेनज्ञा
नमेवभगवद्विषयंयज्ञस्तेनज्ञानयज्ञेनयजंतःइजयंतोमामीश्व
रंचाप्यन्येअन्यामुपासनांपरित्यज्यउपासतेतत्तच्चज्ञानमेकत्वेनएक
मेवपरंब्रह्मेति परमार्थदर्शनेनयजंतउपासतेकेचिच्चपृथक्त्वे
नआदित्यचंद्रादिभेदेनसएवभगवान्विष्णुरवस्थितइत्युपासते
केचिद्बहुधावस्थितःसएवभगवान्सर्वतोमुखोविश्वरूपइतितं
विश्वरूपंसर्वतोमुखंबहुधाबहुप्रकारेणोपासते १५

स्वामिकृतटीका ३

किंच वासुदेवःसर्वमित्येवंसर्वात्मत्वदर्शनंतदेवयज्ञः तेनयज्ञे
नमांयजंतःइजयंतः अन्येप्युपासते ज्ञानयज्ञे तत्रापिकेचिदेक
त्वेनअभेदभावनया केचित् पृथक्त्वेनदासोहमितिभावः केचि
त्विश्वतोमुखंसर्वात्मकंमांबहुधाब्रह्मरुद्रादिरूपेणोपासते १५

पैशाचभाष्यटीका ४

ज्ञानयज्ञेनविज्ञानमेवेश्वरविषयंयज्ञस्तेनयज्ञेनच अन्येअपरे
जनाःयजंतेइजयंतःमामीश्वरमुपासतेतेएवंते एकत्वेनएकमे

वपुषं ब्रह्मेति श्रुत्युक्तेन इंद्रमित्रवरुणादित्यादिरूपेण बहुधा च
नानाप्रकारैर्यवस्थितं तथा विश्वरूपेण विश्वतोमुखं तथा विश्वरूप
परं विश्वतोमुखं १५

रामानुजभाष्यटीका ५

ज्ञानेति अन्येपि महात्मानः पूर्वोक्तैः कीर्तनादिभिः ज्ञानाख्येन य
ज्ञेन च यजंतो मामुपासते कथं बहुधा श्रुत्युक्तेन जगदाकारेण
विश्वतोमुखं विश्वप्रकारत्वेनावस्थितं मामेकत्वेनोपासते एतदु
क्तं भवति भगवान् वासुदेव एव नामरूपविभागानर्हातिसूक्ष्म
चिदचिद्वस्तुशरीरः सन् संकल्पो विविधमनेकनामरूपस्थूलचिद
चिद्वस्तुशरीरः स्यामितिसंकल्पक एव देवतिर्यङ्मनुष्यस्थावराख्ये
विचित्रजगच्छरीरो वतिष्ठते इत्यनुसंधाना बहुमामुपासत इति [illegible]
[illegible]

अभिनवगुप्तकृतटीका ६

अन्ये तु मां ज्ञानयज्ञेनैवोपासते अनंतः केचिदेकतया ज्ञानतः केचि द्बहुधा कर्मयोगान्मत्पराएव सर्वे

[illegible] १५

परमार्थप्रपाटीका १

अथ ज्ञानिनः कथं भजंत इत्याह ज्ञानयज्ञेनेति अन्ये च ज्ञानयज्ञेन
सर्वत्रात्मदर्शनरूपेण मां यजंतः पूजयंतः एकत्वेन स्थूलसमष्टिरू
पेण श्रुत्युक्तेनेंद्रादिविभूतिरूपेण बहुधा सर्वदेहिष्वात्मा विश्वतो
मुखं विश्वरूपमुपासते श्रुतिश्च हंसः शुचिषद्वसुरंतरिक्षसद्धो
ता वेदिषदतिथिर्दुरोणसत् नृषद्वरसदृतसद्व्योमसदब्जा गोजा
ऋतजा अद्रिजा ऋतं बृहदिति भाष्यं एतत्सर्वं समष्टिरूपं मिलित्वा
ऋतं बृहत् समष्टिरूपं सत्यं ब्रह्मैवाभिन्नदेवाद्रहंसः इति हंसो जी
वो ब्रह्मैव तथा शुचौ ज्ञानेन्द्रेयत्वेनास्तीति शुचिषत् वसुः स्थूलप्र
पंचरूपो विराडपि अंतरिक्षसत् आकाशे वर्तमानः सोपि यद्वावस
र्यंतः तथा जुहोतीति होता सोपि ब्रह्मैव तथा वेदिषद् उत्तरवेद्यां व
र्तमानो ऽतिथिरग्निः सोपि तथा दुरोण एतावर्थस्याप्यितेद्रोणाक
लशे वर्तमानं दुरोणसत् तथा नृषु मनुष्येषु तिष्ठतीति नृषत्
वरेषु देवेषु तिष्ठतीति वरसत् तथा ऋते प्राणे तिष्ठतीति ऋतसत्

योऽग्निरिति श्रुतीतिव्योमसत् तथाप्सुजा उदकजा जीवाः गोजा भूमिजाः
ऋतजा वा यज्ञाः अद्रिजाः पर्वतजाश्चेति सर्वं ब्रह्मरूपं १५

वनमालीटीका ८

अन्ये महात्मानउक्तकीर्तनादिभिर्भगवदाकारपरोक्षवृत्तिप्रवाहरूपज्ञा
नाख्येयज्ञेनच मांयजंतः सेवमानानारायणं सर्वांतर्यामिणंमत्स्यादि
रूपेणबहुधास्थितंविश्वतोमुखंसर्वस्यव्यापकंनानारूपवानचिंत्यशक्ति
र्भगवानेकएवेत्येकत्वेनसदनंतगुणवत्तया सर्वेभ्योमुक्तामुक्तजीवजडे
भ्यः पृथक्त्वेनविलक्षणत्वेनमामुपासते १५

कुसुमवैजयंतीटीका ९

एवंकीर्तनादिशुद्धभक्तिप्रधानान्महात्मनः शास्त्रहितानभिधायेदानींज्ञानप्र
धानान्भक्तानाह ज्ञानयज्ञेनेति अन्येपूर्वोक्तेभ्योऽन्येज्ञानप्रधानाः के
नचभक्ताः पूर्वोक्तप्रकारैः कीर्तनादिभिर्भक्त्यंगैर्ज्ञानयज्ञेनचज्ञानमेवय
ज्ञोयजनंतेनचयजन्तः पूजयन्तः सन्तोमांसर्वेश्वरंसर्वकारणंसर्वात्मा
नमुपासतेसेवंतेकेनप्रकारेणेत्यजन्नीत्यपेक्षायामाह एकत्वेनपृ
थक्त्वेनेति पृथक्त्वेनस्थूलसूक्ष्मचिदचिद्रूपाज्जगतः सकाशात्स्वरूपेण
भिन्नत्वेनापि एकत्वेपिनतस्यांतरात्मस्वरूपेणतस्मादपृथक्त्वेनाभिन्नत्वे
नेतिजगदभिन्नाभिन्नंब्रह्मेतिज्ञानेनबहुधाबहुप्रकारेणदेवतिर्यग्मा
द्याकारेणविश्वतोमुखंविश्वात्मस्वरूपेणावस्थितंमामुपासते यद्वा
एकत्वेनकारणरूपत्वेनपृथक्त्वेनकार्यरूपत्वेनचबहुधाबहुप्रकारेण
विश्वतोमुखंविश्वस्वरूपेणावस्थितंमामुपासते १५

इदानींयएवंश्रवणमननि मधुसूदनीटीका ९ दिध्यासनासमर्थास्तेपित्रिविधाउत्तममध्यममंदाश्चेतिसर्वे
इत्याह अन्येपूर्वोक्तसाधनानुष्ठानासमर्थाः ज्ञानयज्ञेनत्वेवाहमस्मिभग पिस्वानुरूपेणमामुपासत
वोदेवतेग्रहवैतममसौसादित्युक्तमहंग्रहोपासनंज्ञानंसएवपरमे
श्वरयजनरूपत्वाद्यज्ञस्तेन चकारएवार्थे अपिशब्दः साधनांतरत्या
गार्थः केचित्साधनांतरनिस्पृहाः संतः उपास्योपासकाभेदचिंतारूपे
णज्ञानयज्ञेनैकत्वेनभेदव्यावृत्त्या मामेवोपासंते चिंतयंत्युत्तमाः अन्ये
तुकेचिन्मध्यमाः पृथक्त्वेनोपास्योपासकयोर्भेदेनादित्योब्रह्मेत्यादे
शइत्यादिश्रुत्युक्तेनप्रतीकोपासनरूपेणज्ञानयज्ञेनमामेवोपास
ते अन्येत्वहंग्रहोपासनेप्रतीकोपासनेचासमर्थाः केचिन्मंदाः कां

श्री
गी टी
न

64

विदस्मांदेवतांचोपासीनाः कानिचित्कर्माणिवाकुर्वाणांबहुथानेकै
र्बहुभिः प्रकारैर्विश्वरूपंसर्वात्मानंमामेवोपासतेतेनतुनज्ञानयज्ञेने
ति उत्तरोत्तराणांक्रमेणाश्रर्वश्रेष्ठभूमिलाभः [illegible]
[illegible] विश्वरूपंतं [illegible] पंचयतित्यर्थः १५

सदानंदीटीका १५

भगवत्प्रोक्तंज्ञानंप्रमाद्रूपंप्रदर्श्यैव तत्रासमर्थियांब्रह्मोपासनाबहुधो
च्यते १ ज्ञानयज्ञेनवेदोक्ताहंग्रहोपासनेनच त्वंवाहमस्मिभगवोदेवते
हमित्तीरिते २ ज्ञानंतदेवगोविंदयजनंतेनतत्पराः उपास्योपासका
भेदचिंताद्रूपेणनिस्पृहाः ३ मामेवभेदध्यानेनाचिंतयंतस्तुमामजनाः
अन्येभेदेनवेदोक्तादित्योब्रह्मेतितत्पराः ४ प्रतीकोपासनेनैतेमत्प्रमा
मामुपासते उभयत्रासमाःकोचिदुपासीनाश्चदेवता ५ अन्येकर्माणि
कुर्वाणाःप्रकारैर्बहुभिःसदा मामेवोपासतेविश्वरूपंसर्वगतंहरिं १५

नीलकंठीटीका १५

ज्ञानयज्ञेननिर्विकल्पसमाधिनापातंजलाः एकत्वेनअहमेवभगवा
न्वासुदेवइत्यभेदेनौपनिषदाः इत्यकेनअयमीश्वरोममस्वामीतिबु
द्ध्यासक्ताः अन्येपुनर्बहुथाबहुप्रकारंविश्वतोमुखंसर्वेद्रीश्वर्यंकिंचि
हृष्टंतद्भगवत्स्वरूपमेवयच्छ्रुतंतन्नामैव यद्भक्षंअन्नंवातन्नदर्पितमेवे
त्येवंविश्वतोमुखंयथास्यात्तथामांउपासते १५
सर्वत्रसर्वथासर्वात्मकोहमेवोपास्यइति श्रानंदीटीका १५ उपासनापर्यायंज्ञानकर्मणोस्समुच्चयानु
ष्ठानंलक्षयति॥ अन्येपिकेचनैकत्वेनज्ञानयज्ञेनएकोनहितेनायज्ञानं तत्स्वर्वकेणयज्ञे
नयष्टृयजनीययज्ञोपकरणानांत्रयाणामपिब्रह्मरूपेणदृष्टाब्रह्मै
कज्ञानस्वर्वैणयज्ञेनयजंतोमामुपासते अन्येइत्यकेनयष्टाहंयजनी
योविष्णुःयज्ञोपकरणानिमन्त्रहविरादीनि इतिभेदज्ञानस्वर्वकेण
यजंतोमामुपासते अन्येबहुधानानाप्रकारकदेशकालाकारादिभेदेवोचि
त्तज्ञानस्वर्वकेनयज्ञेनयजंतोमामुपासते तदेवंसर्वेसर्वत्रसर्वैःप्रकारैर्मा
मेवसर्वात्मानंपरमेश्वरमुपासतेनास्तिकश्चिन्मदन्यस्सेव्यइत्यत्रोपपत्त
ये विशेषणमाह सर्वतोमुखम् येनयत्रयथोपास्यतेतस्यतत्रतथा
फलदानार्थंसंमुखमित्यर्थः यथासर्वासुदिक्षुसर्वेषांसर्वार्थप्रका
शनायसूर्यःसंमुखस्तथाहमित्यर्थः तथाचपरमेश्वरस्यैकात्मता

मेवाह अथ चैको वासुदेव एव सर्वदेवात्मा सर्वत्र सदा इज्य इति
ज्ञानयज्ञेन एतेन यजंतो मामेवोपासते तथा देवाः पितरो म
नुष्याः यथाकालं यथादेशं इज्या इत्यनेन यज्ञज्ञानयज्ञेन य
तेन अपरे ब्रह्मावर्तादिदेशे एकादश्यादिकाले च तत्तज्जात्याका
रेण तुलसीचंदनादियज्ञोपकरणभेदेन बहुप्रकारज्ञानयज्ञेन य तेन
यजंतो मामुपासते सर्वत्र सर्वेषामहमेवोपास्यः फलदश्चेत्यर्थः त
यावज्ज्ञानं त्रयो सांख्ययोगा इत्यत्र [illegible] १५

रामकंठटीका १४

किंच सर्वेभ्यः प्रसिद्धभक्तिप्रकारात्मयज्ञेन मद्यजनपरेभ्यो अन्ये विलक्षण
ज्ञानेन विशुद्धसंविन्मात्रमत्स्वरूपचिंतनैकलक्षणेन यज्ञेन याग
विधिना यजंतः इज्यं तत्र मामुपासते सेवंते कथं मां ज्ञानयज्ञेनो
पासते एकत्वेन सकलप्रपंचपरिहारादभिन्नैकसंविन्मात्रमत्स्वरू
पतया तथा इत्थं केन नानात्वेनात एव बहुधा अनेकधा ज्ञानेन क्रि
याद्युपचरणीयविचित्राकृत्यादिभिर्नरूपतया वस्तुतः कीदृशं
विश्वतोमुखं सर्वतः सर्वप्रकारोपासनीयाः भेदास्तु स्वप्रत्यभिज्ञाकार
णं यस्य तं तादृशं इदमत्र तात्पर्यम् द्विविधः पारमार्थिको मत्स्वरूपो
पासाक्रमः एकः संविन्मात्रैकतत्त्वविषयज्ञानसाधनः अपर एकस्ये
व तत्त्वस्य नानाजगदाकारनानाशक्तिसमूहज्ञानद्वारेण तस्य तस्यो
पासनमिति [illegible]
१५

एवंभजनलक्षणमु लासिकी [illegible]टीका १५ ज्ञानत्प्रकारानाह ॥
अन्येभ्योऽप्युक्तेभ्यः प्रसिद्धभक्तिप्रकारपरेभ्यो विलक्षणा अपि जनाः
वासुदेवः सर्वमित्येवं सर्वात्मदर्शनेन ज्ञानेन तदेव यज्ञस्तेन यजन्तो मा
मेव इज्यं यन्त उपासते सेवन्ते चो अवधारणे अन्यं प्रकारमाह एकत्वे
न सोऽहमित्यभेदभावनया इत्यनेन दासोऽहमिति बहुधा विचित्रा
कृतिभिर्नरूपतया ब्रह्मविष्णुमहेश्वरपरशुरामादीनां साकाररूपेण
यतो वस्तुतो मां कीदृशं विश्वतोमुखं विश्वतः सर्वत एव तन्मदुपास
नीयद्वारेणमुखं यस्य अभिज्ञाकारणं यस्य तम् [illegible]

गी॰
टी॰
नं॰

65

दयंतेनिर्जितापादितंविशंदततन्ननेविश्वरूपेणेनकपृथगानन्तविश्व दंडयतिवत्नामि: १५

पंचोलीटीका

किंच ज्ञानेनेति च पुनः अन्येऽपि ज्ञानयज्ञेन भगवद्विषयं ज्ञानमेव यज्ञस्तेन ज्ञानयज्ञेन मां यजंतः अन्यामुपासनां परित्यज्य मामेवमीश्वरं सेवंते तत्र ज्ञानमेकत्वेन एकमेव परं ब्रह्मेति परमार्थदर्शनेनोपासते केचित्पृथक्त्वेन आदित्यचंद्रादिभेदेन स एव भगवान्विष्णुरेवास्थितः स एव भगवान्सर्वतोमुखो विश्वरूप इति विश्वरूपं सर्वतोमुखं बहुधा बहुप्रकारेणोपासते १५

रणवीरसमिद्धोधिनी॥

ज्ञानयज्ञेनेति अन्ये वीराः ज्ञानयज्ञेन ज्ञानं प्रतिपादितलक्षणं स्ववर्णाश्रमोचितकर्मावश्यकर्तव्यताविषयं निश्चयस्वरूपं तदेव यज्ञो ब्रह्मयज्ञसाधनेनेतेन यजंतः पारार्दीयब्रह्मविमर्दयंतः संतो मामुपासते परमेश्वरोऽस्मभ्यमिष्टां सिद्धिं ददातु तमेव वयं शरणं प्रपद्यामहे इत्येवं भक्तिं कुर्वंति कथमुपासते एकत्वेन एक एव परमेश्वरः सर्वव्यापक इत्येवं भावेन तथा पृथक्त्वेन परमेश्वर एव नानादेवतारूपेणास्थित इत्येवं नानात्वेन वा यद्वा कथं यजंत इत्याह एकत्वेन पृथक्त्वेन च युगपद्बहून् तत्त्वीकृत्य पृथक्पृथक् एकैकलक्षीकृत्य च अथार्थे च कथमुपासते बहुधा बहुभिर्नामोच्चारध्यानादिभिः प्रकारैः कथंभूतं मां विश्वतोमुखं विश्वतो विश्वस्मिन्मुखमिव श्रेष्ठं यद्वा विश्वरूपमित्यर्थः १५॥

मधुभाष्य

दोहा

कोइ जनज्ञानयज्ञसें यजें उपासतमोहि एकभावभिन॰
भावसें बहुविधविश्वमुखसोंहि १५॥

66

अहंक्रतुरहंयज्ञः स्वधाहमहमौषधं मंत्रोहमह
मेवाज्य महमग्निरहंहुतम् १६

आनन्दगिरि [illegible]टीका १

भगवदेकविषयमुपासनंतेनहिंनसिध्यतीतिशंकते यदीति प्र
कारभेदमादायध्यायंतोपिभगवंतमेवध्यायंतितस्यसर्वात्मकत्वा
दित्याह अतआहेति क्रतुयज्ञशब्दयोरपौनरुक्त्यंदर्शयन्व्याचष्टे
श्रौतइति क्रियाकारकफलजातंभगवदतिरिक्तंनास्तीतिसमुदा
यार्थः १६

शांकरभाष्य [illegible]टीका २

यदिबहुभिःप्रकारैरुपासतेकथंत्वामेवोपासतइत्यतआह अह
मिति अहंक्रतुः श्रौतकर्मभेदोअहमेव अहंयज्ञःस्मार्तःकिंचस्व
धान्नमहंपितृभ्योयद्दीयतेअहमौषधंसर्वप्राणिभिर्यदद्यतेतदौषध
शब्दवाच्यमथवास्वधेतिसाधारणमन्नमौषधमितिव्याध्युपशमार्थ
मौषधंमंत्रोहंयेनपितृभ्योदेवताभ्यश्चहविर्दीयतेअहमेवाज्यंहविश्चा
हमग्निर्यस्मिन्हूयतेसोग्निरहमेवाहंहुतंहवनकर्मच १६

स्वामिकृतटीका ३

सर्वात्मतांप्रपंचयति अहमितिचतुर्भिः क्रतुःश्रौतोग्निष्टोमादिः
यज्ञस्तुस्मार्तःपंचयज्ञादिः स्वधापित्रर्थंश्राद्धादि औषधंम ओषधिप्र
भवमन्नंभेषजंवा मंत्रोयाज्यापुरोनुवाक्यादिः आज्यंहोमादिसाधनं
अग्निराहवनीयादिःहुतंहोमः एतत्सर्वमहमेव १६

पैशाचभाष्यटीका ४

कथमेकस्यैवभगवतोबहुविधत्ववचनमित्याशंक्यआत्मनोबहु
विधत्वंदर्शयन्नाह अहंक्रतुःसोमयागप्रभेदोग्निष्टोमादिरहं य
ज्ञःअहरहरनुष्ठीयमानोदेवयज्ञादिरहंस्वधापितृभ्योदत्तान्नं
दीयतेपितृयज्ञादिः अहमौषधंयवव्रीह्यादिनिष्पन्नम्
दोषघ्नंहरीतक्यादि मंत्रोहंयेनदेवेभ्योहविर्दीयतेयज्ञादिःसमंत्रः
आज्यंघृतमहमग्निःयत्रहविर्हूयतेसआहवनीयादिअहंहुतंहोमं

अभिनवगुप्ती

॥१८ ननु कर्मतावत्कारककलापव्याप्तभेदोऽहि कथमभिन्नं भगवत्पदं प्रापयति इत्युच्यते अहं क्रतुरे
कस्यैव निर्भागस्य ब्रह्मतत्त्वस्य परिकल्पित साधनाधीनं कर्म पुनरेकत्वं निवर्तयति क्रियायाः स
र्वकारकात्मकसाक्षात्कारेणावस्थाने भगवत्पदप्राप्तिं अविदूरत्वात् उक्तं च सेयं क्रियात्मिका
शक्तिः शिवस्य पशुवर्तिनी बंधयित्री स्वमार्गस्था ज्ञाता सिद्ध्युपपादिकेति मयाप्युक्तम् उपक्रमे
यैव बुद्धिर्भावाभावानुयायिनी उपसंहृतकाले साभागाभावानुयायिनीति तत्र तत्र वितत्य
विचारितचरमेतदितीहोपरम्यते

श्री
गी टी
न

तदप्यहं १६

तथाहि विश्वशरीरोऽहमेवावस्थितः

रामानुजभाष्यटीका ५

तदभ्याह अहमिति अहं क्रतुरहं ज्योतिष्टोमादिकः क्रतुरहमेव यज्ञो महा
यज्ञोऽहमेव स्वधा पितृगणपुष्टिदायिनी औषधं हविः स्वाहाऽहमे
व अहमेव मंत्रोऽहमेवाज्यं प्रदर्शनार्थमिदं अन्नादिकं च हविरहमे
व अहमाहवनीयादिकाग्निः होमस्त्वाहमेव १६

अभिनवगुप्तकृतटीका ६

[illegible] १६

परमार्थप्रपाटीका ७

अथ सर्वरूपत्वं प्रपंचयति अहमिति चतुर्भिः तत्रापि बाह्यकर्मरूप
त्वमादौ वदति क्रतुः श्रौतो ज्योतिष्टोमादिः यज्ञः स्मार्तः पंचयज्ञादिः
स्वधा पितृभ्यः श्राद्धादिः औषधमौषधिप्रभवं भेषजमन्नं वा मंत्रः पुरो
नुवाक्यादिः आज्यं होमसाधनं अग्निः आहवनीयादिः हुतं होमः एतत्स
र्वमहमेव १६

वनमालीटीका ८

प्रतिज्ञातं निरतिशयैश्वर्यत्वं प्रपंचयन्नाह अहमिति चतुर्भिः क्रत्वा
दिव्यापकत्वात् क्रत्वादिरहं सर्वं समाप्नोषि ततोऽसि सर्व इति वक्ष्यमाण
त्वात् सर्वव्यापकत्वात् सर्वस्वरूपोऽहमिति वक्तव्ये तदेकदेशकथ
नमेव पुनर्न्यायवादेन वैश्वानरे द्वादशकपालेऽष्टकपालत्वादिकथन
वत् क्रतुः श्रौतो ज्योतिष्टोमादिर्यज्ञः स्मार्तो वैश्वदेवस्थालीपाकादिः
स्वधान्नं पितृभ्यो दीयमानं औषधमौषधिप्रभवमन्नं सर्वप्राणिभिर्भु
ज्यमानं भेषजं वा मंत्रो याज्यापुरोनुवाक्यादिर्येनोद्दिश्य हविर्देवेभ्यो
दीयते आज्यं घृतं सर्वहविरुपलक्षणं अग्निराहवनीयादिर्हविःप्र
क्षेपाधिकरणं हुतं हवनं हविःप्रक्षेपः एतत्सर्वव्यापकत्वात्सर्व
महं एतदेकैकनियामकत्वज्ञानमपि भगवदुपासनमिति बोधयि
तुं प्रत्येकमहंशब्दः क्रियाकारकफलजातं सर्वमनियम्यत्वात्मदा
धारकत्वात्मदधीनसत्ताकत्वाच्च मयाप्याप्तमिति भावः १६

कुसुमवैजयंतीटीका ९

67

ननुकयारीत्यात्वंविश्वात्माभवसीत्यपेक्षायांतदेवेतिं दर्शयतिचतुर्भिः
अहंक्रतुरिति क्रतुःश्रौतयज्ञोज्योतिष्टोमादिरहमेव यज्ञःस्मार्तोवैश्व
देवादिमहायज्ञोऽहमेवस्वधापितृगणोद्देशदायिनीअहमेव औषध
रोगनाशकंभेषजंलब्ध्यातिकरमोषधिजमन्नंवाहमेवमन्त्रोयाज्या
पुरोऽनुवाक्यादिर्येनमाउद्दिश्यदेवेभ्योहविर्दीयतेसोऽहमेव आज्यमपि
समिदादीनामुपलक्षणंहोमादिसाधनंघृततैलादिकंहविर्द्रव्यमहमेव
अग्निराहवनादिकोहोमाधिकरणोऽमेवहुतंहोमोऽहमेवेत्येवंसर्वात्म
नाहमेवस्थितइत्यर्थः १६

यदिबहुधोपासतेतर्हिकथंत्वामे मधुसूदनीटीका १६ वेदोक्तमित्याशंक्यात्मनोविश्वरूपत्वंप्रपंचयतिच
तुर्भिः॥ सर्वस्वरूपोहमितिवक्तव्येतदेकदेशकथनमवयुत्यानुवादेनवैश्वा
नरेद्वादशकपालेष्टाकपालत्वादिकथनवत् क्रतुःश्रौतोऽग्निष्टोमादिः
यत यज्ञःस्मार्तोवैश्वदेवादिर्महातेनश्रुतिस्मृतिःप्रसिद्धःस्वधान्नंपितृभ्यो
दीयमानं औषधमोषधिप्रभवमन्नंसर्वैःप्राणिभिर्भुज्यमानं भेषजं
वा मंत्रोयाज्यापुरोनुवाक्यादिर्येनोद्दिश्यहविर्दीयतेदेवेभ्यः आज्यं
घृतं सर्वहविरुपलक्षणमिदं अग्निराहवनीयादिःहविःप्रक्षेपाधि
करणं हुतंहवनंहविःप्रक्षेपःएतत्सर्वमहंपरमेश्वरएव एतदेकैक
ज्ञानमपिभगवदुपासनमितिकथयितुंप्रत्येकमहंशब्दः क्रियाका
रकफलजातंकिमपिभगवदतिरिक्तंनास्तीतिसमुदायार्थः १६

सदानंदीटीका ११

बहुधोपासतेतेनेचेत्कथंत्वामेवतत्पराः सेवंतइत्यपेक्षायांआहक्रतुरस्मी।
विलात्मतो १ श्रौतोध्वरोऽग्निष्टोमादिःक्रतुःस्मार्तस्तुयज्ञकः प्रसिद्धो
वैश्वदेवादिर्महायज्ञतयास्मृतौ २ पितृभ्योदीयमानेचयदन्नंतत्स्वधे
तिनं प्राणिभिर्भुज्यमानंवाभेषजंवौषधंस्मृतं ३ याज्यापुरोनुवाकादि
मंत्रोयेनाध्वरेहविः देवेभ्योदीयतेत्वाज्यंघृतंसर्वोपलक्षणं अग्निराह
वनीयादिर्हविःप्रक्षेपणाश्रयः हुतंहवनमित्येतत्सर्वंविश्वरूपंहरिः ५
एतदेकैकविज्ञानमपिविश्वोरूपासनं क्रियाकारकमुख्येयत्सर्वंना
न्निहरेःपृथक् ६ । १६

नीलकंठीटीका १२

इदमेवोपासनंविवृणोति अहमिति क्रतुःसंकल्पोदेवताध्यानरूपः यज्ञःश्रौतःस्मार्त्तश्चदेवतोद्देशेनद्रव्यत्यागः स्वधापितृणामन्नं औषधं मनुष्याणामन्नं मंत्रोयेनदीयतेमः आज्यंहविः अग्निः हुतंप्रक्षेपक्रियाः इदंसर्वंयस्मादहमेवातस्तेषांविश्वतोमुखमुपासनंयुक्ततरमित्यर्थः १६

एतदेकात्म्यज्ञानमेवाह ॥ आनंदटीका १२

क्रतुयज्ञयोःश्रौतस्मार्त्तत्वेनभेदः औषधमोषधिःफलपाकान्तेतियव तिलादिहुतंहवनक्रियाचाहमेव १६

तदेवैकस्यतत्वस्यसर्वशक्तित्वं रामकंठटीका १४

प्रतिपादयितुमाह॥ क्रतुयज्ञयोर्यद्यपिपर्यायत्वेनव्यवहारस्तथापियज्ञशब्दसन्निधानेप शुसोमादिसाधनविशिष्टएवयज्ञः क्रतुशब्देनोक्तः यज्ञशब्देनपाकय ज्ञग्रहणं ततोयथाप्रतिपादितब्रह्माद्वैतस्थित्यासर्वोयागविधिर्ना नादेवतासंप्रदानोहमेव तथास्वधा पितृतर्पणमंत्रोप्यहमेव तथा नानौषधिविकारात्मकमौषधंयागोपकरणद्रव्यमहमेव तथासं प्रदानभूतदेवतासंमुखीकारादिविविधार्थवाचकशब्दविशेषरूपो मंत्रोयज्ञोपकरणविशेषोप्यहं तथाज्यंहुततर्पणद्रव्यं तथाग्निराह वनीयादिर्यागविधिकरणं तथाहुतंहवनंहोमकर्मेतियज्ञादिरूपत याब्रह्मार्पणविधिस्थायेनाहमेवस्थितइत्यवगन्तव्यम् १६

ननुसगुणोपासनेनकथं लासिकी [illegible]टीका १५ निर्गुणोपास्तिरित्याशंक्यात्मनोविश्वरूपत्वेन

सगुणत्वमपिप्रपंचय तिचतुर्भिः॥ अहंक्रतुस्तत्तद्देवतासंप्रदानः श्रौतोग्निष्टोमादिःयज्ञःस्मार्त्तोवैश्वदेव पंचयज्ञादिः स्वधापित्रर्थश्राद्धादिः औषधमोषधिप्रभवंयज्ञोपकरण द्रव्यंश्यामममन्नम् मन्त्रोदेवतासंमुखीकरणादिवाचकोवर्णसमूहवि शेषरूपोयाज्यपुरोनुवाक्यादिभेदभिन्नः आज्यंतर्पणद्रव्यंशल्कु ष्टमन्यद्युतं हुतं अग्निर्यागक्रियासाधनमाहवनीयादिः हुतंहोमकर्म एतत्सर्वमहंपरमेश्वरएव एतेनजडवर्गोप्यहमेवेत्युपलक्षितं [illegible] १६

पंचोलीटीका

कथंत्वामेवउपासतेइत्यत्राह अहमिति क्रतुश्रौतकर्मअहंय ज्ञः स्मार्त्तंपंचमहायज्ञादिकर्माहंसाधारणमन्नंस्वधाःअन्नंपितृभ्यो

दीयमानमहमौषधं प्राणिभिरद्यमानमन्नमहं अथवाऔषधं व्याधु
पशामनं भेषजं मंत्रः देवपितॄहविर्दानसाधनभूतम् आज्यं हविरहम-
ग्निर्ह्येनहविःप्रक्षेपः चलनतद्रूपं कर्मचेष्टादिकमाहं १६

रामवीरसमिद्धोयिनी ॥

अथस्वात्मविषयकमत्युत्पत्तिनिमित्तं स्वात्मैश्वर्यं प्रतिपाद
यितुमाह अहंक्रतुरित्यादि चतुर्भिः यत्किंचिज्जगति परिदृ-
श्यते तत्सर्वमहमिच्छामत्सलामपवेति श्लोकचतुष्टयीतात्पर्यं
यद्यपिक्रतुयज्ञयोः पर्यायता तथापि पशुसोमादिसाधनवि-
शिष्टः क्रतुः सामान्यस्तु यज्ञः यद्वा श्रौतस्मार्तभेदेन कर्मसाधन
तयाक्रतुयज्ञयोर्भेदः स्वधाकव्यं साधारणं वा अन्नं औषधं व्याधु
पमार्थं भेषजं नामौषधिविकारात्मकं योगोपकरणं द्रव्यं वा
मंत्रः संप्रधानभूतपितृदेवादिसंप्रदीकारादिविविधार्थं वाव
कयाहविशेषरूपो यज्ञोपकरणविशेषः आज्यं हविः हुतं ह
वनकर्म १६॥

मधुभाष्य

अहंक्रतुरित्यादिना क्रतवोऽग्निष्टोमादयः यज्ञो देवतामुद्दि
श्य द्रव्यत्यागः उद्दिश्यदेवान्द्रव्याणां त्यागो यज्ञ इतिश्रुतेन इत्य
भिधानात् गम्यते सप्ततत्त्वमिति गतिः तथाहि सामवेदे देवा
शिष्टपाख्यायां अथकस्मादुच्यते गतिरिति ब्रह्मैव गतिस्त-
द्धि गम्यते पापविमुक्तैरिति साक्षाद्दोतृत इति साक्षी तथाहि
वाष्कलशाखायां समाज्ञादिदमद्राक्षीत्तस्मात्साक्षिणःसाक्षि
त्वमिति प्रारणमाश्रयः संसारभीतस्य परमंपरायणमि
तिश्रुतं नारायणं महाज्ञेयं विश्वात्मानं परायणमिति च
संहारकाले प्रकृत्या जगदत्र निधीयत इति निधानं तथा
ऋग्वेदखिलेषु अपश्यमपश्यमायया विश्वकर्मरूपरोज

गन्धिहिंतंशुभ्रवद्वदिति सत्कार्यमसत्कारणं सदभिव्यक्त
रूपत्वात्कार्यमिष्यते बुधैरिति असदव्यक्तरूपत्वात्कार
णं वापि ग्राह्यं तमित्यभिधानात् असच्च सच्चैव च यद्विश्वं सद
69 सतः परमिति च भारते तथापि मङ्गलमेवान्यदेव नामजना
द्दरमिति दर्शयति ॥ १८॥

दोहा

में हि क्रतहों यज्ञ में स्वधा औषधि मेंह में मंत्र हुत हवनहें
अग्नि आहुति पह १६॥

70

पितामहस्य जगतो माता धाता पितामहः वेद्यं पवि
त्रमोंकार ऋक्साम यजुरेव च १७

आनन्दगिरि शाङ्करभाष्यटीका १

इतश्च भगवतः सर्वात्मकत्वमनुगन्तव्यमित्याह किंचेति पवित्रं शुद्ध
तेः नेनेतिशुद्धस्य पापविशुद्धिकारणं पुण्यं कर्मेत्याह यावनमिति वेदि
तव्ये ब्रह्मणि वेदसाधनमोंकारस्तत्र प्रमाणमृग्गादिचकारादथर्वाङ्गि
रसो गृह्यते १७

शंकरभाष्यं आनंदगिरिकृतटीका २

किंच पिता जनयिताहमस्य जगतो माता जनयित्री धाता कर्मफलस्य
प्राणिभ्यो विधाता पितामहः पितुः पिता वेद्यं वेदितव्यं पवित्रं पावनं
ओंकार ऋक्साम यजुरेव च १७

स्वामिकृतटीका ३

किंच धाता कर्मफल विधाता वेद्यं ज्ञेयं वस्तु पवित्रं शोधकं ऋगाद
यो वेदास्त्वाहमेव स्पष्टमन्यत् १७

पैशाचभाष्यटीका ४

पिता जनकः अस्य जगतः माता चाहं धाता कर्मफलस्य प्राणि
भ्यः पितामहः पितुः पिता वेद्यं वेदितव्यं पवित्रं पावनं ओंकारः ओमि
ति ब्रह्मेति श्रुतेः ऋक् मंत्रविशेषः साममंत्रविशेषः एवं यजुर्मंत्रवि
शेषः १७

रामानुजभाष्यटीका ५

पिताहमिति अस्य स्थावरजंगमात्मकस्य जगतस्तत्र पितृत्वेन मातृ
त्वेन पितामहत्वेन च वर्तमानोहमेव अत्र धातृशब्दो मातापितृव्यतिरि
क्तः उत्पत्तिप्रयोजके चेतनविशेषे वर्तते यत्किंचिद्वेद्यं पवित्रं पाव वि ४
नं तदहमेव ऋग्गादि वेदबीजभूतः प्रणवश्चाहमेव १७

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं १७

परमार्थप्रपाटीका १

श्री
गी टी
न

किंच तत्त्वमर्पणं च रूपोऽप्यहमस्मीत्याह द्वाभ्यां पितेति पिता लिंगरूपः
बीजप्रदत्वात् माता मायाश्रयत्वात् धाता कर्मफलदाता वेद्यं ज्ञेयं वस्तु
पवित्रं शोधकं ॐकारो वाज्ञेः वाम्नस्त्वाहं ऋग्साद्वि वेदत्रयो चाहमेव १७

वनमालीटीका ८

अस्य जगतः प्राणिजातस्य पिता जनयिता माता जनयित्री धाता पोष
पिता तत्तत्कर्मफलविधाता पितामहः पितुरपि पिता वेद्यं ज्ञातव्यं
शूयतेऽनेनेति पवित्रं पावनं शुद्धिहेतुर्गंगास्नानगायत्रीजपादि वेदित
व्ये ब्रह्मणि वेदनसाधनमोंकारः नियताक्षरपादाऋक् गीतिविशिष्टा
सैव साम सामपदेन गीतिमात्रस्यैवाभिधायकमिष्यते गीतिरहित
मनियताक्षरं यजुः एतत्त्रिविधं मंत्रजातं कर्मोपयोगि चकारादथर्वांगि
रसोऽपि गृह्यते १७

कुसुमवैजयंतीटीका ९

किंच अस्य चराचरात्मकस्य जगतः पिता जनयिता पितृत्वेनावस्थि
तोऽहमेव अस्य माता जनयित्री मातृत्वेनावस्थितोऽहमेव अस्य धाता
कर्तृकर्मफलधर्मपोषयिता च धारकत्वेन पोषकत्वेन च तत्र स्थितो
राजादिस्त्वाहमेव विश्वकिमतस्तदंतर्यामिणो मतस्तेषामनतिरेका
त् अस्य पितामहः पितुः पिता पितामहत्वेन स्थितोऽहमेव वेद्यं अस्य म
ध्येयस्तद्वेदितव्यमत्त्विनद् हमेव पवित्रं शुद्धतेऽनेनेति पवित्रं पाव
नं अस्य मध्येय स्तत्शुद्धिकरणं गंगाजलादयस्तितदहमेव ॐकारो वेद्ये
ब्रह्मणि योऽत्तानहेतुः सर्ववेदबीजभूतः प्रणवः सोऽहमेव ऋक्सामय
जुरेव च नियताक्षरपादा ऋक् सैव गीतिविशिष्टा साम सामपदेन गी
तिमात्रस्यैव वाचकमिष्यते गीतिरहितमनियताक्षरं यजुस्तेन त्रिवि
धं कर्मोपयोगि मंत्रमात्रमहमेव चकारादथर्वाङ्गिरसोऽप्यहमेवेत्यर्थः १७

मधुसूदनीटीका ९

किंच अस्य जगतः सर्वस्य प्राणिजातस्य पिता जनयिता माता जनयित्री धा
ता पोषयिता तत्तत्कर्मफलविधाता वा पितामहः पितुः पिता वेद्यं
वेदितव्यं वस्तु पूयतेऽनेनेति पवित्रं पावनं शुद्धिहेतुर्गंगास्नानगा
यत्रीजपादि वेदितव्ये ब्रह्मणि वेदनसाधनमोंकारः नियताक्षर
पादा ऋक् गीतिविशिष्टा सैव साम सामपदं तु गीतिमात्रस्यैवाभि

धायकमित्यस्य सत् गीतिरहितमनियताक्षरं यजुः एतत्त्रिवि
धमंत्रजातंकर्मोपयोगि चकारादथर्वांगिरसोपिगृह्यन्ते एव
कारोहमेवेत्यवधारणार्थः १७ [illegible] ।

सदानंदीटीका ११

सर्वस्यप्राणिजातस्यपितास्यजगतोस्म्यहं जनयित्रीतथाकर्मफ
लदातापितामहः १ वेदितव्यंपवित्रंचशुद्धिहेतुरहंहरिः ज्ञानसा
धनमोंकारोनियताक्षरपादऋक् २ सामगीतिविशिष्टासायजुर्हि
नियताक्षरं एतत्त्रिविधमंत्रोक्तंश्रौतकर्मोपयोगिच ३ अथर्वांगिर
सोप्यत्रचाहृह्यन्तेहमस्मिते १७

नीलकंठीटीका १२

धाताकर्मफलानांविकर्ता वेद्यंवेदितव्यंब्रह्म पवित्रंपावनंतपआ
दिकं १७

आनंदीटीका १३

बहुशोवगतोर्थः १७

रामकंठीटीका १४

अस्यजगतःसमस्तस्यचराचरविश्वस्योत्पत्तिमूलकारणत्वात्पितामा
ताचाहं यद्वित्पितरौयथाऽपत्यस्यसमस्तयोगक्षेमोद्वहनंनित्या
वहितौतथाहमस्यजगतः तथाधाताधर्ताः स्थितिहेतुस्तथापिता
महोब्रह्मादीनांजगतः स्रष्टृत्वेनस्थितानांजनकत्वात्पितामहः
पवित्रंपरमंपावनंयद्वेद्यंज्ञेयंवस्तु तथोङ्कारः परब्रह्मवाचकःप्रण
वाख्योवेदादिःशब्दविशेषः तत्प्रभवाणिचऋक्सामयजूंषि [illegible]
[illegible] १७

लासिकी धासकृतटीका १५

किंच अस्यप्रमेयस्यजगतश्चराचरस्यपितामाताहमेवमूलकारणत्वात्त
त्प्रयोगक्षेमोद्वहनाच्च धाताकर्मफलविधाता पितामहःकारणा
नामपिकारणं वेद्यंज्ञेयंवस्तुपरंब्रह्माख्यम् पवित्रंशोधकः ॐकारः
परब्रह्मकःप्रणवाख्यः तत्प्रवाणिचऋक्सामयजूंषि अहमेव च
कारादथर्वांगिरसोपिगृह्यन्ते [illegible] १७

२ गीं टीं न

पंचोलीटीका

किंचपितेतिअस्यजगतः पितामाताप्राणिभ्यःधाताकर्मफलस्य
ष्टापितामहःवेद्यंज्ञातव्यंपवित्रंॐकारऋक्सामयजुरेवाहं १७

रणवीरसमिद्धायिनी

किंचपितेति अस्यप्रत्यक्षतउपलभ्यमानस्यजगतः समस्त
स्यचराचरस्यविश्वस्यपितावाहमेवास्मि उत्पत्तिमूलकारण
त्वात्समस्तयोगक्षेमोद्वहननित्यावहितत्वाच्चेतिभावः तथा
धाताधारयितास्थितिहेतुः प्राणिनांकर्मफलस्यविधातावा
पितामहःजगदुत्पादकानांब्रह्मादीनामपिजनकः पवित्रंप
रमंपावनंवेद्यंयज्ञंवस्तु वेदायहितंवावेद्यं यद्वापवेर्वज्रा
यायुधात्त्राणकरं वेद्यंवेदप्रतिपादितंकवचवचनः मारादिकं
तथाॐकारः परब्रह्माभिधानंछंदसामाद्यः प्राह्वविशेषः
तद्रूपोमंत्रविशेषोवा तत्प्रभवाति ऋक्सामयजूंषिच १७

मधुभाष्य

१७॥

दोहा

में पित माता जगतको धाता पितामह होय पावन वेद्य ओं
कारमैं ऋग यजु साम हि सोय १७

73

गतिःभर्ताप्रभुःसाक्षी निवासःशरणंसुहृत प्रभ
वःप्रलयस्थानं निधानंबीजमव्ययम् १८

आनन्दगिरि शांकरभाष्यटीका १

भगवतःसर्वात्मत्वे हेत्वन्तरमाह किंचेति गम्यतइति प्रकृतिवि
लयांतंकर्मफलंगतिरित्याह कर्मेतिपोष्टाधर्मफलस्यैवप्रदाता
कार्यकारणप्रपंचस्याधिष्ठानमित्याह निवासइति शीर्यतेदुःखम
स्मिन्निति श्रुत्यतिमाश्रित्याह शरणमिति प्रभवत्यस्माज्जगदिति व्यु
त्पत्तिमादायोक्तं उत्पत्तिरितिकारणस्यकथमव्ययत्वमित्याशंक्याह
यावदितिकारणमंतरेणापिकार्यंकदाचिदुदेष्यतिकिंकारणेनेत्या
शंक्याह नहीति माभूत्तर्हिसंसारदशायामेवकदाचित्कार्योत्पत्तिरि
त्याशंक्याह नित्यंचेतिकारणव्यक्तेर्नाशमंगीकृत्यतदन्यत्तमव्यक्ति
स्वरूपंसर्वकालस्यनास्तीतिसिद्धवत्कृत्यविशिनष्टिबीजेति १८

शांकरभाष्य आनंदगिरिकृतटीका २

किंचगतिःकर्मफलंभर्तापोष्टाप्रभुःस्वामीसाक्षीप्राणिनांकृताकृ
तस्यनिवासोयस्मिन्प्राणिनोनिवसंतिशरणमार्तानांप्रपन्नानामा
र्तिहरः सुहृत्प्रत्युपकारानपेक्षःसन् उपकारीप्रभवउत्पत्तिःजगतः
प्रलयःप्रलीयतेयस्मिन्निति तथास्थानंतिष्ठत्यस्मिन्निति निधानंनि
क्षेपःकालांतरोपभोग्यंप्राणिनांबीजंप्ररोहकारणंप्ररोहधर्मिणा
मव्ययं यावत्संसारभाविनादव्ययंनह्यबीजंकिंचित्प्ररोहतिनित्यं
चप्ररोहदर्शनाद्बीजसंततिर्नव्येतीतिगम्यते १८

स्वामिकृतटीका ३

किंच गम्यतइति गतिःफलं भर्तापोषणकर्ताप्रभुर्नियंतासाक्षी
शुभाशुभद्रष्टानिवासोभोगस्थानं शरणंरक्षकः सुहृत् हितकर्ता
प्रकर्षेणभवत्यनेनेतिप्रभवः स्रष्टाप्रलीयते अनेनेतिप्रलयः सं
हर्तातिष्ठत्यस्मिन्निति स्थानमाधारः निधीयतेस्मिन्निति निधानंल
यस्थानंबीजंकारणंतथाप्यव्ययं अविनाशिनतुव्रीह्यादिबीजव
न्नश्वरमित्यर्थः १८

श्री
गी टी
न
74

पैशाचभाष्यटीका ४

गतिः कर्मफलं भर्ता पोष्टा प्रभुः स्वामी साक्ष्यहं साक्षी प्राणिनां शु
भस्यकर्मणः निवासः यस्मिन् प्राणिनो निवसंति शरणं प्राणि
नामार्तिहरः सुहृत् प्रत्युपकारानपेक्षः सन् उपकारी किंच प्रभवः उत्पत्ति
स्थानं जगतः प्रलयः यस्मिन् प्रलीयते सोऽहं जगत् तिष्ठत्यस्मिन्निति
स्थानं [illegible] निधानं जगतः यत्कालान्तरोपभोगाय निधीयते रोहय
ति बीजं जगतः प्ररोहणसमर्थमव्ययं बीजमिति संबंधः १८

रामानुजभाष्यटीका ५

गतिरिति गतिः शक्रलोकप्रभृति प्राप्यस्थानं भर्ता धारयिता प्रभुः शा
सिता साक्षी साक्षात् द्रष्टा निवासः वासस्थानं वेश्मादि शरणं इष्टस्य प्रा
पकतया अनिष्टस्य निवारणतया सर्वस्याश्रयणीयश्चेतनः सचाहमे
वेति यः सुहृत् हितैषी प्रभवस्थानं प्रलयस्थानं यस्य कस्यचित् कुत्र
चित् प्रभवप्रलययोगस्थानं यत्तदहमेव निधानं निधीयत इति निधा
नमुत्पाद्यमुपसंहार्यं चाहमेव अव्ययं बीजं तत्तत् अव्ययहेतुः तत्
तत्कारणं चाहमेव १८

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं १८

परमार्थप्रपाटीटीका ७

किंच गतिरिति गम्यतेऽनेनेति गतिः शरणं व्यापारहेतुः भर्ता पोषयि
ता प्रभुर्नियंता साक्षी शुभाशुभद्रष्टा निवासो भोगस्थानं शरणं रक्ष
कः सुहृत् प्रियतमः प्रभवः उत्तमो भवत्यस्मद्देहो यस्मात् प्रकर्षेण
लयः अपुनर्भवो यस्मात् निधीयते यस्मिन्निति निधानं बीजं कारणं
तस्याव्ययमविनाशि न तु व्रीह्यादिबीजवन्नश्वरमित्यर्थः १८

वनमालीटीका ८

गम्यत इति गतिः फलं भर्ता पोषको धारकः प्रभुः स्वामी मदीयोयमिति
स्वीकर्ता साक्षी सर्वप्राणिनां शुभाशुभद्रष्टा निवसंत्यस्मिन्निति निवा
सः आधारः शीर्यते दुःखमस्मिन्निति शरणं प्रपन्नानामार्तिहृत् सुहृ
त् प्रत्युपकारानपेक्षः सन् उपकारी प्रकर्षेण भवत्यनेनेति प्रभवः स्र

ष्टाप्रकर्षेणालीयंतेनेनेतिप्रलयः संहर्तातिष्ठंत्यस्मिन्निति स्थानमाधा
रः निधीयतेनिक्षिप्यंतेतत्कालेभोगायोग्यतयाकालांतरोपभोग्यंव
स्त्वस्मिन्निति निधानंप्रलयस्थानमितियावत् बीजमुत्पत्तिकारणम
व्ययंदैवेकाकारम् १८

कुसुमवैजयंतीटीका ९

किंचगतिरितिगतिः गम्यतेनेनेयंवेतिनिरुक्त्याःग्रगतिशाह्दः साध
नमात्यस्वरूपः सोहमेव भर्तास्वामीप्रभुर्नियंतासाक्षीशुभाशुभक
र्मद्रष्टानिवासोहं शरणंरक्षकः सुहृत् निर्हेतुहितकृत् प्रभवः
स्रष्टाप्रभवत्यनेनेतिनिरुक्तेः प्रलयः संहर्ताप्रलीयतेऽनेनेतिनिरु
क्तेः स्थानमाधारस्तिष्ठंत्यस्मिन्नितिनिरुक्तेः निधानंप्रलयस्थानंनि
धीयतेऽस्मिन्नितिनिरुक्तेः बीजंकारणंननुयदिवंजगतोबीजरूपो
भवसितर्हियथाव्रीह्यादिबीजववमपिकृतोननश्यसीतिचेत्तत्राह अव्य
यंव्ययरहितंबीजमहमेव यथाव्रीह्यादिबीजंतद्व्ययरूपमतोनश्यसेवे
मर्थः १८

मधुसूदनीटीका ९

किंच गम्यतइतिगतिः कर्मफलं ब्रह्माविश्वसृजोधर्मोमहानव्यक्तमेव
च उक्तमोसाविकीमेतांगतिमाहुर्मनीषिणइत्येवंमन्वाद्युक्तं भ
र्तापोष्टासुखस्यैवदाता प्रभुः स्वामीमदीयोयमितिस्वीक
र्ता साक्षीसर्वप्राणिनांशुभाशुभद्रष्टा निवसंत्यस्मिन्नितिनिवा
सोभोगस्थानं शीर्यतेदुःखमस्मिन्निति शरणंप्रपन्नानामार्तिहृ
त् सुहृत्प्रत्युपकारानपेक्षः सन्नुपकारीप्रभवउत्पत्तिः प्रलयो
विनाशः स्थानंस्थितिः यद्वाप्रकर्षेणभवत्यनेनेतिप्रभवः स्रष्टा
प्रकर्षेणालीयतेनेनेतिप्रलयः संहर्ता तिष्ठंत्यस्मिन्निति स्थानमा
धारः निधीयतेनिक्षिप्यंते तत्कालभोगायोग्यतयाकालांत
रोपभोग्यंवस्त्वस्मिन्निति निधानं सूक्ष्मरूपसर्ववस्त्वधिकरणंप्र
लयस्थानमितियावत् शंखपद्मादिनिधिर्वाबीजमुत्पत्तिका
रणमव्ययमविनाशि नतुव्रीह्यादिवद्विनश्वरं तेनानाद्यंतंय
त्कारणंतदप्यहमेवेतिसर्वेणैवसंबंधः १८

सदानंदीटीका १८

गतिः कर्मफलं भर्त्ता पोष्टा शोभनसाधनैः प्रभुः स्वामी मदीयोयमिति
स्वीकारसंस्कारः साक्षी शुभाशुभद्रष्टा सर्वेषां प्राणिनां सदा भोगस्था
नं निवासः स्थानं शरणं चार्त्तिहर्त्ता सुहृत् प्रत्युपकारानपेक्षः सन्नुप
कारकः उत्पत्तिः स्थितिः तौ वा प्र यः स्वष्टादयोप्यवा इ कालांतरोप
भोगार्हवस्त्वाधारो निधानकं निधिर्वापयशंखो दिबीजशुभमनिका
रणं अनाद्यनंतमेवाहं सर्वमतः प्रपद्यस्व च १८

नीलकंठीटीका १८

गतिर्मुक्तप्राप्यंस्थानं भर्त्ता कर्मफलदानेन पोषकः प्रभुः अंतर्यामी
साक्षी कृताकृतावेदकः निवसंत्यस्मिन्निति निवासः आश्रयो यजमा
नादिः शरणं रक्षकः सुहृत् उपकारमनपेक्ष्य उपकर्त्ता प्रभव उत्पत्ति
स्थानं प्रलयो लयस्थानं स्थानं स्थितिस्थानं निधानं कर्मफलसमर्प
णस्थानं कालांतरे फलप्रसवार्थं बीजं प्ररोहकारणं प्ररोहधर्मिणां
अव्ययं यावत्संसारभाविनात् १८

आनंदीटीका १८

गम्यते नया परं तत्त्वं गतिरुपायः भर्त्ता पोषकः प्रभुः यथेष्टस्थापकः
साक्षी कृतस्य पुण्यापुण्यस्य कर्मणः साक्षाद्द्रष्टा निवासः आस्पदम्
शरणं उपद्रवशमनं आश्रयः सुहृत् उपकारानपेक्षयोपकर्त्ता निधा
नम् निधीयते निक्षिप्यते श्रेयोर्थं सर्वं कर्मास्मिन्निति निधानम् [illegible]
[illegible] १८

तथा गतिर्गम्यते ज्ञायते वा परं त

रामकंठीटीका १८

मनयेत्युपायः॥ तथा भर्त्ता पोष्टा तथा प्रभुर्यथेष्टविनियोगेक स्वामी तथा साक्षी शुभा
शुभकर्माध्यक्षः तथा निवासः सर्वभूतानामावसथमेकं तथा शर
णं सर्वोपद्रवप्रशमायाश्रयः तथा सुहृत् सर्वभावेनोपकारी तथा
जन्मविनाशस्थितिहेतुत्वात्प्रभवः प्रलयः स्थानं च तथा प्रलीने स्थि
त्याव तिष्ठते तत्तथा नाम्नकं निधानं तथा अयमः प्रभवति नस्तथा तस्या
व्ययमक्षयं बीजं कारणमिति न किंचिदस्ति यदाहमस्य जगतो
न भवामीत्यर्थः [illegible] १८

८ लासिकी [illegible]टीका १५

किंच गम्यते परं ब्रह्मानयेति गतिरुपायः स च त्रिविधः आणवशाक्तशा
म्भवभेदात्" अथवा गम्यते इति गम्यं ब्रह्मलोकं मोक्षापरपर्यायं धाम
"तथा च श्रुतिः तेजो बिन्दुः परं ध्यानं विश्वातीतं हृदि स्थितम् आणवं
शाम्भवं शाक्तं स्थूलं सूक्ष्मं परं च यत् तल्लक्षणं चोक्तं श्रीमालिनीवि
जये अकिंचिच्चिन्तकस्येत्यादि" भर्ता पोष्टा ईश्वराख्यः प्रभुर्यथेष्ट
विनियोक्ता अन्तर्यामिलक्षणः साक्षी शुभाशुभकर्मद्रष्टा अन्तरा
मिध्यानः कूटस्थः निवासो भोगस्थानं जीवाभिख्यः शरणं प्रपन्ना
नार्तिहृत् उपासनीयो देवताख्यः सुहृत् उपासकद्वारेण हितकर्ता प
रोहमेव तथा प्रभवः स्रष्टा प्रलयः संहर्ता स्थानं स्थितिर्हेतुरेतेन का
रणत्रयात्मकोहमेव निधानं सर्ववस्त्वधिकरणं पराशक्तिरूपमह
मेव तदुक्तं परात्रिंशिकायां यथा न्यग्रोधबीजस्थः शक्तिरूपो म
हाद्रुमः तथा हृदयबीजस्थं जगदेतच्चराचरमिति हृदयं च शक्तिः
तदुक्तं सैषा सारतया प्रोक्ता हृदयं परमेष्ठिन इति अव्ययं विनाशि
त्वव्रीह्यादिबीजवद्विनश्वरम् बीजं जगत्कारणमपराशक्तिरूपं
प्रधानमहमेव [illegible] १८

पंचोलीटीका

किंच गतिरिति गतिः कर्मफलं अहं भर्ता पोषणकर्ता प्रभुः स्वा
मी प्राणिनां कृताकृतस्य साक्षी निवासः आर्तिहरः शरणं सुहृत्
प्रत्युपकारानिरपेक्षः सन् उपकारी प्रभवः उत्पत्तिर्जगतः प्रलीय
ते यस्मिन् विश्वमिति प्रलयः स्थितिहेतुः तस्मिंस्तिष्ठतीति स्थानं निधानं निक्षे
पः कालान्तरोपभोग्यं प्राणिनां बीजं प्ररोहकारणं प्ररोहधर्मिणां
अव्ययं यावत्संसारभावित्वात् अव्ययं बीजमित्यर्थः १८

रसनवीरसमिद्बोधिनी

गतिरिति तथा गम्यते प्राप्यते ज्ञायते च प्राप्यं ज्ञेयं च वस्त्वने
नेति गतिरुपायः गम्यते प्राप्यते तैस्तैः कर्मभिरस्मादिति गतिः

स्वर्गादिकं बहुविधं कर्मफलं वा तथा भर्ता पोष्टा तथा प्रभुर्य
थेष्टविनियोगैकस्वामी तथा साक्षी शुभाशुभकर्माध्यक्षः त
था निवासः सर्वभूतानामेकमावसथं तथा शरणमार्त्तानां
सर्वोपद्रवप्रशमाश्रयः तथा सुहृत् प्रत्युपकारमनपेक्ष्यैव
सर्वभावेनोपकारी तथा जन्मविनाशस्थितिहेतुत्वात्प्रभवः
प्रलयः स्थानं च निधानं कालांतरोपभोग्यफलनिक्षेपः यद्
जगतः प्रलीनस्य सतो यत्रावस्थिति तत्स्वधानात्मकं निधानं त
थाव्ययं नित्यं प्ररोहहेतुर्विनाशरहितं बीजं कारणं प्रथमस्वभावः
यत्किंचिदस्य जगति परिदृश्यते तद्रूपमेव भवानीति १८॥

मधुमाध

१८

दोहा

भर्तागति प्रभु साक्षी मे धारण निवास सुहृत उत्पति प्रलय
निवास में बीज अव्यय निधि नित्य १८॥

77

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च अमृतं
चैव मृत्युश्च सदसच्चाहमर्जुन १९

आनन्दगिरि शाङ्करभाष्यटीका १

इतश्च सर्वात्मत्वे भगवतो न विवदितव्यमित्याह किंचेति आदित्या
त्मनाहं रश्मिभिरिति स्मृतिमवष्टभ्य व्याचष्टे केचिदिति वर्षोत्सर्गनिग्रहा
वेकस्यैकस्मिन्काले विरुद्धाविति शंकामाह अष्टभिरिति अन्वभेदेन व
र्षस्य निग्रहोत्सर्गावेककर्तृकावविरुद्धावित्यर्थः यस्य कारणस्य
सम्बन्धित्वेन यत्कार्यमभिव्यज्यते तदिह सदित्युच्यते कारणसम्ब
न्धेनानभिव्यक्तकारणमेव अनभिव्यक्तनामरूपमसदितिर्थवाक्रि
यतेनदेनदाह सदिति श्रुमवादंश्च दस्यातिनश्वनरितिभगवतोऽसत्ता
सत्वे कार्यकारणकल्पना निरधिष्ठाना न तिष्ठतीत्यर्थः तर्हि यथाकृते
कार्यस्य सत्वं कारणस्य तथाऽसत्वमास्थेयमित्याशंक्य वाशब्देन निषे
धति कार्येति न हि कार्यस्यासत्वं तिकं सत्वं वा वाचारंभणश्रुतीनां मौनं स्या
त्तिनिकमसत्वं कृतत्वेवत्विमादिश्रुतेरित्यर्थः उक्तैर्ज्ञानयज्ञैर्भग
वदभिध्यानाभिनिविष्टबुद्धीनां किं फलमित्याशंक्याऽसयो वाक्रमेण
मुक्तिरित्याह ये इति १९

शांकरभाष्य आनन्दगिरिकृतटीका २

किंच तपाम्यहमादित्यो भूत्वा कैश्चित् रश्मिभिरहं वर्षमुत्सृजामि उत्सृ
ज्य पुनर्निगृह्णामि कैश्चिद्रश्मिभिरष्टभिर्मासैः पुनरुत्सृजामि प्रावृषि
अमृतं चैव देवानां मृत्युश्च मर्त्यानां सत् यस्य यत्संबंधितया विद्यमा
नं तद्विपरीतमसच्चैवाहं अर्जुन पुनरत्यंतमेवासद्भगवान् कार्यका
रणे वा सदसती ये पूर्वोक्तैः निवृत्तिप्रकारैरेकत्वपृथक्त्वादिविज्ञानै
र्यज्ञैर्मां पूजयंत उपासते ते तान विदस्ते यथाज्ञानं मामेव प्राप्नुवंति १९

स्वामिकृतटीका ३

किंच तपामीति आदित्यात्मना स्थितो निदाघसमये तपामि जग
त्संतापं करोमि वृष्टिसमये च वर्षमुत्सृजामि विमुंचामि कदाचि

श्री
गी टी
न

न्वर्षं निगृह्णामि आकर्षामि अमृतं च जीवनं मृत्युश्च नाशः सत्
स्थूलं दृश्यं असच्च सूक्ष्ममदृश्यं परं तत् सर्वमहमेवेति मत्वा मामेव
बहुधा उपासत इति श्रीधरीवान्वयः १९

पैशाचभाष्यटीका ४

तपामि आदित्यो भूत्वा कैश्चिद्रश्मिभिरष्टौ मासान्वर्षं निगृह्णामि पुन
श्च कैश्चिद्रश्मिभिः चतुरो मासान् उत्सृजामि अमृतमेवाहं देवानां
मृत्युश्च मर्त्यानां यस्य यत्संबंधतया विद्यमानत्वं तत्सत् विपरीतम
सत्पुनरुत्तमेवा सत्कार्यकारणे सदसती १९

रामानुजभाष्यटीका ५

तपाम्यहमिति अहमेवादित्यादिरूपेण तपामि ग्रीष्मेऽहमेव वर्षं निगृ
ह्णामि तथा वर्षास्वपि चाहमेवोत्सृजामि अमृतं चैव मृत्युश्च येन जीवति
लोको येन म्रियते तदुभयमप्यहमेव किमत्र बहुनोक्तेन सदसच्चाप्य
हमेव सद्यद्वर्तते असद्यद्वर्तते सर्वावस्थावस्थित चिदचिच्छरीरतया तत्प्र
२४ कारोऽहमेवावस्थित इत्यर्थः यएवं बहुधा पृथक्त्वेन नानाविधिना मद्रू
पावस्थितकृत्स्नजगच्छरीरतया तत्प्रकारोऽहमेवावस्थित इत्येक
त्वज्ञानानुसंधानेन मामुपासते तेन एव महात्मानः एवं महात्मनां भ
गवदनुभवैकभोगानां ज्ञानिनां प्रकृतेषामेव विशेषं दर्शयितुं मत्ता
नां कामकाराणां त्रैविमाह

अभिनवगुप्तकृतटीका ६

४ की दैवीं मा विकां संतोऽत बाह्यद्रव्यादिभिः यजन्ते मां ज्ञानयज्ञेन चाप
रे ये तु अतः केचिद्देवताया ज्ञानतः केचिद्बहुधा कर्म [illegible] एव
देवं ब्रह्मकर्मावधानावधानानेदो ने विकथमपि [illegible]
तदेवाचश्चरणीयचौ ने अहं क्रतुरिति एवं स्वरविभागसमग्रतया
सर्वाभिनिविष्टायनायी नेक कर्म प्रवृत्ति नवनिर्वर्तयति क्रियायाः
सर्वकालमनन्तानाकारोपावस्थायां भगवत्स्वयंविधानविचार
द उत्कृष्ट देवंक्रियाफलिकः पालि विश्व यत् स्वर्गिणी यंपत्री
द्रसार्थाद्यानामविश्वपयादि देवेनि मयापुरं प्रवक्षे द्वैक विर्मा

नामेवानुभाविंकीमिति नत्सवाविनसर्वेषामिवक्षेमादिनेकेषा
नाते तपाम्यहमित्याद्यैतत्कथाप्रसंगेनोक्तं नन्वेवं यदि वो ह्यया
गादिनापि ब्रह्माप्तिः तर्ह्यग्निष्टोमादिष्वपि किमसौ याज्यः अश्वपग
मेभेदवादः वासुदेव एवेति चेत्कथं तेनापवर्ग इत्यत्रस्तदर्थमुच्यते ॥

परमार्थप्रपाटीका १

अथ स्थूलप्रपंचरूपोप्यहमेवेत्याह तपामीति कदाचित्प्रलयका
ले द्वादशादित्यरूपेण तपामि शुष्कजातं शोषयामि श्रुतिरपि नारा
यणोपनिषत्सु आईज्वलति ज्योतिरहमस्मि ज्योतिर्ज्वलति ब्रह्माहमस्मि
इत्यादि भाष्ये प्रलयकाले आईशब्दशोणितो द्रवं प्राणिजातं ज्वलति
द्वादशादित्यरूपेण संकर्षणमुखोनलेन दह्यते तदा ज्योती रूपस्तेज
सो विराडस्मि अथ यदा ज्योतिः सोपि ज्वलति तदा लिंगरूपं ब्रह्माहम
स्मि तथा वर्षपर्जन्यं निगृह्णामि आकर्षयामि अवर्षणं करोमि पुनः
सृष्टिकाले वर्षपर्जन्यमुत्सृजामि मुंचामि अमृतं जीवनमहमेव मृ
त्युः क्रमशाप्तः एवमुक्तमुपसंहरति सदिति सद्व्यवहारस
त् स्थूलप्रपंचरूपं असत् सूक्ष्मप्रपंचरूपं अहमेव १९

वनमालीटीका ८

तपाम्यहमादित्योन्तर्यामी वर्षं शर्वदृष्टिरूपः संश्रीयानि गृह्णा
मि काश्चिद्रश्मिभिरष्टसु मासेषु पुनस्तमेव निगृहीतं रसं च
तुर्मासेषु केश्चिद्रश्मिभिरुत्सृजामि वृष्टिरूपेण प्रतिपादयामि च अमृतो
अमृतं च देवानां प्राणिमात्रस्य जीवनं वा एवकारस्त्वहमित्यनेन संबं
धः मृत्युश्च सर्वप्राणिनां विनाशः सत्स्थूलमसत्सूक्ष्मं च सर्वमहमेव ह
सर्वं मद्यामस्मीत्यर्थः एवं सोचितकर्मभिः सर्वव्यापको हमाराध्यस्त
नोमितगुणस्य ममापरोक्षं ततो मोक्ष इति भावः १९

कुसुमवैजयंतीटीका ९

एवं तत्त्वज्ञानिनि येषां तेषां किं च यानि तानि तानि यानि तानि
ज्ञानेनैवं इति तु मे तं नी नि विशेषं पवित्र तकानि
नां सत्कि किंचतपामीति निदाघसमये सूर्यरूपेणाहमे
वविश्वं तपामि विश्वस्य तापं करोमि कदाचिदवग्रहरूपेणाहमेव

भि

श्री
गी टी
न

79

वर्षंजलंनिगृह्णाम्यरविरश्मिद्वारा समाकर्षामीत्यर्थः पुनः पर्जन्य
रूपेणाहमेव वर्षास्ववर्षमुत्सृजामि विसृजामि अमृतंमोक्षस्तथापुनः
मृत्युः संसारः यद्वा लोकस्यामृतंजीवनं मृत्युर्मरणं तदहमेव हे अर्जु
न बहुनोक्तेन किं सदसच्चाहमेव यत् किंचित्सदसच्च स्थूलाभिधेयं का
र्यंकारणरूपं वस्तुजातमस्ति तत्सर्वं तन्मदात्मत्वेनावस्थितोऽहमेव
स्मीत्यर्थः १९

मधुसूदनीटीका १९

किंच — तपाम्यहमादित्यः सन् ततस्तत्तापवशादहं वर्षं शर्वर्युष्टिरूपं रसंरश्मि
भिः निगृह्णाम्याकर्षामि कैश्चिद्रश्मिभिरष्टसु मासेषु पुनस्तमेव नि
गृहीतं रसं चतुर्षु मासेषु कैश्चिद्रश्मिभिरुत्सृजामि च वृष्टिरूपेण प्रक्षि
पामि च भूमौ अमृतं च देवानां सर्वप्राणिनां जीवनं वा एवकारस्याह
मित्यनेन संबंधः तेनाहमेव तपामीत्याद्यर्थः मृत्युश्च मर्त्यानां सर्व
प्राणिनां विनाशो वा सत् यत्संबंधितया यद्विद्यते तत्तच्च सत् अ
सच्च यत्संबंधितया यन्न विद्यते तत्तदसत् एतत्सर्वमहमेव हे अर्जु
न तस्मात्सर्वात्मानं मां विदित्वा स्वस्वाधिकारानुसारेण बहुभिः
प्रकारैर्मामेवोपासत इत्युपपन्नं एवमेकत्वेन पृथक्त्वेन बहुधा चेति
त्रिविधा अपि निष्कामाः संतो भगवंतमुपासीनाः सत्त्वशुद्धिज्ञानोत्प
त्तिद्वारेण क्रमेण मुच्यंते ये तु सकामाः संतो न केनापि प्रकारेण भ
गवंतमुपासते किंतु स्वस्वकामसाधनानि काम्यान्येव कर्माण्यनु
तिष्ठंति ते सत्त्वशोधकाभावेन ज्ञानसाधनमनधिरूढाः पुनः पुन
र्जन्ममरणप्रबंधेन सर्वदा संसारदुःखमेवानुभवंतीत्याह द्वाभ्यां १९

सदानंदीटीका १

आदित्यः संस्तपामीदं ततस्तापवशादहं वर्षं सर्वरसं भूमेराकर्षाम्य
र्करश्मिभिः १ कैश्चिदष्टसु मासेषु निगृहीतं रसं पुनः कैश्चिच्चतुर्षु
मासेषु वृष्ट्या भूमौ विसृजाम्यहं २ देवानाममृतं सर्वप्राणिनां जीवनं
च वा मर्त्यानां मृत्युरथवा विनाशः सर्वदेहिनां ३ अधिष्ठानतया
यत्सदसद्व्यक्तमस्ति यत् एतत्सर्वमहमतः पृथग्वा नास्ति किंचन
४ सर्वात्मानं विदित्वा मां स्वाधिकारानुसारतः एवं प्रकारैर्बहुभिर्मां

मेवोपासतेबुधाः ५ । १९

नीलकंठटीका १२

अहंतपामिआदित्योभूत्वा अहंवर्षंवृष्टिंतांनिगृह्णामि अष्टसुमासेषु कैश्चिद्रश्मिभिः उत्सृजामिचचतुर्षुमासेषुकैश्चिदिति अमृतंजीवनं मृत्युर्मरणं असत्तंदेवाद्यंवा सत्सात्व असत्अस्तात्व एतत्सर्वमहमेव अतस्तेषांविश्वतोमुखंममभजनंकुर्वतांसर्वरूपेणाहमनुग्रहंक रोमीतिभावः १९

कालस्वरूपेणैकात्मतामाह॥ आनंदटीका १३

अत्रैवसर्वार्थेवाक्यार्थः मीनमेषवृषमिथुनचतुर्मासेरविर्भौमान्रसानादत्ते कर्कटादिचतुर्मासेतानेवोत्सृजति वृश्चिकादिचतुर्मासेष्वमावेवतान्धारयति इतिसंवत्सरात्मकस्यकालस्यचातुर्मास्यभेदेनयत्कार्यंतत्राहमेवात्मैनएकएवाहंकर्तेत्यर्थः विहितंचैतद्विष्णुपुराणे विवस्वानष्टभिर्मासैरादायापोरसात्मिकाः वर्षत्यंबुततस्तस्मादन्नमप्यखिलंजगादिसत्र अमृतंसात्त्विकोयोदयकालःसोहमेवमृत्युमृत्युःप्रलयरूपोप्यहमेव सदितिवर्तमानकालत्वंअसदित्यतीतानागतकालतापवं सर्वत्रसर्वदाब्रह्मैकात्मसाक्रियमाणंकर्मानंतफलदमित्युक्तम् [illegible]

[illegible] १९

रामकंठटीका १४

तथाच- सूर्योभूत्वाग्रीष्मादौरसमादधानोहंतपामि यतस्तदाहमेववर्षंवृष्टिं निगृह्णामि निरुणद्मि वर्षाकालेचाहमेवपर्जन्योभूत्वोत्सृजामि तपनवर्षणक्रियायाआप्यायनादनेनाहमेवजगद्धनयामीत्यर्थः तथामृतममविनाशियद्वस्तुमृत्युश्चविनाशहेतुरहमेव किंबहुनोक्तेन यत्किंचित्सद्विद्यमानंशोभनंवायदसन्नविद्यमानंकिंचिज्जगतिसंभवतितत्सर्वमहमस्म्यकिरैवैकात्मसदसद्भावेनावभासतइत्येवंपरदैवप्रक्रमप्रस्तुतसर्गभेदप्रतिपादनप्रसंगेनब्रह्मस्वरूपंसंग्रहेणोक्त्वा [illegible] व

[illegible] १९

लासिकी [illegible]टीका १५

श्री गी टी न

किंच॥ आदित्यात्मना निदाघसमये तपामि जगत संतापं करोमि वर्षं वृष्टिं निगृ
ह्णामि निरुणद्धि उत्सृजामि विसृजामि च अमृतं जीवनं मृत्युर्नाशश्चा
हमेव किं बहुनोक्तेन यत्सत्स्थूलं दृश्यमसत्सूक्ष्ममदृश्यं तत्सर्वमह
मेव [illegible]
[illegible] त्यामभजमानानां [illegible]
४० [illegible]स्माह १९

पंचोलीटीका

किंच तपाम्यहमिति अहं आदित्यो भूत्वा कश्चित् उल्बणै रश्मिभिः त
पामि केश्चिद् हे वर्षं उत्सृजामि वर्षं उत्सृज्य पुनः अष्टभिः मासैः कै
श्चित् रश्मिभिः वर्षं निगृह्णामि मासचतुष्टयेन प्रावृषि केश्चित् र
श्मिभिः पुनः वर्षं उत्सृजामि अमृतं देवानामहं मृत्युः मर्त्यानामहं
सत् विद्यमानं असत् अविद्यमानं अथवा सत्कारणं असत्कार्यमः
हं १९

रणवीरसमिद्बोधिनी॥

आदित्यादिषु व्यवहरसाधारणमातपकरणादिप्राक्सिमत्वं तदपि
ममैवेत्याह तपामीति अहमादित्यो भूत्वा तपामि ग्रीष्मादौ रसमा
ददे तदेव वर्षं वृष्टिं निगृह्णामि निरुणद्धि तथाहमेव वर्षाकाले
पर्जन्यो भूत्वा पुनरपि वर्षमुत्सृजामि तपनवर्षणक्रियया न्ना
द्युत्पादनेनाहमेव जगद्वर्तयामीतिभावः तथा अमृतं मृत्युश्चास्मि
कोर्थः स्वभक्तानां मोक्षप्रदत्वादितरेषां संसारप्रदश्चाहमेवास्मीति
तथा सदसच्चाहमेवास्मि प्रमाणाप्रमाणस्वरूपं सर्वमहमेवास्मी
त्यर्थः १९॥

मधुभाष्य

१९॥

दोहा

मेंहूतपाऊंवर्षहूं यारनत्यागत मेंह अमृत मृत्युसदमत अ
जेन मेंनसंदेह १५॥

त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रा
र्थयन्ते ते पुण्यमासाद्य सुरेन्द्रलोकमश्नन्ति दिव्या
न्दिवि देवभोगान् २०

शाङ्करभाष्य १

ये पुनरन्ये सकामाः कामकामाः त्रैविद्येति त्रैविद्या ऋग्यजुः सामविदः
याज्ञिकाः येषां ते मां वस्वादिदेवरूपिणं इष्ट्वा सम्यग्यज्ञशेषं सो
मपाः सोमं पिबन्तीति सोमपास्तेनैव सोमपानेन ते पूतपापाः
शुद्धकिल्बिषाः यज्ञैरग्निष्टोमादिभिरिष्ट्वा पूजयित्वा स्वर्गतिं स्वर्गग
मनं स्वरेव गतिः स्वर्गतिस्तां प्रार्थयन्ते याचयन्ते ते च पुण्यं पुण्य
फलमासाद्य सम्प्राप्य सुरेन्द्रलोकं शतक्रतोः स्थानं अश्नन्ति भुञ्ज
ते दिव्यान् दिविभवान् अप्राकृतान् देवभोगान् देवानां भोगांस्ता
न् २०

आनन्दगिरिकृतटीका २

भगवद्भक्तानामपि निष्कामानामेव मुक्तिरिति दर्शयितुं सकामा
नां पुंसां संसारमवतारयति ये पुनरिति तिस्रो विद्या अधीयन्ते
विदन्तीति वा ते त्रैविद्या वेदविदस्तदाह ऋगिति वस्वादीत्यादि
शब्देन सवनत्रये शानादित्या रुद्राश्च गृह्यन्ते शुद्धकिल्बिषा नि
रस्तपापा इति यावत् २०

हाभ्या स्वामिकृतटीका ३

त्रैविद्या इति ऋग्यजुःसामलक्षणास्तिस्रो विद्या येषां ते त्रिविद्याः त्रिवि
द्या एव त्रैविद्याः स्वार्थेन तद्धितः तिस्रो विद्या अधीयंते जानंतीति वा त्रै
विद्या वेदत्रयोक्तकर्मपरा इत्यर्थः वेदत्रयविहितैर्यज्ञैर्मामिष्ट्वा मामेव
रूपं देवतांतरमित्यजानंतोपि वस्तुत इंद्रादिरूपेण मामेवेष्ट्वा सम्यग्ज
यज्ञशेषं सोमं पिबंतीति सोमपास्तेनैव पूतपापाः शोधितकल्मषाः सं
तः स्वर्गतिं स्वर्गप्रतिगतिं ये प्रार्थयंते ते पुण्यफलरूपं सुरेंद्रलोकं स्व
र्गमासाद्य प्राप्य दिवि स्वर्गे दिव्यानुत्तमान् देवानां भोगान् अश्नंति भुंज

न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते इत्यादि श्लोकद्वयेन
त्रिप्रफलाप्राप्या देवतान्तर [illegible] यजन्तो मां ना
प्नुवन्ति इत्यभक्ता दर्शिताः
महात्मानस्तु मां पार्थ
इत्यादिना च भक्ता उक्ताः
तत्रैकत्वेन पृथक्त्वेन वा ये
परमेश्वरं न भजन्ति तेषां
जन्ममृत्युप्रवाहो दुर्वार इत्या
ह [illegible]

श्री
गी टी
त

पैशाचभाष्यटीका ४

त्रैविद्याः ऋग्यजुःसामविदः मां सर्वेश्वरं सोमपाः सोमयाजिनः
पूतपापाः क्षालितकल्मषाः यज्ञैरग्निष्टोमादिभिरिष्ट्वा आराध्य स्वर्ग
तिं स्वर्गलोकप्राप्तिं प्रार्थयन्ते आशासते ते पुण्यमासाद्य सुरेन्द्रलो
कमश्नन्ति भुञ्जते दिव्यान् देवभोगान् २०

रामानुजभाष्यटीका ५

त्रैविद्येति ते तास्ति ऋग्यजुःसामरूपास्तिस्रो विद्यास्त्रिविद्या केवलं त्रि
निष्ठास्त्रैविद्या विद्यां त्रयी निष्ठा महात्मानः पूर्वोक्तप्रकारेण विमलवेदवेद्यं मामे
वज्ञात्वा नित्यमद्भक्तिकारितकीर्तनादिना ज्ञानयज्ञेन च मामेव प्रा
प्यसुपासते त्रैविद्यास्तु वेदप्रतिपाद्यं केवलेन्द्रादियागशेषं सोमं पिबन्तः
पूतपापाः स्वर्गादिप्राप्तिविरोधिपापात् पूताः केवलेन्द्रादिदेवता
यानुसंहितैर्यज्ञैर्वसलानरूपं मामिष्ट्वा तथावस्थितं सोमं पिबन्तः स्वर्ग
तिं प्रार्थयन्ते ते पुण्यं दुःखासंभिन्नं सुरेन्द्रलोकं प्राप्य दिव्यान् भोगान् २० अश्नन्ति

अभिनवगुप्तकृतटीका ६ नन्वेवं यदि वा[स्य]यागादिनापि ब्रह्मा
...र्थं २० मि: तर्ह्यग्निष्टोमादिष्वपि किमन्योऽपाज्यः अभ्युपगमे भेदवादः वासुदेवपर्वतिचेत्कथं
नापवर्गस्तेत्तदर्थमुच्यते ॥ ६

...यपि ते मामेव यजन्ते न तथापि
...र्गमात्रप्रार्थनया आप्त कर्मिनि
...स्त्वत्दुर्लभतया स्वर्गादिमा
...लेव फलेनावच्छिन्दन्ति अत
...तेषां पुनरावर्तिको धर्मः ४

परमार्थप्रपाटी ७

अथैकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् इत्यादिप्रकारेण ये न भजं
प्र ति तेषां जन्ममरणसंसाराद्दुर्वारत्वमाह द्वाभ्यां त्रैविद्या मामिति ऋग्य
जुःसामलक्षणास्तिस्रो विद्यास्ता सकर्मफलप्रशंसनभागास्त्रैविद्यं त
दनुष्ठातारस्त्रैविद्याः यज्ञावशेषीभूतं वल्लीरूपं सोमं पिबन्ति ते सोमपाः
पूतपापाः शोधितकल्मषाः सन्तो मामिन्द्रादिदेवतारूपेण इष्ट्वा पूज
यित्वा स्वर्गतिं स्वर्गलोकप्राप्तिं प्रार्थयन्ते ते पुण्यं पुण्यफलप्रदं सुरे
न्द्रलोकमासाद्य प्राप्य दिवि स्वर्गे दिव्यान् देवोपभोग्यान् भोगान् अश्न
न्ति भुञ्जते २०

वनमालीटीका ८

ये निःकामकर्मणा हरिमाराधयन्ति किं तु स्वर्गाद्यर्थं काम्यकर्माण्येव
कुर्वन्ति ते नित्यं दुःखप्रवाहे संसारे पुनःपुनः पतन्तीत्याह त्रैविद्या इति द्वा

भ्यां ऋग्वेदयजुर्वेदसामवेदरूपाहौत्राध्वर्यवौद्गात्रप्रतिपन्नहेतवस्ति
स्रो विद्या येषां ते त्रिविद्या एव त्रैविद्यास्तिस्रो विद्या वदंतीति वेदत्रय
विदो याज्ञिका यज्ञैरग्निष्टोमादिभिर्मामिंद्रियांतर्यामिणमिष्ट्वा तत्र मा
मजानंतो पि वस्तुतस्तेन रूपेणायिता अभिषुतं पूतं सोमं पिबंतीति सो
मपाः संतस्तेनैव सोमपानेन पूतपापा निरस्तस्वर्गभोगप्रतिबंधकपापाः
सकामतया स्वर्गतिं प्रार्थयंते ते दिवि स्वर्गलोके पुण्यं पुण्यफलं स
र्वोत्कृष्टं सुरेंद्रलोकं शतक्रतोः स्थानमासाद्य प्राप्य दिव्यानमनुष्यैरलभ्या
न् देवभोगान् देवदेहोपभोग्यान् कामानश्नंतीति भुंजते २०

कृत्स्नवैजयन्तीटीका ९

एवं महात्मशब्दाभिधेयानां भक्तिप्रधानानां ज्ञानप्रधानानां च निज
भक्तानां गतिमुक्त्वेदानीमपि तेषां विशेषं ज्ञापयितुं सकामानां स्वभ
क्तिहीनानामज्ञानानां गतिमाह द्वाभ्यां त्रैविद्या इति त्रैविद्याः तिस्र
णां विद्यानां समाहारस्त्रिविद्यं येऽधीयंते विदंति वा ते त्रैविद्याः विद
धीते तद्वेदेति सूत्रादण्प्रत्ययः केवलं ऋग्यजुःसामोक्तकर्मनि
ष्ठाः न तु ब्रह्मनिष्ठाः इत्यर्थः सोमपाः सोममिंद्रादिदेवयज्ञशेषं पि
बंतीति ते तथा न तु मद्यज्ञशेषं पिबंतः अत एव पूतपापाः पूतानि
विधूतानींद्रादिलोकप्राप्तिविरोधिरूपाणि पापानि कल्मषाणि येषां
ते तथा न तु मत्प्राप्तिविरोधिरूपपापाः संतो ये जनाः यज्ञैः केव
लेंद्रादिदेवमतयानुसंहितैस्त्रयीविहितैर्ज्योतिष्टोमादिभिर्मामिष्ट्वा इं
द्रादयो देवपतयः कृत्स्नात्मकाः कृत्स्नस्वरूपादस्य कृत्स्नस्वरूपकाः अ
तः कृत्स्नरूपाः कृत्स्नायतनस्वरूपस्थितिप्रवृत्तिकाः कृत्स्नदैश्वर्यकाः
इत्यजानंतो पि वस्तुतस्तेन रूपेणावस्थितं मामाराध्य स्वर्गतिं स्वः
फलं प्रार्थयंते ते मद्रूपेभ्य इन्द्रादिभ्यो याचंते ते जनाः पुण्यं पुण्योपार्जितं
सुरेंद्रलोकं स्वर्गं न तु मल्लोकं आसाद्य प्राप्य तत्र दिवि सुरेंद्रलोके दिव्या
न् दिविभवान् तत्रापि देवभोगान् देवोचितान् तत्रापींद्रादिदेवरू
पेण मय्येव दत्तान्भोगानश्नंति भुंजंतीत्यर्थः २०

मधुसूदनीटीका ९

श्री
गी टी
न

८३

ऋग्वेदयजुर्वेदसामवेदलक्षणा होत्राध्वर्योद्गात्रप्रतिपत्तिहेतवः
तिस्रो विद्या येषां ते त्रिविद्या त्रिविद्या एव स्वार्थिकतद्धितेन त्रैविद्याः
तिस्रो विद्या विदंतीति वा वेदत्रयविदो याज्ञिका यज्ञैरग्निष्टोमादिभिः
क्रमेण सवनत्रये वसुरुद्रादित्यरूपिणं मामीश्वरमिष्ट्वा तद्रूपेण माम
जानंतोपि वस्तुहृतेन पूजयित्वा अभिषुतस्य हुत्वा च सोमं पिबंतीति सोम
पाः संतः तेनैव सोमपानेन हृतपापाः निरस्तस्वर्गभोगप्रतिबंधकपा
पाः सकामतया स्वर्गतिं प्रार्थयंते न तु सत्त्वशुद्धिज्ञानोत्पत्त्यादिकं ते दि
वि स्वर्गलोके पुण्यं पुण्यफलं सर्वोत्कृष्टं सुरेंद्रलोकं शतक्रतोः स्था
ध नं आसाद्य दिव्यान् मनुष्यैरलभ्यान् देवभोगान् देवदेहोपभोग्यान्
कामानश्नंति भुंजते [illegible] २०

सदानन्दीटीका ११

एकत्वेन पृथक्त्वेन बहुधा ये त्रिविधा जनाः निष्कामा मामुपासीना भगवं
तमथो तज्ज्ञे १ धीशुद्ध्या ज्ञानतत्त्वबोधात् सिद्धा रागुच्छंत पवते ये सकामाः
कथंचिन्न भगवंतमुपासते २ किं तु काम्यानि कर्माणि पुनस्तिष्ठंति स
कामतः ते सत्त्वशुद्धभावेन तत्त्वत्यागपराङ्मुखाः ३ पुनः पुनर्जरामृ
त्युग्रबंधैनैव सर्वदा संसारदुःखभाजः स्युरित्याह भगवान्स्वयं ४ ति
स्रो विद्या ऋग्याद्या दि होत्रादिज्ञानहेतवः संति येषां त्रिविद्यास्ते त्रैवि
द्याः स्वार्थतद्धितात् ५ तिस्रो विद्या विदंतीति याज्ञिका वाध्वरैः क्रमात्
अग्निष्टोमादिभिस्ते मां वस्वाद्यात्मानमीश्वरं ६ तथात्वेनाप्यजानंतः इ
ज्यित्वा हि वस्तुतः अभिषुतस्य हुत्वा सोमं पिबंतीति च सोमपाः ७ तेनै
व ध्वस्तस्वर्गादिप्रतिबंधककल्मषाः स्वर्गतिं प्रार्थयंते तेन तु धीशुद्धि
मातुलाः ते सत्पुण्यफलं प्राप्य लब्ध्वा स्थानं शतक्रतोः देवदेहोपभो
ग्यांश्च कामानश्नंति नाकगान् ९ । २०

नीलकंठीटीका १२

ये पुनः कर्मसु प्रकारेष्वप्यनन्येन नापि मां न भजंते ते केवलकर्मठाः कां ग
तिं प्राप्नुवंतीति स्पृशन् त्रैविद्या इति तिस्रः ऋग्यजुःसामरूपाः वि
द्या येषां ते त्रिविद्याः त एव त्रैविद्याः सोमपाः सोमपायिनो याज्ञिकाः

यज्ञैर्मामिष्ट्वा स्वर्गतिफलं प्रार्थयंते दिव्यान् अप्राकृतान् संकल्पमा
त्रोपनतान् दुःखासंभिन्नान् २०

इदानीं भेदज्ञानेन क्रियमाणं आनंदीटीका १३ कर्मपरिमितफलमित्युपदिशति ॥

त्रैविद्याः त्रैवर्णिकाः वेदत्रयविदो याज्ञिकाः पूतपापाः श्रुतिविहित
निषेकादिसंस्कारसम्पन्ना विगतपापाः सोमपा अथाग्निसनैमित्ति
ककर्मानुष्ठायिनः मां श्रुत्युक्तानात् शक्रादिमूर्तिं यज्ञैः इन्द्रदेव
तादिभेदभिन्नैः बहुभिर्ज्योतिष्टोमादिभिरिष्ट्वा स्वर्गतिं प्रार्थयन्ते तेनैते
र्यन्ते विशेषैस्तैस्तैर्देवविशेषान् भजन्ते मामेकं विष्णोस्तुरूपमजानन्तो
पि मामेव यजन्ते [illegible] विशेषमाह २०

इदानीमपरदेवप्रकृत्याश्रितानां रामकंठीटीका १४ अक्षमाणां प्रवृत्तिं प्रतिपादयितुमाह ॥

ज्ञानरहितक्रियामात्रोपदेशपर्यवसितार्थो ऋग्यजुःसामलक्षणास्ति
स्रो विद्या अधीयंते विदंति वा त्रैविद्या अनुष्ठेतया ब्राह्मणादयस्त्रैवर्णिकाः
पूतपापाश्च निषेकाच्छास्त्रविहितसंस्कारसंपन्नत्वाद्धुतकल्मषास्त
था नित्यं तपश्चोत्क ब्रह्मचर्याश्रमनियमास्सन्तः सोमपा नित्यनैमि
त्तिकस्वकर्मानुष्ठाननिष्ठा इत्यर्थः तथाविधाः सन्तो देवतान्तरयजनवि
धित्सु पर्यन्ते तैस्तैः शास्त्रचोदितैर्यागविशेषैः सम्यग्ज्ञानाभावाद् विदंतो
पि मामेवेष्ट्वा पूजयित्वा स्वर्गतिं देवलोकप्राप्तिकामात्मानः सन्तः प्रार्थ
यंते उपयाचंते यतस्ते यत्तद्विधिभिस्तांस्तान्देवविशेषान् भजन्ते इति वि
ष्णोस्तु रूपमेकं तत्त्वं मामेव यजन्ते केवलं संप्रति विद्याशमनं तु ह्यदी
नाः परं मदीयं भावमविदंतो भोगमात्रं यज्ञादिक्रियाफलं मन्यमानाः
स्वर्गमभिकांक्षन्तीति २०

लासिकी [illegible]टीका १५

+ निस्त्रश्च कामयजुर्लक्षणा विद्या अधीयन्ते विदन्ति वा त्रैविद्या अनुष्ठेत
या ब्राह्मणादयस्त्रैवर्णिकायाज्ञिकामामीश्वरं सगुणं निर्गुणं वा इष्ट्वा सं
पूज्य स्वर्गतिं देवलोकप्राप्तिं प्रार्थयन्ते उपयाचन्ते कीदृशाः सन्तः सो
मपायन्तशेषं सोमं पिबन्तीति सोमपाः अतएव पूतपापा निरस्तसंभो
गप्रतिबन्धकपापाः ते तथाविधा देहान्ते अनुष्ठितकर्मोपनतं पुण्यं पुण्य
फलरूपं सुरेन्द्रलोकं स्वर्गलोकमासाद्य प्राप्य दिवि स्वर्गे दिव्याननुमान्दे

+ इत्थं निष्कामतया भजमानानां मोक्षरूपं फलमुक्त्वा येत्वेवंभूतं सगुणं निर्गुणं वा मामीश्वरं स
कामतया भजमानास्तेषां जन्ममृत्युप्रवाहो भवतीत्याह ॥

व्यभोगानश्नन्तिभुञ्जते २०

पंचोलीटीका

येपूर्वोक्तैर्निवृत्तिप्रकारैरेकत्वपृथक्त्वादिविज्ञानैः यज्ञैर्मामुपासते तथाविज्ञानंतेमामेवप्राप्नुवंतियेपुनरक्ताः कामकामास्ते संसारमेवानुवर्तंतेइत्याह त्रैविद्याइतित्रयीयमेकेवलंवैदिकंकर्माश्रिताः त्रैविद्याः सोमपायिनः पूतपापाः शुद्धकिल्बिषाः तेनैवसोमपानेनशुद्धकिल्बिषाः यज्ञैरग्निष्टोमादिभिः मांवस्वादिरूपेणइष्ट्वा पूजयित्वा स्वर्गगमनंप्रतियेप्रार्थयंते तेपुण्यंपुण्यफलंसुरेंद्रलोकंशतक्रतोः स्थानंआसाद्यसंप्राप्यदिविस्वर्गेदिव्यानप्राकृतान्भोगान्अश्नंतिभुंजते २०

रसावीरसमसिद्धोधिनी

एवंस्वविभूतिंप्रपंचयित्वा तदज्ञानांप्रवृत्तिंसफलामाह त्रैविद्याइतिद्वाभ्यां अथवा ननु यदित्वमेवैकेषांमोक्षदोपरेषांसंसारदश्च तथैवप्रपन्नाप्रपन्नताहेतुश्चासि ततस्तवविषमदृष्टेः कोहंपा पारमैश्वर्यमित्यर्जुनाभिप्रायमाशंक्य स्वकर्मानुसारेण नाहंपोषणंतथावतेषांताहूषणीगतिरित्यभिप्रायवानाह त्रैविद्याइतिद्वाभ्यांतिस्रोविद्याऋक्सामयजुर्लक्षणाविदंत्यधीयतेवायेते त्रैविद्यास्त्रिवेदपाठिकास्तेनसर्ववर्णिकाब्राह्मणाः त्रिविद्याश्चसोमपाः सोमंयज्ञशेषंपिबंतीति अनुष्ठिताग्निहोत्रादियज्ञाग्निष्टोमिन इति यावत् अतएवपूतपापाजन्मांतरार्जितपापरहितानिषेकादिसंस्कारसंपन्नत्वाद्धतकल्मषावा तथाविधाः संतश्चते यज्ञैरश्वमेधादिभिर्मांपरमेश्वरमिष्ट्वास्वर्गतिंस्वर्गादिलोकप्राप्तिंप्रार्थयंतेभिलषंति तदभिलाषेणैवतास्तान्यज्ञानाचरंतीतिभावः तेच पुण्यंपुण्यप्राप्यंसुरेंद्रलोकंशतक्रतोर्धामासाद्यदिविद्युलोकेदेवानांभोगानश्नंतिभुंजते २०॥

मधुभाष्य

त्रैविद्या इत्यादिना अनन्याः अन्यदचिंतयित्वा तथाहि
भोजनमखिलेषु सर्वं परित्यज्य मनोगतं यद्विना देवं केश
वं शुद्धमाद्यं ये चिंतयंतीदृतमेव धीरा अनन्यास्ते देवमेवा
विशंतीति कामं कालेन महता पक्वांतिवास्समाहितैः
प्राक्नोद्दृष्टुं स भगवान्स्वभासं दृश्यमंडल अतिचमोलथ
मैं नियमभिनः सर्वतोमुक्तानां तदृष्टिकृदित्याय सत्य
मित्यनयाह २०॥

भाषा अनुवाद

मूढ मेरा अनादर करते औ महात्मा मेरी भजन करते ऐसे पूर्व
मे भक्त अभक्त के लक्षण कहि के अब मूढों का जन्म मरण
रूप संसार प्रवाह दुर्निवारहै यह दो स्रोकमे कहतेहैं कि जो
मनुष्य ऋक् यजुः साम वेद पढते वे त्रैविद्य अर्थात् वेदोक्त
कर्म्म परायण यज्ञ के द्वारा सर्व्व रूप जो मै मेरी ही पूजा करि
औ सोमलताका रस पीकर पूतपाप होय सेच्छासे स्वर्गलोक
को जाते और पुण्य फल रूप स्वर्ग प्राप्त होय वहांके उत्तम
देवभोग्य वस्तुवों का भोग करते हैं २०

चौपई

विद्यात्रयअधिकारी जोई पानकरें यज्ञशेष हि कोई यज्ञक
रपापछीणभए जोई मांगतस्वर्गगति को सोई सोपुनपु
ण्यलोकको पाय इंद्रभवनसुंदरसोभाय भोगतदिव्यत
हांसो भोगा जो दिवि देवनके है योगा २०॥

85

ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं
विशंति एवं त्रयीधर्म्ममनुप्रपन्ना गतागतं काम
कामा लभन्ते २१

शाङ्करभाष्य १

तेतमिति ते तं भुक्त्वा स्वर्गलोकं विशालं विस्तीर्णं क्षीणे पुण्ये
मर्त्यलोकमिमं विशन्त्या विशन्ति एवं हि यथोक्तेन प्रकारेण त्रयी
धर्म्मं केवलं वैदिकं कर्म्मानुप्रपन्नास्ते गतागतं गतञ्चागतञ्च
गतागतं गमनागमनं कामकामाः कामं कामयन्त इति कामका
माः लभन्ते गतागतमेव न तु स्वातन्त्र्यं क्वचिल्लभन्त इत्यर्थः २१

आनन्दगिरिकृतटीका २

तर्हि स्वर्गप्राप्तेरपि भगवत्प्राप्तितुल्यतामित्याशंक्याह ते तमिति
पुण्ये स्वर्गप्राप्तिहेताविति यावत् प्रसिद्धोर्थो हिशब्दः त्रयाणां ऋ
ग्वादीनां वेदत्रयविहितानां धर्म्माणां समाहारस्त्रयीधर्म्मं तदेव त्रैध
र्म्यं तदनुप्रपन्नास्तदनुगता इति यावत् कामकामानां गमनागमन
द्वारा कामितत्फलासिद्धेर्दृष्टमेव चेष्टितमित्याशंक्याह गतेति २१

स्वामिकृतटीका ३

ततश्च ते तमिति ते स्वर्गकामास्तं प्रार्थितं विपुलं स्वर्गलोकं तत्सुखं भुक्त्वा
भोगप्रापके पुण्ये क्षीणे सति मर्त्यलोकं प्रविशंति पुनरपि एवं वेदत्र
यीविहितं धर्ममनुसृताः कामकामा भोगान् कामयमानां यातायां गतागतं
तं लभंते २१

पैशाचभाष्यटीका ४

ते तमिति ते स्वर्गिणः विशालं विस्तीर्णं क्षीणे पुण्ये मर्त्यलोकं विशं
ति एवं यथोक्तेन प्रकारेण त्रयीधर्मं ऋग्यजुस्साम वेदोक्तधर्ममनुप्र
पन्ना आश्रिताः गतागतं गमनागमनं विषयान्कामान् कामयन्त इति
कामं लभंते प्राप्नुवन्ति २१

रामानुजभाष्यटीका ५

श्री
गी टी
न

[illegible]नं विशालं स्वर्गलोकं भुक्त्वा तदुपभोगहेतौ पुण्ये क्षीणे सति पुनर्मर्त्यलोकं विशन्ति एवं त्रय्युक्तसिद्धसाधनविमुखाः काम्यस्वर्गादिकामाः केवलं त्रयीधर्ममनुप्रपन्ना गतागतं लभन्ते अस्थिरस्वर्गादीनत्र श्रयागम पुनः पुनरावर्त्तन्त इत्यर्थः [illegible]

श्री अभिनवगुप्तकृतटीका ९

एवमपि ये मानेव यज्ञं तेनधना विदुर्नामन्यथा ये यामिनकर्मनिरतत्व ऊर्द्धलनयानसर्गादिभोगाः तेनावकल्पेनावर्द्धितेति अतएवैषां पुनरावर्तको धर्मः एवं ते गतागतं लभन्ते न तु यागमपुनरावृत्तिप्रसवधर्मः स्वभावः ॥२१॥

परमार्थप्रपाटीका ७

ततः किंभवतीत्याह ते तमिति ते तमुक्तप्रकारं स्वर्गलोकं विशालं स्थूलफलदं भुक्त्वा पुण्ये क्षीणे सति मर्त्यलोकं विशन्ति देवदेहं मुक्त्वा पुनर्लिंगदेहेन गर्भं प्रविशन्ति एवमुक्तप्रकारेण त्रयीधर्मं च आदर्शितं फलप्रशंसनरूपं धर्मं प्रवृत्तलक्षणमप्रपन्नाः यान्ति का कामान् विषयान् कामयन्ते ते कामकामाः सन्तः गतागतं यातायातं लभन्ते श्रुतिरपि शतपथी आत्मानमेव लोकमुपासीत स य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयते अस्माद्ध्येवात्मनो यद्यत्कामयते तत्तत्सृजत इति भाष्ये अन्यदेवतोपासनया नश्वरं फलं प्राप्यत इति शंक्यते तस्मादात्मानमेव लोकं लोकंते प्राप्यते सर्वमनेनेति लोकस्तमेवात्मानमेवोपासीत तात्पर्यं स यः आत्मानमुपास्ते तस्य ह इति निश्चयेन कर्म न क्षीयते भोगेनोपक्षीणं न भवति किं तु ज्ञानमुत्पाद्य मोक्षं प्रापयति अथ सविषयसुखोपेतस्थानं हि तदप्यात्मन एव प्राप्यत इत्याह अस्मादिति अस्मादात्मनः सकाशात् यद्यत्कामयते तत्तत्सृजते सिद्धआदिकमुत्पादयति किं पुनरमन्त् तदुक्तं टिप्पणिकायां यत्समर्थमनउपासितं तमसमुत्तमासमर्थयते लभते अन्योपासनया तस्यैवचफलं प्राप्यं सूतराजादिवत् आयासमदृशोपि तद्बहुफलदं मार्गं मन्दमतिः कथं मायावैभवमेतदेवत दिदं भगवान् हरेर्वार्यते ॥२१॥

वनमालीटीका ९

ते सकामास्तं काम्येन पुण्येन प्राप्तं विशालं विस्तीर्णं स्वर्गलोकं भुक्त्वा
तद्भोगजनके पुण्ये क्षीणे सति तद्देहनाशात्पुनर्देहग्रहणाय मर्त्यलोकं
विशन्ति पुनर्गर्भवासादियातनां अनुभवन्तीत्यर्थः एवं हि त्रयीधर्मं वेदत्र ऽत्रै
य धर्मं त्रय्या हि ज्योतिष्टोमादिकं काम्यं कर्म त्रयीधर्ममिति पाठे त्र
य्या वेदत्रयेण प्रतिपादितं धर्ममिति स पदार्थः अनुप्रपन्ना अनादौ संसा
रे सर्वप्रतिपन्नापेक्षया अनुशब्दः सर्वप्रतिपन्नानन्तरं मनुष्यलोकमागत्य पु
नः प्रतिपन्नाः कामकामा दिव्यान्भोगान्कामयमानाः एवं गतागतं
ते कर्म कृत्वा स्वर्गं यान्ति तत आगत्य पुनः कर्म कुर्वन्तीत्येवं गर्भवासादि
यातनाप्रवाहमनवरतं लभन्त इति भावः २१

क्षेमवैजयन्तीटीका ९

ननु यद्येवं तर्हि तेषां का हानिरित्याशंक्य यामत्यागभावेन संसारनि
वृत्त्यभावात्तेषां महती हानिः स्यादित्याह ते तं भुक्त्वेति ते त्रैविद्याः सका
माः पुरुषाः तं प्रार्थितं विशालं विपुलं स्वर्गलोकं भुक्त्वा विपुलस्वर्गसुखो
पभवहेतुभूते पुण्ये क्षीणे भोगेनानश्यिपुण्ये तयं प्राप्ते सति पुनरपि
मर्त्यलोके जन्ममरणादिविकारयुक्तं मनुष्यलोकं विशन्ति पञ्चाग्निवि
द्योक्तरीत्या भुवि प्राह्मणादिजन्मानि लभन्त इत्यर्थः एवमुक्तप्रका
रेण त्रयीधर्मं ऋग्यजुस्सामभिर्विहितं धर्मं सम्यक् प्रपन्ना अनुतिष्ठन्तः
कामकामाः स्वर्गादिभोगेच्छवः गतागतं यातायातं लभन्ते संसरन्ति प्रा
प्नुवन्तीत्यर्थः २१

ततः किमनिष्टमिति तदाह ॥ मधुसूदनीटीका ९

ते सकामाः तं काम्येन पुण्येन प्राप्तं विशालं विस्तीर्णं स्वर्गलोकं भुक्त्वा
तद्भोगजनके पुण्ये क्षीणे सति तद्देहनाशात्पुनर्देहग्रहणाय मर्त्यलोकं
विशन्ति पुनर्गर्भवासादियातनामनुभवन्तीत्यर्थः पुनः पुनरेवमुक्तप्र
कारेण हि प्रसिद्धार्थः त्रयीधर्मं हि त्रयीधर्मं वेदत्रयधर्मं त्रय्या हि ज्योतिष्टोमा
दिकं काम्यं कर्म त्रयीधर्ममिति पाठे त्रय्या वेदत्रयेण प्रतिपादितं ध
र्ममिति स पदार्थः अनुप्रपन्नाः अनादौ संसारे सर्वप्रतिपन्नापेक्षया

श्री
गी टी
न

८७

उत्तरात्: सर्वं प्रतिपद्यमनंतरं मनुष्यलोकमागत्य पुनः प्रतिपन्नाः काम
कामाः दिव्यान् भोगान् कामयमाना एवं गतागतं लभंते कर्म कृत्वा
स्वर्गं यांति तत आगत्य पुनः कर्म कुर्वंतीत्येवं गर्भवासनादियातना
प्रवाहक्लेशमनिशमनुवर्ततइत्यभिप्रायः [illegible] २१

सदानंदीटीका ११

विस्तीर्णं स्वर्गलोकं ते भुक्त्वा रंभामतादिना स्वप्नाभेनैव भोगेन क्षीणे
पुण्ये सतीष्टदे १ तद्देहनाशतो भूयो देहग्रहणसिद्धये पुनर्गर्भवि
वासादियातनौकाविशंति च २ एवं ते वैदिकं कर्म ज्योतिष्टोमादिकं
पुनः कृत्वा तेन पुनः स्वर्गमर्त्यलोकं पुनः स्वते ३ इत्थं गतागतं भो
गकामुकास्ते निरंतरं लभंते संसृतौ दुःखं लभंते नैव निर्वृतिं ४ । २१

नीलकंठीटीका १२

त्रयी वेदत्रयी तस्यां प्रोक्तं धर्मं त्रयीधर्मं काम्यं यत्तं कामकामाः वि
षयकामुकाः गतागतं यातायातं स्नातत्येन लभंते तथा च श्रुतिः
प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म एतच्छ्रेयो
येऽभिनंदंति मूढा जरामृत्युं ते पुनरेवापियंतीति अष्टादश षोडशर्त्वि
जः यजमानः पत्नी चेति विद्धो २१

परत्वं ज्ञानेन त्वार्ष्टिनायां विशेषमाह ॥ आनंदीटीका १३

एवमनेन प्रकारेण भेददृष्टानां फलकामनया त्रयीधर्ममनुप्रपन्ना ग
तागतं लभंते इत्यर्थः [illegible] २१

रामकंठीटीका १४

तेन यथाविधानं विधाय देहांते स्वकर्मोपनतं स्वर्गलोकं विशालं विपुलं
देवलोकं गत्वा तत्रत्यान् भोगान् भुक्त्वोपसेव्य स्वकर्मोपार्जितपुण्ये तदनु
रूपकालातिवाहनात् क्षीणे तं गते मर्त्यलोकं कर्मभूमिमिमां स्वकर्मा
नुरूपजन्मविशेषाश्रयणेन विशंति प्रतिपद्यंते एवमनेन क्रमेण
त्रयीधर्मं वेदोक्तं स्वस्वमाचारमनुप्रपन्नाः समाश्रिताः संतः कामका
माः स्वर्गादिभोगाभिकांक्षिणः आनर्वर्णिका अपि गतागतं गतं स्व
र्गादिभूमौ गमनं आगतं ततो भूयः कर्मभूमावागमनं लभंते प्राप्नुवं

तिसंसारबंधभागिनः पुनः पुनर्भवन्तीत्यर्थः [illegible]
[illegible] २१

लासिकी [illegible]टीका १५

ततश्च — ते सकामास्तं प्रार्थितं विस्तीर्णं स्वर्गलोकं भुक्त्वा तत्स्वर्गमनुभूय तद्भो
गजनके सुकृते तदनुरूपकालातिवाहनात् क्षीणे सति मर्त्यलोकं ग
र्भवासादिदुःखोपेतं कर्मभूमिं स्वकर्मशेषानुरूपजातिविशेषाश्रय
णेन विशन्ति प्रविशन्ति एवमनेन क्रमेण त्रयीधर्मं वेदोक्तं सम्यक्समा
चारमनुप्रपन्नाः समाश्रिताः सन्तः कामकामाः स्वर्गादिभोगान्कामय
मानाः स्वात्तुर्वर्णिका गतागतं स्वर्गादिगमनं भूयस्ततः कर्मभूमावाग
मनं लभन्ते न तु तत्परमविनाशिनं मोक्षानन्दम् तदुक्तं कुलार्णवे
जन्तवः कृत्वेह कर्माणि स्वर्वेदुःखानि भुंजते परत्र तानि तेनादेवियान्त्या
यान्ति पुनः पुनरिति [illegible]
[illegible] प्रतीक्षमाणानां कथं
[illegible]
२१

पंचोलीटीका

किं वृत्ते तमिति ते सोमपाः तं विशालं स्वर्गलोकं भुक्त्वा क्षीणे पु-
ण्ये मर्त्यलोकं विशन्ति एवं उक्तप्रकारेण त्रयीधर्मं केवलं वैदिकं क
र्म अनुप्रपन्ना आश्रिताः कामान्कामयन्त इति कामकामाः गतागतं
गमनागमने लभन्ते न तु स्वातंत्र्यं मोक्षं लभन्त इत्यर्थः २१

रणवीरसमिद्धोधिनी॥

ते चैतं विशालं विपुलं स्वर्गलोकं भुक्त्वा पुण्ये तन्निमित्तभूते यज्ञा
चरणादिरूपे धर्मे क्षीणे फलभोगादिक्षेपे सति मर्त्यलोकं विशन्ति
भूमौ जन्मान्तरार्जितबलवन्नरकर्मविशेषानुसारेण तांतां योनिं
प्रपद्यन्ते एवं यथोक्तेन प्रकारेण त्रयीधर्मं वेदत्रयीप्रतिपादितं य
ज्ञादिरूपमेव स्वं स्वमाचारमनुप्रपन्नाः समाश्रिताः कामकामाः
स्वर्गादिभोगाभिलाषिणो गतागतं स्वर्गादिप्राप्तिं ततो भूयः कर्म

भूमावेवं तत्र गतं च पुनः पुनर्लभंते न पुनर्विश्रांतिमिति भावः य
द्वा त्रैविद्या वेदत्रयीप्रतिपादितकर्माधिकारिणो हिंसाप्रायमत्र
यस्यास्य प्रख्यातत्वाद्दैविद्यास्त्वत्रियास्तद्वृत्तयो ब्राह्मणा वा
तत्र भीष्मद्रोणौ ब्रह्मवादिनः दाशरथिधनंजयादयो वा न प्रसि
द्धतयः दुर्योधनपांडवादयस्त्व बहवोऽत्र हस्त्याः एते च प्रख्याताः क्षत्रि
याः अश्वत्थामभार्गवरामद्रोणकृपादयस्तु क्षत्रियवृत्तयो ब्राह्मणा
उदाहरणीयाः एते सर्वे च यज्ञेश्वरतृणीध्यायप्रतिपादितलक्षणो
वैवादिप्रकारभिन्नैरनेकविधैर्युद्धयज्ञैर्मां परमेश्वरमिष्ट्वा संपू
ज्य तोषयित्वेति यावत् परमेश्वरचोदितमेतत्सर्वकर्मेति प्रीतिः
पूर्वकस्वर्गादिभिमतार्थकरमेवास्त्विति संकल्पेनानुष्ठीयमानत्वा
त्तत्संतोषोत्पत्तिरिति ध्येयं ततोनंतरं सोमं यज्ञशेषं हुतशेषं वा
वशिष्टं परकीयं स्वकीयं वा राज्यादिकं पिबंत्यश्नंति उपभुंजते
यांति पालयंति वा ये ते तादृशाः अतएव परमेश्वरप्रीणनकाम
नयानुष्ठानादेव पूतपापाः गुरुपितृपुत्रादिहिंसाजन्यपापरहि
ताः संतः स्वर्गतिं यज्ञफलभूतमसाधुर्जन्यमनादृत्य स्वर्गादिलो
कं प्रार्थयंते अभिलषंति स्वर्गादिलोकप्राप्तिमेव संकल्प्य युद्धादिक
र्माचरंतीत्यर्थः ते पुण्यमित्यादि पूर्ववत्समानं अत्र च वैश्यानां यु
द्धेनधिकाराद्ब्राह्मणक्षत्रिया एव त्रैविद्यशब्देन व्याख्याता तत्र
क्षत्रियस्य मुख्याधिकृतिर्युद्धे ब्राह्मणस्य गौणी वैश्यानां तु निषि
द्धैव पूर्वपूर्वेषामेवोत्तरोत्तरसंबंधिवृत्तिप्रतिगौणोधिकारः
न पुनरुत्तरोत्तरेषामपि पूर्वपूर्ववृत्तिप्रतिचरणसांकर्यमिव यथासां
कर्यादितत् एतदंतेन चत्रंथेन सविभूतिकं ज्ञानं प्रतिपादितं
२१॥

मधुभाष्य

२१॥

भाषा अनुवाद

फेरि तेई स्वर्ग कामी मनुष्य अपना इष्ट विपुल स्वर्ग सुख भोग करिके जब पुण्य क्षीण भई तब फेरि मर्त्य लोकमे आवत हैं आयकै फेरि वही वेद त्रयी विहित धर्म्म कर्म्म करिके भोग कामना कारी लोग गमना गमन मात्र लाभ किया करते हैं अर्थात् कभी नीचे आते औ कभी उपर जाते रहते है २१ ।

चौपई

सो तिह स्वर्गलोक कहुं भोगी अति विशाल कहें जिह लोगी
ते पुन पुण्य क्षीण भए जाई मानुष लोक कहुं आए वसाई
ऐसें वेद तीन का जाई धर्म कहु जो अनुवर्ते काई भोग गता
गत कूं पावहि जे हैं तिह अभिलाखी जन सो लेहें २१ ॥

89

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते तेषां नि
त्याभियुक्तानां योगक्षेमं वहाम्यहं २२

शाङ्करभाष्यटीका १

ये पुनः निष्कामाः सम्यग्दर्शिनः अनन्या इति अनन्या अपृथग्भूताः परं देवं नारायणं आत्मत्वेन गताः सन्तश्चिन्तयन्तो मां ये जनाः संन्यासिनः पर्युपासते तेषां परमार्थदर्शिनां नित्याभियुक्तानां सतताभियोगिनां योगक्षेमं योगोऽप्राप्तस्य प्रापणं क्षेमस्तद्रक्षणं तदुभयं वहामि प्रापयाम्यहं ज्ञानी त्वात्मैव मे मतं स च मम प्रियो यस्मात्तस्मात्ते ममात्मभूताः प्रियाश्चेति नन्वन्येषामपि भक्तानां योगक्षेमं वहत्येव भगवान् सत्यमेवं वहत्येव किन्त्वयं विशेषोऽन्ये ये भक्तास्ते आत्मार्थं स्वयमपि योगक्षेममीहन्ते अनन्यदर्शिनस्तु नात्मार्थं योगक्षेममीहन्ते नहि ते जीविते मरणे वात्मनो गृद्धिं कुर्वन्ति केवलमेव भगवच्छरणास्ते अतो भगवानेव तेषां योगक्षेमं वहतीति २२

आनन्दगिरिकृतटीका २

फलमनभिसन्धाय मामेवाराधयतां सम्यग्दर्शननिष्ठानामत्यन्तनिष्कामानां कथं योगक्षेमं स्यातामित्याशंक्याह ये पुनरिति तेषां योगक्षेमं वहामीत्युत्तरत्र सम्बन्धः येभ्योऽन्यो न विद्यत इति श्रुतिमाश्रित्याह अपृथगिति कार्यस्येव कारणे कर्मतादात्म्यं यावन्तयति परमिति अहमेव वासुदेवः सर्वात्मा न मत्तोऽन्यत् किञ्चिदस्तीति ज्ञात्वा तमेव प्रत्यञ्चं सदा ध्यायन्त इत्याह चिन्तयन्त इति प्राकृतान् व्यावर्त्य सर्वानधिकारिणो निर्दिशति संन्यासिन इति पर्युपासते यतिनः सर्वतोऽनवच्छिन्नतया पश्यन्तीत्यर्थः नित्याभियुक्तानां नित्यमनवरतमादरेण ध्याने व्यापृतानामित्याह सततेति योगस्य क्षेमस्य च योगक्षेमं तत्रापुनरुक्तमर्थमाह योग इति किमर्थं परमार्थदर्शिनां योगक्षेमं वहामीत्याशंक्याह ज्ञानीत्विति अतस्तेषां योगक्षेमं वहामि इति सम्बन्धः सम्यग्दर्शननिष्ठानामिव योगक्षे

मं वहति भगवानिति विशेषणमनुष्यमाणः शङ्कते नन्विति अन्ये
षामपि भक्तानां भगवान् योगक्षेमं वहतीत्येतदङ्गीकरोति सत्यमि
ति तर्हि भक्तेषु ज्ञानिषु च विशेषो नास्तीति पृच्छति किंत्विति तत्र
विशेषं प्रतिज्ञाय विवृणोति अयमित्यादिना योगक्षेमसुद्दिश्य
स्वयमीहन्ते चेष्टां कुर्वन्तीति यावत् आत्मविदो स्वार्थयोगक्षेमसुद्दि
श्य चेष्टाभावं स्पष्टयति नहीति अस्थिरपेक्षाकामानामित्येतत् ज्ञा
निनां तर्हि सर्वज्ञानाश्येत्याशंक्याह केवलमिति तेषां तदेकशरण
त्वे फलितमाह अतइति इतिशब्दो विशेषशब्देन सम्बध्यते २२

स्वामिकृतटीका ३

मद्भक्तास्तु मत्प्रसादेन कृतार्था भवन्तीत्याह अनन्या इति मद्व्यतिरेके
णान्यत् काम्यं येषां ते तथाभूता ये जना मां चिंतयंतः सेवंते तेषां नित्या
भियुक्तानां सर्वदा मदेकनिष्ठानां योगं धनादिलाभं क्षेमं च तत् पालनं
मोक्षाख्यं वा तैरप्रार्थितमप्यहमेव वहामि प्रापयामि २२

पैशाचभाष्यटीका ४

अनन्या इति न विद्यते मत्तः ईश्वरादन्य उपास्यो येषां ते अनन्याः चिंतयंतः
ये नराः पर्युपासते तेषां मयीश्वरे नित्याभियुक्तानां योगस्य क्षेमस्य यो
गक्षेमं वहामि बिभर्म्यहं २२

महात्मानस्तु निरतिशयप्रियम् यानंदमाप्य नवृत्तते इति रामानुजभाष्यटीका ५ चिंतनं कृत्वा मामनवधिकातिश तेषां विशेषं दर्शयति ॥

अनन्या इति अनन्याः अनन्यप्रयोजना मच्चिंतनेन विनात्मधारणाभा
वात् मच्चिंतनैकप्रयोजना मां चिंतयंतो महात्मानो जनाः पर्युपासते
सर्वकल्याणगुणान्विते सर्वविभूतियुक्तं मां परित उपासते तेषां नित्या
भियुक्तानां मयि नित्याभियोगं कांक्षमाणानामहं मत्प्राप्तिलक्षणं यो
गं अपुनरावृत्तिलक्षणं क्षेमं च वहामि २२

अभिनवगुप्तकृतटीका ६ तथाहि नेऽन्यानन्यमां चिंतयंतः कथं

मनन्या अविद्यमानमन्यत्स्वरूपप्रतिष्ठालाभपरि[illegible] मद्व्यतिरिक्तं काम्यमनीयं फलं येषामिति योगो अप्रतिलब्धमत्स्वरूपलाभः क्षेमं प्राप्तभगव त्वलाभं येन योगभ्रष्टत्वशङ्कापि न भवेदित्यर्थः २२ ॥

परमार्थप्रपाटीटीका ७

एवं तद्देवतोपासकानां प्रयासवैयर्थ्यमुक्त्वा स्वोपासकानां सत्वोपा
यप्राप्तिं दर्शयति अनन्या इति न विद्यते मत्तोऽन्या देवतांतरं येषां ते अ

तस्याः संतोये जनाश्चिंतयंतः केवलं स्वांतो नत्र द्रव्यव्ययकायक्लेशोक्त
र्णाणः मामुपासते तेषां नित्यं निरंतरं अभियुक्तानां अभितोमद्योगामि
च्छूतां अहं योगक्षेमं वहामि अभ्यासादियोगे क्रियमाणे निर्विघ्नतया
समापनं क्षेमं निर्वहामि २२

वनमालीटीका ८

निःकामानां स्वभक्तानां स्वैकशरणीयत्वमाह अनन्याइति नान्योम
ध्यतिरिक्तोभीष्टतया चिंतनीयो येषां ते तन्याः भगवत्वासुदेवोनंतगु
णालयोस्माकं स्वामी गुरुरिष्टदेवो नेनद्भिन्नं देवनाधिकमैहिकामुष्मिक
भोगप्रदं सर्वं हर्यधीनमिति निश्चित्य मां चिंतयंतः पर्युपासते विजानीय
प्रत्ययानंतरीतसजातीयमदाकारमनोवृत्तिप्रवाहमविशंकं कुर्वंति तेषां
मदर्थे त्यक्तसर्वारंभाणां नित्याभियुक्तानां नित्यमनवरतमादरेण म
ध्याने व्याप्तानां देहयात्रामात्रार्थमप्यप्रयतमानानां योगक्षेमं चाल
ब्धस्य लाभं लब्धस्य रक्षणं च देहस्थित्यर्थं योगक्षेमममकामयमानाना
मप्यहं सर्वेश्वरो वहामि यद्यपि सर्वेषामपि योगक्षेमं वहति हरिर्विश्व
भरत्वात्तथाप्यन्येषां प्रयत्नमपेक्ष्य तत्द्वारा तानिष्टभक्तस्य तदर्थप्रय
त्नमनपेक्ष्य वहतीति विशेषः २२

कुसुमवैजयन्तीटीका ९

यथादेवांतरोपासकाः तेभ्याह अनन्याइति येमहात्मानो जना मे भक्ताः
अनन्याः मदन्यदेवभावसाधनफलसम्बन्धादिरहिताः मच्चिंतनं विना
क्षणमप्यात्मधारणमलभमानाः मच्चिंतनैकप्रयोजना ये महात्मानो ज्ञ
नामदनन्यभक्ताः मां सर्वोपायोपेयसम्बन्धादिरूपं सर्वात्मानं सर्वेश्वरं
चिन्तयन्तो ध्यायन्तस्सन्तः पर्युपासते परितः स्वाभाविकाचिंत्यानंतम
गलगुणगणाश्रयतया अनंताद्भुतविचित्रलीलाश्रयतया
अनंतासंख्येयदिव्यविभूत्याश्रयतया चोपासते भजंति नित्याभियुक्ता
नां नित्यं सर्वदैवाभियुक्तानां मत्संयोगमिच्छतां मच्चिंतनेन विस्मृत
देहगेहादियात्राणां मदर्पितात्मात्मीयादिभाराणां तेषां महात्मानां
योगक्षेमं मत्प्राप्तिलक्षणं योगमपुनरावृत्तिलक्षणं क्षेमं चाहं वहामि

श्री
गी टी
न

91

स्वकीयं परमेश्वरत्वज्ञापकं स्वाभाविकं स्वानन्दांशगुणशक्त्यादिकं च सर्वं
विस्मृत्य तद्भक्त्या वशीभूतः सन्नहमेव तत्कार्यं करोमि नान्यैर्देवादिभिः
कारयामीत्यर्थः करोमीत्युक्त्वा वहामीत्युक्तेस्त्वयमाशयः ममैवेदं गृ
हं ममैवेदं धनं ममैवेदं पशुपत्न्यादिकं ममैवेयं स्त्री ममैवायं पुत्रोपेक्षिता
न्नोदकादिनाहमेव न पालयामि तद्देहे तेमदधीनस्थितिप्रवृत्तिकाः स
र्वथा ते वनजीविष्यन्तीत्येवं स्वामीयत्वाभिमानेन स्वपोष्यवायमिति निवे
शस्नेहादिना च यथा कुटुम्बी गृहस्थो स्वामी प्राणान्तकेनाप्यसमस्तकष्टेनपे
णमलेन गृहादीनां पालनादिरूपं भारं वहति तथा मदर्पितात्मनो णादि
भाराणां मत्स्वत्वेनैवात्मस्वत्वेच्छूनां मदर्थमेव सकलं लौकिकं धर्मकर्मा
दिकानां मदेकचित्तानां तेषां महात्मनां लौकिकवैदिकव्यावहा
रिकपारमार्थिकादिकार्यरूपं भारमहमेव वहामि ममैवैते न व्यतिरिक्ता
मत्तोऽन्यं न जानन्ति मद्भक्ताः कथं तान्नरक्षिष्यामीत्येवं तेषु ममत्वाभिमानेन स्व
रक्षितत्वाभिनिवेशेन च भगवता वहाम्युक्तमिति २२
निष्कामावज्ञानन्यदर्शिन मधुसूदनीटीका १०
त्व- अन्योऽभेददृष्टिविषयो न विद्यते येषां तेऽनन्याः सर्वाद्वैतदर्शिनः सर्वभोग
निस्पृहा अहमेव भगवान्वासुदेवः सर्वात्मा न मत्तोऽतिरिक्तं किंचिदस्ती
ति ज्ञानान्मामेव परमं चेतसा चिन्तयन्तो मां नारायणमात्मत्वेन ये जनाः साध
नचतुष्टयसंपन्नाः संन्यासिनः परि सर्वतोऽनवच्छिन्नतया पर्युपासते तेमद
नन्यतया साक्षात्कुर्वन्त्येवेति विशेषः अद्वैतदर्शननिष्ठानां सततं निष्कामा
नां तेषां स्वयमप्रयतमानानां कथं योगक्षेमौ स्यातामित्यत आह तेषां नि
त्याभियुक्तानां निरन्तरमात्मध्यानेन व्याहृतानां देहयात्रामात्रा
र्थमप्यप्रयतमानानां योगक्षेमं च अलब्धस्य लाभो लब्धस्य परिरक्षणं
च शरीरस्थित्यर्थं योगक्षेमं कामयमानानामपि वहामि प्रापयाम्यहं
सर्वेश्वरः प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः उदाराः सर्व एवैते
ज्ञानी त्वात्मैव मे मतमिति ह्युक्तं यद्यपि सर्वेषामपि योगक्षेमं वहति भ
गवान् तथाप्यन्येषां प्रयत्नमुत्पाद्य तद्द्वारा वहति ज्ञानिनां तु तदर्थं प्रय
त्नमनुत्पाद्य वहतीति विशेषः [illegible]

इत्वेनतद्व्याभावात् तेषांचदेहवतांनरभक्तानामपितामेवमजंतकृनिः
केनाति विशेषः स्यात् अतनगतागतेकामकामाजवकत्वादित्यादि नेपि
अभेदे अनन्याश्चिंतयंतो मां तत्कृत्स्नं कृत्स्नं इति कथमुक्तं तत्राह २२

सदानन्दीटीका ११

शयंसकामताऽः स्वं विचार्य योगमत्रुक्तिभिः निष्कामाः संतउत्कृष्टमां
भजंतीति कथ्यते १ भेदद्दर्गोचरो येषां नास्तिते भोगनिस्पृहाः अह
मेवास्मि भगवान्वासुदेवो विश्वात्मकः २ मत्तः किंचित्पृथङ्नास्तीसेवं
प्रपंचमद्रूपं ज्ञात्वात्मत्वेन मां विश्वं चिंतयंतो निरंतरं ३ येजनाः शांति
दांत्यादिसंपन्नाः सर्वतो धिया पश्यंति मदभेदेन कृत्स्नं कृत्स्नात्मरूपवहि
४ अद्वैतत्त्वनिष्ठानां निष्कामानां तदात्मनां तेषामयतमानानां यो
गक्षेमौ कथं स्मयं ५ स्यातामित्यत्र भगवानाह योगविदां गतिः आ
देशं सदाध्यानेध्यान्ताऽनां महात्मनां ६ तेषाम निवृत्तां योगक्षेमं सं
प्रापयाम्यहं सर्वेषां यद्यपीशो यं योगक्षेमं वहत्यपि ७ तथापि यत्न
मुपाद्यत्न द्वारा वहतीश्वरः अयमेषां तान नितां चीशो ज्ञत्माद्यैक्याकृतीश्व
यं ८ वहतीति विशेषोस्ति ज्ञानीत्वात्मेति वाक्यतः ९ । २२

नीलकंठीटीका १२

एवं कर्मिणामावृत्तिं फलं चोक्त्वा भक्तानामपि मज्जनेनैव सर्वसिद्धिरि
त्याह अनन्या इति नास्ति अन्य उपास्यो येषां अहमेव भगवान्वासुदेव इ
ति अभेदेन चिंतयंतः इत्यर्थः येजनाः पर्युपासते परितः साकल्येन का
र्त्स्न्येनाद्वैतदृष्ट्येत्यर्थः उपासते तेषां नित्याभियुक्तानां सततात्मयोगि
नां योगः अप्राप्तस्य प्राप्तदेर्योगभूमिकाया वा प्रापणं क्षेमः तस्यैव प्रा
प्तस्य संरक्षणं ते तत्द्वयं अहमेव वहामि निर्वहामि तेरन्नाद्यर्थं वा योग
क्षेमार्थं वा धर्मभूमिलाभार्थं वा चिंता न कर्तव्येत्यर्थः अनन्यचेतसां तेषा
मदभिन्नात्मत्वं संसेत्स्यतीत्यर्थः तथा चोक्तं ज्ञानी त्वात्मैव मे मत
मिति २२

ऐक्यात्मज्ञानेकर्मणः फलं आनंदीटीका १२ लक्षयति ॥

न विद्यते अन्य मद्व्यतिरिक्तं वस्त्वन्तरं येषां ते चिंतयंतः मद्रूपतया स

श्री
गी टी
न

र्वमिदंजगद्विश्वरूपंतःमांयेजनाःपर्युपासतेतेषांनित्यपरमेश्वरेनन्यानि
रूपेफलेचाभियुक्तानांसततोद्योगवतांयोगक्षेमं अलब्धायाःब्रह्मप्रा
प्तेर्लाभोयोगःक्षेमंब्रह्मप्राप्तेःपरिलोपलक्षणोरक्षणमितियोगश्च
शंकानिवारणार्थं [illegible]
[illegible] २२

एतदन्तेनग्रंथेनज्ञाने रामकंठीटीका १४ कथयित्वाविज्ञानकथनमाह ॥
येजनाःपरांदैवींप्रकृतिमाश्रितादृश्यत्रअविकरणात्मकेभ्योश्रुति
य॰ शब्दयादिदोषवज्ञोविरक्ताःसंतोनित्यनिर्मलनिरतिशयानंतानंदस्व
धासागरंमांपरमकारणंब्रह्मतत्वंपर्युपासते यथाप्रतिपादितज्ञान
निष्ठतयास्वकर्माण्यजहंतःसमंतात्सेवन्ते कीदृशाःसंतोनन्याअवि
द्यमानमन्यन्मत्तइतिकिंवस्तुयेषांतेतथाविधाःमन्मयमिदमेवसर्व
मित्यनुभवंतइत्यर्थः तेषांतादृशानांनित्याभियुक्तानांयथोक्तज्ञानेक
तानतयासततोद्युक्तानांसर्वावस्थासुयथोक्तमत्स्वरूपस्मरणैकपराय
णानामित्यर्थः अहंपरमेश्वरोयोगक्षेमंवहामियोगंप्रागनासादितेन
मत्स्वरूपसंवेदनात्मकेनफलेनसंबन्धंक्षेमंमासादितस्यपुनरपरिलोप
लक्षणंधारयामि येनित्यंमत्परास्तेषांऊनोयोगक्षेमस्तीतिरित्यर्थः
एवंयथोक्तोपायनिरपायनिवेशितान्तःकरणानयामत्स्वरूपानुभवरू
पांपरांकाष्ठामधिरूढाभक्तिरेवविज्ञानमितितात्पर्यं [illegible]
[illegible] २२

लाक्षिकी [illegible]टीका १५

+ येजनाजननधर्माणोब्रह्मादिकीटपर्यन्ताजन्तवोनन्यानविद्यतेमद्व्य
तिरिक्तमन्यत्काम्यंयेषांतेतादृशाःसन्तःमामीश्वरंसगुणंनिर्गुणंवा
चिन्तयन्तोध्यायन्तःपर्युपासतेभक्त्यासेवन्ते तेषांतादृशानांनित्या
भियुक्तानांनित्यंसर्वदाभियुक्तानामात्मनिसमाहितानांसतांयोगक्षे
मंतैरप्रार्थितमपि अप्राप्तस्यप्रापणंयोगं प्राप्तस्यपरिरक्षणंक्षेमंच
अर्थस्य

+ ननुसकामानामैहिकामुष्मिकफलप्राप्तिरुक्ता निष्कामानांतुत्वद्भक्तानांमोक्षरूपंफलंप्रती
क्षमाणानांकथंचमोक्षप्राप्त्यवधिइहवापरत्रवाशरीरयात्रानिर्वाहःस्यादित्यतआह ॥+

हामिप्रापयामि [illegible]

२२

पैचोलीटीका

येपुनर्निष्कामाःसम्यग्दर्शिनःतेमत्प्रसादात्कृतार्थाभवंती त्याह अनन्याइति अनन्याअपृथक्भूताःपरंदेवंनारायणमा त्मत्वेनगताःमांचिंतयंतःपर्युपासतेअहंतेषांपरमार्थदर्शिनां सततामियोगिनांयोगक्षेमंवहाम्यहंयोगक्षेमंकरोमियोगः अप्राप्तस्यप्रापणंक्षेमस्तद्रक्षणं २२

सणवीरमिश्रबोधिनी॥

एवंकामकामानांसंसृतिमुक्त्वाधुनाभक्तिलक्षणंविज्ञानंलब्ध्वा परमेश्वराराधनार्थमेवस्वधर्ममनुतिष्ठतांसंसारमो गमोक्षोभयसिद्धिंप्रतिपादयितुमाह अनन्याइति नविद्यतेन्य त्सर्वंवस्तुशरणंयेषांतेतादृशाः अतोमामेवपरमेश्वरं चिंतयंतःसिद्धासिद्धौविषयेस्वतंत्रंध्यायंतःसंतोयेजनाःमांस र्वकारणंसर्वेश्वरंचपर्युपासते परितःसर्वास्ववस्थासुस्ववर्णा श्रमोचितकर्मानुष्ठानेनोपासतेभजंति तेषांनित्याभियुक्ता नांसर्वदास्वकर्मैवानुतिष्ठतांयोगक्षेमंअलब्धलाभंलब्धप रिरक्षणंवतदीश्वरव्यतिरेकेपिस्वयमेवाहंवहामिप्रापयामि एतेनवक्ष्यमाणस्यजीवितफलंविषयैर्विनाकिमित्यादिनाराजा नमर्थयित्वात्याभियुक्तैर्विषयभोगत्यागादित्येनयच्छून्यत्वमिवजी वितस्यप्रतिपादितं तदनुसारेणकामानांपरित्यागोमाचरितेस्वध र्मेभोगाभावेनिष्ठापातिरितिकेषांविदाशंकानिरस्ता नकेवलंफलमपिस्वयंतेभोगाश्चाभिलषंतितथापिमदर्थमेवकर्मानुति ष्ठतांतेषांतानहंप्रापयामीतिभावः २२॥

मधुभाष्य

२२॥

93

भाषा अनुवाद

और हमारे भक्त जन मेरी कृपा ही से कृतार्थ होते यह कहते हैं कि जिनके हमै छोड़ि और कोई कामना नहीं है तेई अनन्य भक्त हमारी सेवा करतेहैं नित्याभि युक्त सर्वदा एक मेरे सेहै मन जिनका उनका योगक्षेम अर्थात् योग जो धन आदि लाभ और क्षेम जो प्राप्त वस्तुका रक्षण सो मै करताहूं अथवा निर्वाण जो मुक्ति यद्यपि वे नहीं चाहते पर मै उनको अपनी इच्छा से देता हौं २२ ।

दोहा

जोउ अनन्यचित चिंतजन मोकों भजहे कोय तिनहूं नित
मो युक्तको योग क्षेम देउं सोय २२॥

94

येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः तेऽपि मा
मेव कौन्तेय यजन्त्यविधिपूर्वकं २३

शाङ्करभाष्यटीका १

नन्वन्या अपि देवतास्त्वमेव चेत्तद्भक्ताश्च त्वामेव भजन्ते सत्यमेवं
येपीति ये अन्यदेवताभक्ता अन्यासु देवतासु भक्ता अन्यदेवताभक्ताः
सन्तो यजन्ते पूजयन्ति श्रद्धयास्तिक्यबुद्ध्या अन्विता अनुगतास्ते
पि मामेव कौन्तेय यजन्त्यविधिपूर्वकमविधिरज्ञानं तत्पूर्वकं
अज्ञानपूर्वकं यजन्त इत्यर्थः २३

आनन्दगिरिकृतटीका २

तत्तद्देवतात्मना परस्यैवात्मनः स्थित्यभ्युपगमाद्देवतान्तरपराणाम
पि भगवच्छरणत्वाविशेषात्तदेकनिष्ठत्वमकिञ्चित्करमिति मन्वानः
शङ्कते नन्विति उक्तमङ्गीकृत्य परिहरति सत्यमित्यादिना देवता
न्तरयाजिनां भगवद्याजिभ्यो विशेषमाह अविधीति तद्व्याकरोति
अविधिरिति २३

स्वामिकृतटीका ३

ननु च त्वद्व्यतिरेकेण वस्तुतो देवतान्तरस्याभावादिंद्रादिसेविनोपि त्व
द्भक्ता एवेति कथं ते गतागतं लभेरन् तत्राह येप्यन्येति श्रद्धयोपेता भ
क्ताः संतोपि जना यत्तेन अन्यदेवता इंद्रादिरूपा यजंते तेपि मामेव यजं
तीति सत्यं किंत्वविधिपूर्वकं मोक्षप्रापकं विधिं विना यजंति अतस्ते
पुनरावर्तंते २३

पैशाचभाष्यटीका ४

येपीति ये पुरुषा अन्यदेवताभक्ता अन्यस्यां देवतायां भक्त्या यजंते पू
जंति ते पि मां परमेश्वरमेव पूजयंति अविधिपूर्वकमज्ञानपूर्वकमिति २३

रामानुजभाष्यटीका ५

येप्यन्येति ये त्विंद्रादिदेवताभक्ताः केवलं तन्निष्ठाः श्रद्धयान्विताः इंद्रा
दीन् यजंते ते पि उक्तेन न्यायेन सर्वस्य मच्छरीरतया मदात्मकत्वेनेंद्रा
दिशब्दानां च मद्वाचित्वात् वस्तुतो मामेव यजंते अपि त्वविधिपूर्वकं

श्री
गी टी
न

यजंते इंद्रादिदेवताराधनवचनं हि कर्मस्वाराध्यतयावस्थितानामिंद्रा
दीनां विभूत्यात्मभूतस्य परमपुरुषस्य तात्पर्याराध्यत्वं विदधाति च
तर्हि तारोपय संपदं गच्छंति दैवैः च तर्हि तारग्निहोत्रदर्शपूर्णमासादी
निकर्माणि कुर्वाणाः परमात्मतयावस्थितेन शरीरश्चैतैरिंद्रादिदे
वैः संपदं गच्छंति इंद्रादिदेवानामाराधनानेतानि कर्माणि महिषयाणी
तितावामसंपदं गच्छंतीत्यर्थः [illegible]
[illegible]
[illegible]

अभिनवगुप्तकृतटीका ६ येपि च नामयेयांतेरेरूपासते नेपि
मामेवोपासतेन हि ब्रह्मव्यतिरेकि किंचिदुपास्यमस्ति किं त्वविधेनेति विशेषः अविधिरन्यो विधिर्नानाप्रकारैर्विधिभिरह
मेवपरं ब्रह्मसत्वात्म [illegible] भावोयाज्यइति न च यथान्यदेशीनातरहूबलमुपार्जितमहापातकमलीमसे
ध्यातमविधिनादुष्टविधिनेति २३॥

परमार्थप्रपाटीका ७

ननु सर्वभूतकं मामिष्ट्वा स्वर्गतिं प्रार्थयंत इत्युक्तं तर्हि वा त इत्यनादप्यिगत
स्वर्गाः पुनः कथं स्वर्गाप्तिर्वेत्याशंक्याह येपीति द्वाभ्यां येन्यदेव
ताभक्ता इंद्रादिदेवतोपासका अपि श्रद्धयान्विताः संतो यजंते तेपि त
दंतर्यामित्वेनावस्थितं मामेव यजंति परं तु अविधिपूर्वकं यजंति मोक्ष
प्रापकमद्देवतोपासनं विधिस्तदितरमविधिस्तत्पूर्वकं यजंति २३

वनमालीटीका ८

ननु सदेवतास्यांतर्यामीत्वमेव चेदाराध्यत्वं हि त्वद्भक्तान्यभक्तयोः
को विशेषस्तत्राह य इति यथा मद्भक्ता मामेव यजंति तथा येन्यदेव
तानामिंद्रादीनां भक्ता यजंते ज्योतिष्टोमादिभिः श्रद्धयास्तिक्यबुद्ध्या
न्विताः तेपि मद्भक्ता इव तत्तद्देवतायां स्थितं मामेव यजंति परं त्वविधि
पूर्वकं तदंतःस्थमामज्ञात्वा यजंतीत्यर्थः २३

कृष्णमवेजयन्तीटीका ९

यदीद्रादिदेवा अपि त्वदात्मकास्त्वदष्टयकास्थितिप्रवृत्तिका अतस्तदु
पास्यत्वेनामाराधनमपि त्वैवाराधनं स्यात्तर्हीन्द्रादिभक्ता गतागतं क
थं लभंते कथं वा तद्भक्ता अपुनरावृत्तिं यांतीति चेत्तत्राह येप्यन्यदेव
ताभक्ता इति येपि येन अन्यदेवताभक्ताः मद्भिन्नेंद्रादिदेवोपासकाः
इंद्रादय एव सर्वाभीष्टप्रदाः अतस्तैव सर्वैराराध्याः सर्वोत्कृष्टानाम

+ नन्वान्यापि देवतात्वमेव तद्व्यतिरिक्तस्य वस्तुनस्तस्याभावात् तथा च देवतांतरभक्ता अपि त्वामेव भजंते त
इति न कोपि विशेषः स्यात् तेन गतागतं कामकामा वत्तहज्ञादित्यादिभक्ता लभंते अनन्याश्चिंतयंतो मां
तत्कृतकृत्या इति कथमुक्तं तत्राह ॥+

इति श्रुतेष्वेव भक्तिमंतः श्रद्धया मदभीष्टमेते प्रदास्यन्तीति दृढतर
विश्वासेनान्विताः युक्ताः संतो यजन्ते यज्ञादिभिरिन्द्रादीनेव पूजयन्ति
हे कौन्तेय तेपि तत्त्वमामेव यजंतीत्यत्र न संदेहः परन्त्वविधिपूर्वकं इं
द्रादिनामानमिंद्राद्याकारेणावस्थितमिन्द्राद्यन्तर्यामिणमिन्द्रादीश्वरं श्री
कृष्णं वयं यजाम इति विधिपूर्वकं न किंत्वमतः पृथक्स्वरूपत्वेन
तेनात्र पूजयंतीत्यर्थः संबोधनेनेदं पिता कुन्ती माताऽर्जुनः पुत्रश्चैवं
पितृत्वमातृत्वपुत्रत्वादिनामरूपविभागेनावस्थितं तत्त्वमामानंततत्त्वद
र्शामिणं न तत्त्वितरं न त्वमियं ताराং त्वत्सारथिं त्वमात्मानं कौन्तेयं मामेवैवं
नानामतस्यपत्रः सम्यग्यजनमेव त्वं कुर्वितत्त्ववित् २३

मधुसूदनीटीका ९

+ यथा मद्भक्ता मामेव यजंति तथा येप्यन्यदेवतानां वस्वादीनां भक्ता
यजंते ज्योतिष्टोमादिभिः श्रद्धयास्तिक्यबुद्ध्यान्विताः तेपि मद्भक्ता
एव हे कौंतेय तत्तद्देवतारूपेणास्थितं मामेव यजंति पूजयंति अविधि
पूर्वकं अविधिरज्ञानं तत्पूर्वकं सर्वात्मत्वेन मामज्ञात्वा मद्भिन्नत्वेन
वस्वादीन् कल्पयित्वा यजंतीत्यर्थः
२३

सदानन्दीटीका ११

नन्वन्येपि त्वमेवेत्यतो देवास्ततः पृथक् इति तद्भक्ता अपि सेवंते त्वामेव
सत्यकामिदा १ येनते संस्तुतिं यान्ति बद्धका नेति तद्वद अन्यदेवा
यजंते मेकलार्थभेददर्शिनः २ आस्तिकास्तेपि मामेव यजंत्यज्ञान
पूर्वकं सर्वात्मत्वेन मामीशमज्ञात्वा भेदवत्तया ३ कल्पयित्वा च वस्वा
दीन्यजंतीत्याशयो हरेः ४ ।२३

नीलकंठीटीका ९

अविधिपूर्वकं विधिरभेदबुद्धिस्तद्राहित्यादविधिपूर्वकत्वं तदीय
भजनस्य २३

नन्वविष्णुतोऽपृथक्त्वलक्षणा मेघामिवयोगात्सेमाव ?? आनंदीटीका १२ वेतरणाश्चिंतयतामपि विन्तयंतां वानन्यत्वसमानमेवेति कथं त्वतवेत्याशंक्याह ॥
विधिरियथार्थं यजनीययागोपकरणानां ब्रह्मार्पणबुद्ध्यैकात्म्यज्ञानह

96

र्वकर्मानुष्ठानं तानं विना केवलं कर्म कुर्वतां सत्तामत्यन्तोहि अविधिपू
र्वकयजनात् देवतेषामन्तवत्फलमित्यर्थः २३

ननु विष्णुतोप्यन्यदेवत्वमेवैकं तत्त्वमिति मन्वानाये मामुपासते तेषां योगतेमं रामकंठीटीका १४ देवतान्तरयाजिनोप्यन्यापत्यन्तकथमुक्तं वहामी त्यत्राह ॥

सत्यं येपि जना अन्यदेवताभक्ताः परस्परभिन्नस्वरूपांस्तांस्तानिन्द्रादीन्ब्रह्मादीन्प्रभु
त्वादेवविशेषान्भक्तास्तेपि परमार्थतो मद्व्यतिरिक्तद्वितीयवस्त्वभावान्मा
मेव श्रद्धया तत्तत्फलसंभावनया यजंते श्रजयंति किंत्वविधिपूर्वकं म
यजनपर्वविधविधिरहितमप्यवस्थितेच यथोक्तज्ञाननिष्ठतया सर्वैश्वर्य
श्रयेषु देवताविशेषेषु तास्तता स्वयागक्रियासु यष्टुरिव स्वात्मन्यद्वयवि
न्मात्रलक्षणमन्त्वरूपानुभवः सचतेषां तानन्यथाक्रियामात्रशरणा
नां विधिर्नसंभवत्येव तस्मादविधिपूर्वकं मां यजंते इत्युक्तं एतदेव
प्रकटयितुमाह २३

+ ननु स्वर्गाद्यभीप्सया देवताविशेषं यजंतो हन्तु न तत्त्वामीश्वरं सगुणं निर्गुणं वा तत्कथमुक्तं मे वियामामित्यत्राह +

लाक्षिकी [illegible]टीका १५

अपिगर्हायां येजनाः अन्यदेवतानां मद्भिन्नलक्षणबुद्धदेवतानां भक्ताः सं
तः तथा श्रद्धयोपेताः सन्तोपि यजन्ते स्वर्गादिप्राप्तिहेतवे यागमनुतिष्ठं
ति न केवलं मद्भक्ता एव मां यजन्ते यावन्तोपीन्द्राद्युपासकामामेव तत्तदे
वतान्तर्यामिणमीश्वरमेव यजन्ति किन्त्वविधिपूर्वकम् यथा देहाद्य
परिच्छेदेन वर्तमानस्य मम यागविधिर्नतथा तेषां देहपरिच्छिन्नदे
वतानिष्ठदृष्टित्वात् अतो मद्भक्तेभ्यः वैलक्षण्यं तदेवाह २३

पंचोलीटीका

ननु अन्यान्यपि देवतास्त्वमेव त्वद्व्यतिरेकेण वस्त्वंतराभावात् अतः
स्तेषां भक्तास्त्वामेव भजंत इति कथं गतागतं लभंत इत्याशंक्य भगव
द्भजनेपि अत्तानगतं तेषां गतागतमित्याह येप्यन्येति हे कौंतेय येप्यं
न्यदेवताः भक्ता अन्यास्तु देवतास्तु भक्तास्ते अन्यदेवताभक्ताः श्रद्धया
आस्तिक्यबुद्ध्या युक्ता यजंते अविधिपूर्वकं मामेव यजंते अहमेव स
र्वदेवता इति न जानंतीति २३

रणवीरसमिद्बोधिनी॥

ननु यदि भवच्छक्तिविजृंभणमेवेंद्रादयस्तर्हि तदाराधनेना
पि भवदाराधनमेव संपन्नमिति कथं तदाराधकानां संसृतिरु
पपन्नेत्याशंक्याह येप्यन्येति द्वाभ्यां येपि कर्मयोगिनोन्यदेव
ताभक्ता अन्यास्तु मद्व्यतिरिक्तास्विंद्रादिकासु देवतासु भक्ताः आ
राध्यत्वेन ज्ञाने भक्तिः तद्युक्ताः श्रद्धया फलावश्यंभावनिश्चय
लक्षणया वान्विताः संतो यजंते ते तास्ता इंद्रादि देवता आराधयंति
यद्वा येपि भक्ता भक्तिविशिष्टाः कर्मयोगिनः अन्यदेवताः कर्म
भूता यजंते इति संबंधः तेपि मामेव यजंति मद्विभूतिविलासत्वा
त्सर्वस्य तर्हि को विरोध इत्यत आह अविधिपूर्वकमिति यथा स्व
कर्मानुष्ठानेन मद्यजनेव विधिरुक्तो वक्ष्यते च तद्धर्मे यद्वा अवि
धिरज्ञानं तत्पूर्वकं ममजगत्कारणरूपमज्ञात्वेति यावत् २३

मधुभाष्य

येपीति कारणमाहाविधिपूर्वकमिति २३॥

96/2

भाषा अनुवाद

जो कहो कि विचारसे तो सर्व देवरूप तमको छोडि और देवता कौनहै सब रूप जो तमारे हैं तो इन्द्रादिके पूजक लोगभी तमारे ही उपासकहैं फेरिका कारण है जो वे विचारे उपर नीचे गमना गमन किया करतेहैं इस पर कहतेहैं किहो श्रद्धायुक्त जो इन्द्रादि देवता की आराधना करतेहैं सो सत्य हमारी ही सेवा है परन्तु वे अविधि से अर्थात् मोक्ष की देनहार विधि कोछोडिकर पूजन करते हैं इसीसे पुनः पुनः संसार पावते हैं २३ ।

दोहा

और देवके भक्त जो पूजत भावहि युक्त सोभीमोकों कौंतिसु
त पूजयथा विधि उक्त २३॥

97

अहंहि सर्वयज्ञानां भोक्ताचप्रभुरेवच नतुमामभि
जानन्ति तत्वेनातश्च्यवन्तिते २४

शाङ्करभाष्यटीका १

कस्मात्तेःविधिपूर्वकं यजन्ते इत्युच्यते यस्मात् अहमिति अहंहि
सर्वयज्ञानां श्रौतानां स्मार्तानाञ्च सर्वेषां यज्ञानां देवात्मत्वेन
भोक्ता च प्रभुरेवच मत्स्वामिकोहि यज्ञोऽधियज्ञोऽहमेवात्रेतिचो
क्तं तथा नतु माममिजानन्ति तत्वेन यथावदतश्चाविधिपूर्वक
मिष्ट्वा यागफलात् च्यवन्तिते २४

आनन्दगिरिकृतटीका २

[illegible]
[illegible]
[illegible] नत्ववस्वादिमेंद्रादिज्ञानपूर्वकमेव तद्भक्तास्तद्याजि
नो भवन्तीति कथमविधिपूर्वकं तेषां यजनमिति शङ्कते क
स्मादिति देवतान्तरयाजिनां यजनमविधिपूर्वकमित्यत्र हेत्वर्थ
त्वेन श्लोकद्वयमुत्थापयति उच्यतइति सर्वेषां द्विविधानां यज्ञा
नां वस्वादिदेवतात्वेनाहमेव भोक्ता स्वेनान्तर्यामिरूपेण प्रभुश्चा
हमेवेति प्रसिद्धमेतदिति हिशब्दः प्रभुरेव चेत्युक्तं विवृणोति
मत्स्वामिकोहीति तत्रपूर्वोध्यायगतवाक्यं प्रमाणयति अधिय
ज्ञोहमिति तथापि देवतान्तरयाजिनां यजनमविधिपूर्वकमि
ति कुतः सिद्धंतत्राह तथा इति ममैव यज्ञेषु भोक्तृत्वे प्रभुत्वेच
सतीत्यर्थावत् तयोर्भोक्तृप्रभ्वोर्भावस्तत्वं तेन भोक्तृत्वेन प्रभुत्वेन
चमां यथावद्यतो नजानन्ति अतो भोक्तृत्वादिना ममाज्ञानात्म
यि अनर्पितकर्म्माणश्चावर्तन्ते कर्म्मफलादित्याह अतश्चेति २४

स्वामिकृतटीका ३

एतदेवविवृणोति सर्वेषांयज्ञानांतत्तद्देवतारूपेणअहमेवभोक्ता
प्रभुश्चस्वामीफलदाताचाहमेवेत्यर्थः एवंभूतंमांतेनतत्वेनयथाव

५ येतुसर्वदेवतासुमामेवान्तर्यामिनं
पश्यन्तो यजन्ति ते नावर्तन्ते

नाभिजानंति अतश्च्यवंति प्रच्यवंते पुनरावर्तंति ॥ २४

पैशाचभाष्यटीका ४

अहं वासुदेवः सर्वेषां यज्ञानां भोक्ता च प्रभुः स्वाम्येव च न तु मामभिजा
नंति तत्त्वेन परमार्थतः अतः कारणात् च्यवंति फलात् प्रच्यवंति ते यज्विनः ४

रामानुजभाष्यटीका ५

अथैते विधाइन्द्रादिशरीर
स्यपरमपुरुषस्याराधनो
नैतानिश्चाराध्यः स एवेति
न जानंति ते च परिमित
फलभागिनश्च्यवनस्व
भावाश्च भवंति तदाह ॥

अहं हीति प्रभुः तत्र तत्र फलप्रदाता चाहमेवेत्यर्थः अहो महदिदं वै
चित्र्यं यदेकस्मिन्नेव कर्मणि वर्तमानाः संकल्पमात्रभेदेन केचिदत्यल्प
फलभागिनश्च्यवनस्वभावाश्च भवंति केचनानवधिकातिशयानंद
परमपुरुषस्वरूपप्राप्तिफलभागिनोऽपुनरावर्तिनश्च भवंतीति तदाह २४

अभिनवगुप्तकृतटीका ९

सत्यार्थं २४

परमार्थप्रपाटीटीका ७

एतदेव विविच्याह अहमिति हि यस्मात्कारणात् अहमेव सर्वयज्ञानां
भोक्ता प्रभुः फलदाता च एवं सति मां तत्त्वेन याथातथ्येन माभिजानंति
अतस्ते च्यवंति पुनर्मर्त्यलोकं प्रविशंति अयेतदुक्तं भवति देवर्षिपितृ
एर्वकाल्पावनश्वरनामरूपोपेतादेहविशेषाणामुपाधयस्तस्मिल्लोकेव
संति तत्र तत्र सर्वेषामंतर्याम्यहमेवास्मि एवंविधं मामज्ञात्वा एषूक्त क्र५
तत्तदुपाध्युद्देशेन यत्कृतं यजनं तेनाहमेव संतर्पितो भवामि ततोम
त्संतर्पणोद्देशेन तेपि संतर्पिता भवेयुः तथा च मामद्वयानंदमखंडैक
रसमुद्दिश्य यदुपासनं स एव विधिस्तया शून्यानां यदुपास्योपासनमेवा
विधिस्तत्सर्वं कंभजनं नश्वरफलं स्यात् अत्र श्रुतिरपि शृणपयी अथ
योन्यां देवतामुपास्तेऽन्योसावन्योहमस्मीति न स वेद यथा पशुरेवमिति
स्पष्टार्थं तथा अयो अयं वा आत्मा सर्वेषां भूतानां लोकः स यज्जुहोति
यद्यजते तेन देवानां लोकोऽथ यदनुब्रूते तेन ऋषीणामथ यत्प्रजामि
च्छते यत्पितृभ्यो निपृणाति तेन पितॄणामथ यन्मनुष्यान्वासयते यदे न्या५
न५ भ्योऽशनं ददाति तेन मनुष्याणामथ यत्पशुभ्यस्तृणोदकं विंदति तेन
पशूनां यदस्य गृहेषु श्वापदा वयांस्यापिपीलिकाभ्य उपजीवंति तेन ते

इत्यभिनवगुप्तस्तुतिः

एवं हि सति मामेव यजंते सर्वयज्ञानां चाहमेव भोक्तेति दृश्यमान
मेतदसमंजसीभवेदित्यलं कल्मषकलिलैः साकं संलापेन अ
स्मद्गुरवस्तु निरूपयंति अन्यासां स्वात्मव्यतिरिक्ताभेदवादेन येन ब्र
ह्मस्वभावहीनैव काचिद्देवतेति निगृहीत्वा तामेव यजंते तेपि व
स्तुतो मामेव स्वात्मरूपं यजंते किंत्वविधिना ऽद्वैतेन विधिना
भेदग्रहणरूपेणेत्येतदाह न तु मां स्वात्मानं तत्त्वेन देवतारू
पतया भोक्तृत्वेन जानंतीति अतः च्यवंते मद्रूपात् किं देवव्रतास्ते
न देवान्यांतीत्यादि एतदेव च्यवनमिति यावत् ये तु मत्स्व
रूपमभेदेन विदुस्ते देवभूतपितृयागादिनापि मामेव यजं
ते नैवमयाजिनो मामेव गच्छंतीत्युपसंहरिष्यति ननु द्र
व्यत्यागार्थमुद्दिष्टा देवतेत्युच्यते तत्कथमनुद्दिश्य स्वात्म
तत्त्वस्य याज्यत्वं आदित्यः प्रयाणीयस्य चरुरिति विधिशेषभूत
देवतोद्देशात्मकविध्यंतरप्रभावितोऽस्यासावुद्देशः नच स्वा
त्मविषयो विधिरस्तीत्यभिप्रायेणाह अविधिपूर्वकं मामि
ति मामिति स्वात्मव्यतिरिक्तायां देवतायामस्वपेद्यो विधि
पैरिभाषिकार्पणरूपत्वात् स्वात्मा तु परमेश्वरो न विधिपूर्व
को विधिपरिप्रापितत्वाभावात् न हि तदनुद्देशेन किंचित्प्र
वर्तते तेन विधिपरिप्राप्यतेंद्रादिदेवतोद्देशेषु सर्वेषु स्वात्मा
विश्वावभासनस्वभावस्तदुद्देश्यदेवतावभासमितिस्थानीय
नैयवाहमहमिकया सततावभासमानः स्वकसूत्रकल्पः
सन्नतोद्दिष्ट इति युक्तसिद्धमेतन्मामेव यजंत्यविधिपूर्वकत्वा
त् अतएव तमन्यापि फलस्यतात्यंतिकत्वभिप्रायत्वं नास्ति
अपितु परिमितदक्षिणस्थानीयेंद्रपदादिमात्रप्राप्तिरेवया

99

जकवच्चरितार्थत्वमेषामितिप्रथयितुंपरमेपदं यदुक्तं
मयैव वेदान्वेदनवेदशांभवपदंहृयेतनिर्वेदवान्मगीर्थी
यजमानतांप्रतिजहुः जातोयजन्याजकः सर्वःकर्मद.
सप्रवाहप्रसराः सवित्तवंत्योविला स्वमानंदमहांबु
धिंविदयतेनप्राप्यहर्षोस्थितिमिमिति २४ ॥

कं लोको यथा ह वै स्वाय लोकायारिष्टिमिच्छेदेवं हैवंविदे सर्वाणि भूता
न्यरिष्टिमिच्छंति तद्वा एतद्विदितं मीमांसितमिति भाष्यं अथो अनंतरं
वाऽइति प्रकारांतरेणोच्यते तत्किं अयमात्मा सर्वेषां भूतानां लोकः संत
र्पणस्थानं तथा च सोऽधिकारी आविष्ट यज्जुहोति मंत्रपूर्वकं हविरग्नौ
क्षिपति तथा यद्यजते स्वात्तेऽपि यत्नकर्तायद्दाश्रौ तस्मान्न प्रकारेण
तेन देवानामिंद्रसूर्यादीनां लोक आत्मा संतर्पितो भवति अथ यदनु
ब्रूते स्वाध्यायमधीते तेन ऋषीणां तथा यत्पितृणां ऋणपरिहारिणीं
प्रजामिच्छते रक्षति अथवा यत्पितृभ्यो निपृणाति श्राद्धे ददाति तेन पि
तॄणां तथा मनुष्यान् वासयते आवासं कृत्वा ददाति तथा यदेभ्यो मनु
ष्येभ्योऽशनमन्नं ददाति तेन मनुष्याणां लोकः अथ पशुभ्यो महिषीव
लीवर्दादिभ्यस्तृणोदकं विंदति तेन तेषां तथा यदस्य गृहेषु श्वापदः
श्वमार्जारादयः वयांसि पक्षिणः काककलविंकादयः पिपीलिकाभ्य
र्यादीकृत्य कीटविशेषा उपजीवंति तेन तेषां लोक आत्मैव संतर्पितः
स्यात् यथा वै इति निश्चयेन स्वाय लोकाय परमात्मने अरिष्टिं कुश
लं वांछति एवमेव एवंविदे ज्ञानतः संतर्पकाय उपकर्षाय सर्वाणि भूता
नि र्पर्छिः तृपितानि अरिष्टिं कुशलं वांछंति एवमेतदेव विदितं ज्ञानमि
ति वदंति तथा मीमांसितं विचारितं एतदस्मदत्तानमविचारितं चे
त्यर्थः तदुक्तं टिप्पणिकायां स्वर्षिपितृमानवप्रभृति दत्तमेवं वि
दानदाङ्ग्रमृतप्रदं यद्भवत्तदात्मार्पणं अद्यापि पदलव्ययेऽनभु
जामनेवं विदामनागतपरिश्रमपदमस्य संतर्पणात् तथा एको
नेकः स्वरूपैर्नर्दति नटवरो दर्शयन् हावभावांस्तत्तद्रूपानुरूपान्दृ
ष्टगामिल्लवितेश्वसामाजिकेषु कस्मैचित्किंचिदर्थं वितरति शुदि
तस्तेन संतर्पितः स्यादेकः सर्वांतरात्मार्पणमखिलतृप्यार्पितं स्या
मथैव। अथ वेदपि हिरण्यगर्भेति भाष्यं हिरण्यगर्भ इति दशार्थ
स्तुक्तेषु भामिति सर्वात्तुक्रमः तत्र प्रथमा हिरण्यगर्भ इति हिरण्म
यांडो गर्भवत्कस्यादेर्वर्तते सोसौ स्वात्मा हिरण्यगर्भः अग्रे प्रप
चोत्पत्तेः प्राक् समवर्तत मायाध्यक्षात्किंस्विततोः परमात्मनः सका

श्री
गी टी
न

100

शात्‌ न समजायत यथा पितरमात्मैव हिरण्यगर्भस्तथा पितृरूपाधिभू
तानां वियदादीनां सूक्ष्मभूतानां ब्रह्माण उत्पन्ने स्वतदुपहितो ऽप्युत्पन्न इत्युच्य
ते स च जातो जगन्मात्रप्रवर्तकः ....

अद्वितीयः सन् भूतस्य विकारजातस्य ब्रह्माण्डदेः सर्वस्य जगतः पतिरी
श्वर आसीत्‌ किं च पृथिवीं द्यां दिवं च दाधार धारयति एवं सति तस्मा
त्‌ कमपराय कस्मै देवाय हविषा कृत्वा विधेम परिचरेम सर्वं ब्रह्मार्पण
मेव परं तं स कस्मैनाम यावतीत्यर्थः २४

वनमालीटीका ८

अविधिपूर्वकत्वं विहाय तत्फलप्रवृत्तिं तेषामाह अहमिति अहं स
र्वेश्वरः सर्वान्तर्यामी तत्तद्देवतान्तरस्थः सर्वयज्ञानां श्रौतस्मार्तानां भोक्ता
न्तर्यामिरूपेणाधिपतित्वात्‌ प्रभुश्च फलदाता कर्मकारयिता च देव
तान्तरयाजिनस्तु भोक्तृत्वेन प्रभुत्वेन न जानन्ति अतस्तथा मत्स्वरूपा
परिज्ञानान्महत्तायासेनेष्टापि मय्यनर्पितकर्माणस्तत्तद्देवलोकं स्व
मादिमार्गेणागत्वा तद्भोगान्ते च्यवन्ति प्रच्यवन्ते तद्भोगजनककर्मक्षया
त्ततो देहादि विशिष्टाः पुनर्देहग्रहणाय मनुष्यलोकं प्रत्यावर्तन्ते ये
तु तत्तद्देवतास्वभगवन्तमन्तर्यामिणं जानन्तस्तस्मीनयेयजन्ते भगव
दर्पितकर्माणस्ते समापाप्यरोहं प्राप्यार्चिरादिमार्गेण प्रयाताः सं
तो ब्रह्मलोकं प्राप्य स्वयं क्रमेणावाप्नुवन्तीति विवेकः २४

कृष्णवैजयन्तीटीका ९

नन्वविधिपूर्वकत्वमेव किमिति अपेक्षायां तद्देवविहाय तेषां फलम्

स्तुतिमाह अहं हीति हीति निश्चयेनाहं सर्वेश्वरः सर्वयज्ञानां श्रौता
नां स्मार्तानां च तत्तदिन्द्रादिदेवतारूपेण भोक्ता स्वेनांतर्यामिरूपेण
धियज्ञत्वात् च पुनः प्रभुरेव तत्तद्वांछितार्थफलप्रदाता स्वामी चाहमे
वेत्येवंस्वरूपकं मां तत्त्वेन याथात्म्येन न निश्चयेन नाभिजानंति ये मामित
रदेवताः स्वरूपगुणशास्त्रादिना न विदन्ति अतो हेतोस्तेऽन्यदेवभक्ताश्च्यु
वंति अधः पतंति संसारं प्राप्नुवंतीत्यर्थः २४

अविधिपूर्वकं विहृत्यैवं फल **मधुसूदनीटीका** १० प्रच्युतिममीषामाह ॥

अहं भगवान्वासुदेव एव सर्वेषां यज्ञानां श्रौतानां स्मार्तानां च तत्तद्दे
वतारूपेण भोक्ता च स्वेनांतर्यामिरूपेण अधियज्ञत्वात् प्रभुश्च फल
दाता चेति हि प्रसिद्धमेतत् देवतांतरयाजिनस्तु मामीदृशं तत्त्वेन भो
क्तृत्वेन प्रभुत्वेन च भगवान्वासुदेव एव वस्वादिरूपेण यज्ञानां भोक्ता
स्वेन रूपेण च फलदाता न तदन्योऽस्ति कश्चिदाराध्य इत्येवंरूपेण न जानं
ति अतो मत्स्वरूपापरिज्ञानान्महतायासेनेष्ट्वापि मय्यसमर्पितकर्मा
णस्ते तत्तद्देवलोकं धूमादिमार्गेण गत्वा तद्भोगांते च्यवंति प्रच्यवंते तन्मो
गजनककर्मक्षयानंतरं देहादिविप्लुताः पुनर्देहग्रहणाय मनुष्यलोकं प्र
न्त त्यावर्तंते ये तु तत्तद्देवतास्वपि भगवंतमेव सर्वांतर्यामिनं पश्यंतो यजंते ते
भगवदर्पितकर्माणः तद्विद्या सहितकर्मवशादर्चिरादिमार्गेण ब्र
ह्मलोकं गत्वा तत्रोत्पन्नसम्यग्दर्शनास्तद्भोगांते मुच्यंत इति विवेकः
[illegible]
[illegible] २४

सदानन्दीटीका ११

अहं विभुः समस्तानां यज्ञानामाश्रयः प्रभुः मत्स्वामिका हि यज्ञास्तेषु यज्ञ
भोक्ताहमीश्वरः १ तथापि मां न जानंति यथावच्छास्त्रगोचरं अतस्तेऽत
फलं भुक्त्वा पतंत्यस्मिन्संसृतौ २ ये तु सर्वेश्वरं तत्तद्देवतास्वपि मां हरिं
प्रपश्यंतो यजंते ते मुक्तिभाजः शनैः शनैः ३ । २४

नीलकंठीटीका १२

हि यतः सर्वयज्ञानामहमेव सर्वदेवतारूपेण भोक्ता प्रभुः फलदाता च
एवं सत्यपि ते मां यज्ञभिन्नं तत्त्वेन याथात्म्येन न जानंति अतश्च्यवंति

ज्ञाननिष्ठामलब्ध्वासंसारगर्तेपतंति २४

आनंदीटीका १३

सर्वेषांतांतांदेवतारूपेणक्रियमाणानांयज्ञानांश्रौतानांस्मार्तानांचा
हमेवभोक्तासर्वांतर्यामितयास्वीकर्ताप्रभुःफलदाताचाहमेवतुपुनः
तेदेवतान्तरयाजिनोमांतत्त्वेनैकात्म्येननाभिजानंतिअतोहेतोःच्यव
न्तिब्रह्मत्वमनासाद्यगतागतंलभंते [illegible] २४

रामकंठीटीका १४

एतदेवप्रकटयितुमाह॥

सर्वयज्ञानांनानाभेदानांयागानामहमेवभोक्तापरमेश्वरएकएवफल
स्यस्वीकर्तातथाप्रभुरनुष्ठानक्रियाधिष्ठितः सर्वयज्ञाअहमेवेतितु
नत्वयाविधंमांतत्त्वेनयथोक्तेनाभिजानन्त्येकत्वेननप्रतिपद्यन्ते अ
तोहेतोस्तेनाहंशास्त्रानुष्ठातारःच्यवन्तिममविभूत्यन्तेनानात्वेनसर्वप
श्पन्नीमर्थः [illegible] २४

लासिकी [illegible] टीका १५

तत्रहेतुमाह—

हियतोहंसर्वेषांदेवपित्रादिरूपदानानांयज्ञानांभोक्तावयाजकदत्त
द्रव्यस्वीकर्ताचास्मि प्रभुःस्वामीयज्ञफलदाताचाहमेवतत्तद्देवतान्त
र्यामित्वात् अतोमामेवयजन्ति अविधिपूर्वकमित्युक्तौहेतुमाह न
त्विति तद्देवताव्यतिरेकेतेदेवताभक्तामांतत्त्वअवच्छिन्नतत्तद्देवतावि
लक्षणम् तत्त्वेनोक्तलक्षणेनयाथात्म्येननाभिजानन्ति नतिष्ठिन्वन्ति
अतोहेतोस्तेदेवतोपासकाश्च्यवन्ति मोक्षाख्यादन्तमरारूपाद्धि
शुष्कसंसारेपरिभ्रमन्ति [illegible] २४

पंचोलीटीका

कथंपुनरन्यदेवताभक्ताअज्ञानपूर्वकंयजंतीत्यत्रहेतुमाह अहंही
ति हियस्मादहंसर्वयज्ञानांश्रौतानांस्मार्तानांदेवतारूपेणअहमे-
वभोक्ताचपुनःयज्ञानांप्रभुःस्वामीअहंतुपुनस्तेमांतत्त्वेनयाथात्म्येन
नजानंतिअतःकारणात्अज्ञानपूर्वकमिष्टायोगफलात्च्यवंतिये
तुसर्वदेवतास्वमामेवमंतर्यामिणंप्रपंतोयजंतितेतन्नानुवर्तंते २४

विधिविकलत्वमेव दर्शयति अहंहीति हि यतः अहं परमेश्वरः
सर्वयज्ञानां सर्वेषां दैवादिप्रकारभिन्नानां यज्ञानां गुरुयज्ञानां
भोक्ता च प्रभुरेव चास्मि कोर्थः संग्रामफलं दुष्टदमनजआनंद
स्तमुपभुंजेव तेषां वीराणां स्वांशममर्पणं पूर्वं तत्र प्रेरणास्य
भुश्चास्मि इति ते चान्यदेवताभक्ता मां तत्त्वेन तात्विकदेवतास्वेकरू
पतयास्थितत्वेन नाभिजानंति परमेश्वरमेव सर्वकारणमिति
सम्यक् न जानंति अतो हेतोश्च्यवंति स्वर्गात्पुनरस्यानामयंति यद्वा
महामखामेहूरेति हंति पुनः पुनः संसारमार्गे सेवंते इति भावः
यतोहमेव भोक्ता प्रभुश्चास्मि तस्मान्ममस्मादाराधनमेव युक्तमि
ति तात्पर्यं यद्वा सर्वयज्ञानाम अश्वमेधादीनां भोक्ता प्रभुश्चास्मीत्य
र्थः २४॥

मधुभाष्य

अहंहीति फलं विविच्याह २४॥

भाषा अनुवाद

पूर्व कथित को विस्तार से कहते हैं कि देवता स्वरूप यज्ञ फ
ल भोक्ता मही हौं और प्रभु कहे यज्ञ फल दाता भी मैं ही
हूं पर इस तरह से वे देव पूजक लोग यथावत् नहीं जानते
हैं इसीसे फेरि संसार गति को आवतेहैं और सर्व देवमे हम
को अन्तर्यामीरूप देखि जो मेरा अर्चन करते वे पुनः संसार
गति को नहीं पावते हैं २४ ।

दोहा

मैं हि हौं सभयज्ञका भोक्ता अरु प्रभुजोय ऐसें मोहु नजा
नहे ततसें पतित सोय २४

102

यान्ति देवव्रता देवान् पितृन् यान्ति पितृव्रताः भू
तानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपिमां २५

शाङ्करभाष्यटीका १

येप्यन्यदेवताभक्तिमत्वेनाविधिपूर्वकं यजन्ते तेषामपि यागफ
लमवश्यम्भाविकं कथं यान्तीति यान्ति गच्छन्ति देवव्रताः देवेषु
व्रतं नियमो भक्तिश्च येषां ते देवव्रता देवान् यान्ति पितृनग्निष्वा
त्तादीन् यान्ति पितृव्रताः श्राद्धादिक्रियापराः पितृभक्ताः भूतानि
विनायकमातृगणचतुर्भगिन्यादीनि यान्ति भूतेज्या भूतानां पूज
काः यान्ति मद्याजिनो मद्यजनशीला वैष्णवाः मामेव यान्ति समा
नेऽप्यायासे मामेव न भजन्तेऽज्ञानात्तेन तेऽल्पफलभाजो भवन्तीत्यर्थः
२५

आनन्दगिरिकृतटीका २

यद्यन्यदेवताभक्ता भगवन्तमत्वात्ताननात् कर्म्मफलाद्भ्रश्यन्ते तर्हि ते
षां देवतायजनमकिञ्चित्करमित्याशंक्याह येपीति देवतान्तरयाजि
नामनावृत्तिफलाभावेपि तत्तद्देवतायागात्तद्रूपफलप्राप्तिध्रौव्यात्त
त्तदकिञ्चित्करमित्यर्थः देवतान्तरयाजिनामावश्यकं तत्फलमाशं
काः पूर्वकमुदाहरति कथमित्यादिना नियमो बल्युपहारप्रदक्षिणा
भक्तीभावादिरित्यर्थः देवतान्तराराधनस्यान्तवत्फलत्वमुक्त्वा भगवदा
राधनस्यानन्तफलत्वमाह यान्तीति भगवदाराधनस्यानन्तफलत्वे
देवतान्तराराधनं त्यक्त्वा भगवदाराधनमेव युक्तमायाससाम्यात्
फलातिरेकाच्चेत्याशंक्याह समानेपीति अज्ञानाधीनत्वेन देवतान्त
राराधनवतां फलतो न्यूनतां दर्शयति तेनेति २५

स्वामिकृतटीका ३

येन[illegible]देवता[illegible]त्वमेवांश[illegible]निरूपणतोयजं[illegible]यन्ति तदेवो
पपादयति यान्तीति देवेष्विन्द्रादिषु व्रतं नियमो येषां ते तद्व्रतो देवा
न्यान्तीति पितृषु व्रतं येषां ते श्राद्धादिक्रियापराः पितृन्यान्ति भूतेषु वि
नायकमातृकादिषु इज्या पूजा येषां ते भूतानि यान्ति मां यष्टुं शीलं ये
षां ते मद्याजिनस्ते तु मामेवात्यन्तं परमानंदरूपं नारायणं प्राप्नुवन्ति यान्ति २५

103

पैशाचभाष्यटीका ५

यांतिदेवव्रतेति देवेषु व्रतं येषां ते देवव्रताः देवान् यांतीति प्रकृतेन संबंधः पितॄनग्निष्वात्तादिवर्हिषदादीन् पितृव्रताः पितृषु व्रतं यत्नो येषां ते पितृव्रताः भूतानि भद्रकालिप्रभृतीनि यांतीति संबंधः २५

रामानुजभाष्यटीका ५

प्रत्याहृ यांतीति व्रतशब्दः संकल्पवाची देवव्रताः दर्शपौर्णमासादिभिः कर्मभिरिंद्रादीन् ऽभिसंकल्प इंद्रादियजनसंकल्पा इंद्रादिदेवान् यांति ये च पितृयज्ञादिभिः पितॄन् यजाम इति पितृयजनसंकल्पास्ते पितॄन् यांति ये च यक्षपिशाचादीनि भूतानि यजनसंकल्पास्ते भूतानि यांति येन तैर्देवयज्ञैः देवपितृभूतशरीरकं परमात्मानं भगवंतं वासुदेवं यजाम इति मां यजंते ते मद्याजिनो मामेव यांति देवादिव्रता देवादीन् प्राप्य तैः सह परिमितभोगं भुक्त्वा तेषां विनाशकाले तैः सह नष्टा भवंति मद्याजिनस्तु माम् अनादिनिधनं सर्वज्ञं सत्यसंकल्पम् अनवधिकातिशयासंख्येयकल्याणगुणमहोदधिम् अनवधिकातिशयानंदं प्राप्य न न
निवर्तंत इत्यर्थः ...नि...ति...

अभिनवगुप्ताचार्यटीका ६

स्पष्टार्थं २५

परमार्थप्रपाटीका ७

एवमुपक्रांतप्रमेयमुपसंहरति अर्थमाह यांतीति देवेष्विंद्रादिषु व्रतं नियमो येषां ते ते देवान् तद्व्रता यांति तथा पितृव्रताः नियमेन पितृभक्ता भवंति श्राद्धकर्तारः पितॄन् यांति भूतेषु विनायकमातृकादिषु इज्या येषां ते भूतानि यांति तथा मां सर्वात्मकं यजंते ते मद्याजिनो मां यांति मद्रूपतां प्राप्नुवंति तथा चमत्संतर्पणेन सर्वे देवाः संतर्पिता भवंतीत्यर्थः तदुक्तं स्मृत्यालोकेषु वर्णाश्रमविहितमदोत्तरि कामादिकर्म सर्वं ब्रह्मार्पणं स्यादिति निगमगिरः संगिरंते ऽपि मत्युन्नामसाने ब्रह्म म्यकृ
काकरचरणशिरः श्रोत्रसंतर्पणेन तथैवेदं गोविंदमाला तरुरिव सकलो मूलसंतर्पणेन २५

वनमालीटीका ८

देवतांतरयाजिनामनावृत्तिफलाभावेपितॄन्देवतायागानुरू
पत्वाद्फलावाप्तिर्ध्रुवेतिवदन्भगवद्याजिनांतेभ्योवैलक्षण्यमाह
यांतीतिसत्त्वादिगुणभेदेनाविधिपूर्वकयाजिनस्त्रिविधाः तत्रसा
त्विकदेवव्रताः देवाइंद्रादयस्तत्संबंधिव्रतं बल्युपहारप्रदक्षिणा
नमस्कारादिरूपंपूजनंयेषांते नानेवदेवान्यांतीति तेयथायथोपा
सतेनदेवभवंतीतिश्रुतेः राजसास्तुपितृव्रताःश्राद्धादिक्रिया
भिस्तेषामाराधकास्तानेवयांतितथातामसाभूतेज्यायक्षरक्षोवि
नायकमातृगणादीनांभूतानांपूजकास्तान्येवभूतानियांति प
२४ वंदेवतांतराराधनस्यतत्तद्देवतारूपत्वमंतवत्फलमुक्त्वाभगव
दाराधनस्यभगवत्साधर्म्यरूपमनंतंफलमाह मदिति मांसर्वेश्वरे
यष्टुंशीलंयेषांतेमद्याजिनोमांसर्वेश्वरंसत्यानंतलोकादिवैभवंका
लापरिच्छेद्यानंतविभूतिंयांति समानैश्वर्यायासे भगवंतमनंत
र्यामिणमनंतगुणंमामनाराध्यदेवतांतरमाराध्यांतवत्फलंया
तीत्यहोकष्टमितिभावः २५

क्रस्नमवैजयंतीटीका ९

ननुयेत्वदन्यदेवपित्रादियाजिनस्तेकिंचिदपिफलंलभंतेऽथवा
तेषामविधिपूर्वकत्वयजनत्वेनच्यवनत्वमेवफलंस्यादथचयेत्व
द्याजिनस्तेपिकिंफलंप्राप्नुवंतीत्याशंकायांयजनप्रकारभेदेनैव
तेषांतत्तत्फलंस्यादित्याह यांतिदेवव्रताइति अत्रव्रतशब्दोभ
जनपर्यायोयजनपरोनतुनियमसंकल्पादिपरः भूतेज्यामद्या
जिनइत्युक्तिविरोधात् देवव्रतामदितरदेवयजनस्वभावाः
सात्विकादर्शपौर्णमासादियज्ञैरिंद्रादिकान्यजनस्ततोदेवानिं
द्रादींस्तल्लोकान्वातिप्राप्नुवंति पितृव्रताःपितृयजनस्वभावाः
राजसाःजनाःश्राद्धादिकर्मभिः पितृयजनस्वभावास्तानेवयांति
भूतेज्याः भूतभैरवयक्षपिशाचादिपूजनस्वभावाःतामसामांस
मदिरादिभिर्बलिभिस्तान्यजंतस्तान्येवभूतानिभूतभैरवादीनि
यांतिएवपितृभूतपूजकास्तएतेसर्वेतिमलोकेपरिमितभोगा

श्री
गी टी
न

स्तकाले तत्तद्ध्येये सति ते ते देवपित्रादिभिः सह पुनरावर्तिनो भवन्ती
त्याशयः अथ मद्याजिनस्तु मां यष्टुं शीलं येषां ते तथा मद्भक्ताः मां दे
वपित्राद्याकारेण तत्तत्स्थानावस्थितं तत्तद्रूपमात्मानं तत्तद्देवताभि
न्नं तत्तदन्तर्यामिनं तत्तदीश्वरं यान्ति अपुनरावर्तिनो भवन्तीत्यर्थः २५

देवतांतरयाजिनामनावृत्तिफलाभावेपि तत्तद्देवतायागात्तुल्य सदृशफलावाप्तिर्ध्रुवेति वदन् भगवत्याजिनां तेभ्यो वैलक्षण्यमाह ॥

मधुसूदनीटीका १०

अविधिपूर्वकयाजिनो हि त्रिविधाः अंतःकरणोपाधिगुणत्रयभे
दात् तत्र सात्विका देवव्रताः देवा वसुरुद्रादयः तत्संबंधिव्रतं नि
यमोपहारप्रदक्षिणप्रह्वीभावादिरूपं पूजनं येषां ते तानेव देवान्या
ति तं यथायथोपासते तदेव भवतीति श्रुतेः राजसास्तु पितृव्रताः
श्राद्धादिक्रियाभिरग्निष्वात्तादीनां पितॄणामाराधकास्तानेव पि
तॄन्यांति तथा तामसा भूतेज्या यक्षरक्षोविनायकमातृगणादीनां
भूतानां पूजकास्तानेव भूतानि यांति अत्र देवपितृभूतशब्दानां
तत्संबंधिलक्षणयोः श्रुतव्रत्यायेन समासः मध्यपदलोपो वि स
मासानंगीकारात् प्रकृतिविकृतिभावाभावेन च तादर्थ्यचतुर्थी
समासायोगात् अतएव पूजावाचीज्याशब्दप्रयोगात् पूर्वपर्याय
इयेपि व्रतशब्दः पूजापर एव एवं देवतांतराराधनस्य तत्तद्देवतारू
पत्वमंतवत्फलमुक्त्वा भगवदाराधनस्य भगवद्रूपत्वमनंतफल
माह मां भगवंतं यष्टुं पूजयितुं शीलं येषां ते मद्याजिनः सर्वासु दे
वतासु भगवद्भावदर्शिनो भगवदाराधनपरायणा मां भगवंत
मेव यांति समानेप्यायासे भगवंतमंतर्यामिनमनंतफलद
मनाराध्य देवतांतरमाराध्यांतवत्फलं यांतीत्यहो दैवैवभव
महतामित्यभिप्रायः [illegible]
[illegible] २५

सदानन्दीटीका ११

अनावृत्तिफलाभावेप्यन्यदेवतयाजिनां ध्रुवात्सदृफलावाप्ति
रित्येवं भगवान्वदन् १ तथा ते मां न जानन्ति यथावत्तत्त्वगोच
र १ अतस्तेन फलं भक्त्यापन्नमप्यक्षरं नृणां २ येन सर्वेश्वरं न

न्देवतास्वपि मां हरिं प्रपश्यंतोयजंतेतेमुक्तिभाजःशनैःशनैः
भगवद्याजिनांतेभ्योवैलक्षण्यंवदन्फलं वसुरुद्रादयोदेवास्तेषुवृषि सं १
व्रतेहितन् २ इज्जनंचास्तियेषांतेवस्वादीनेवयांतिवै अग्निष्वात्ता
दिपितॄणांयेश्राद्धादिभिरर्चकाः ३ तान्येवयांतिपितॄंस्तेराजसा
स्तामसायणाः यक्षरक्षोगणादीनांभूतानांइज्जकाश्चतान् ४ यां
त्येवंभगवद्भक्तामांविभुंपरमेश्वरं सदाइज्जयितेशीलंयेषांमयाजि
नश्चते ५ येदेवतास्वसर्वास्वभगवद्भावदर्शिनः तेमन्मयापुण्याया
तिमामेवपरमेश्वरं ६ अहोसमानेप्यायासेमत्काम्याद्वइदेवता
मामेववासुदेवाख्यंभगवंतंभजंतिन ७ मद्भक्तानादत्तीवाल्पफ
लभाजोभवंतितेअज्ञानंमंदभाग्यानामहोदैवसंभवं ८ इत्य
भिप्रायईशस्यकृपाब्धेर्जगतांगुरोः २५

नीलकंठीटीका १२

सर्वेभक्तायथाभजनंप्राप्नुवंतितथाहअसांनिध्यमित्याह यांतीति
भूतार्थमिज्यायेषांतेभूतेज्याः २५

एतदेवनिगमयति ॥

आनंदीटीका १३

देवार्थंव्रतमर्थाद्यजनंयेषांतेदेवव्रताःभूतेज्याःभूतानांचतुर्दशविधा
नांभूतगणानामर्थंइज्यायेषांतेबलिदानेनभूतयज्ञंकुर्वंतः [illegible]
[illegible] २५

रामकंठीटीका १४

ततश्च देवेभ्योदेवार्थंव्रतंनियमोयेषांतेशक्रादिदेवाराधकादेवव्रतास्तत्स
पर्यासिद्धौदेवानेवयांतितल्लोकभाजोभवंतीत्यर्थः एवंपितृव्रताः
पितॄन्यांतितथाभूतेभ्योयक्षरक्षःपिशाचादिभ्यस्तदर्थमिज्यायागो
येषांतेतादृशास्तानेवसर्वेवयांतिदेवपितृयाजिनःसात्विकाभूतया
जिनस्तुराजसास्तामसाश्च यडुक्तं यजंतेसात्विकादेवान्यक्षरक्षांसि
राजसाः प्रेतान्भूतपिशाचांश्चयजंतेतामसाजनाइति येतुनिस्त्रैगुण्या
स्तेमद्याजिनोमामेवत्रैगुण्यातीतस्वरूपंयष्टुंशीलंयेषांतेतथाविधमे
वमत्स्वरूपंपरंब्रह्मयांतिसमाप्नुवंते [illegible]
[illegible] २५

+ नन्वयदिदेवताद्युद्देशेनापियजनंपरमार्थतस्त्वद्यजनमेव तर्हि किमिति तेषामनर्वृत्ती स्वर्गादिप्रा
प्तिः नत्वविनाशित्वत्पदावाप्तिरित्यतआह ॥+

लाक्षिकी [illegible]टीका १५

+ देवानांव्रतंसंकल्पोयेषांतेयाजकादेवान्यान्ति तल्लोकभाजोभवन्ती
त्यर्थः पितॄणांव्रतंसंकल्पोयेषांतेयाजकापितॄन्यान्ति भूतानांयक्ष
राक्षसादीनांसंकल्पेनेज्यायागोयेषांतेभूतानियान्ति ममेश्वरस्यसंक
ल्पेनयजनशीलाअपिशिष्टास्तद्देशेनापिमत्संकल्पेनयजनशीला
मामीश्वरंयान्ति मद्रूपाःसंपद्यन्ते एवमेकयागेदेवतादियागवशात्ता
दृक्संभारसाधनतोनैवेत्याह २५

105

पंचोलीटीका

येप्यन्यदेवताभक्ताःतेषामपियोगफलमवश्यंभावीत्याह यां
तीतिदेवव्रतादेवेषुनियमभक्त्यादिव्रतयुक्तादेवान्यांतिप्राप्नुः
वंतिपितृव्रताःश्राद्धादिक्रियापराःपितृभक्ताःपितॄनग्निष्वात्ता
दीन्यांतिप्राप्नुवंतिभूतेज्याभूतानांविनायकमातृगणसप्तमा
त्रादीनांपूजकास्तानिभूतानियांतिप्राप्नुवंतिमद्याजिनोमद्भक्ता :
स्तल्पप्रयासेनांपरमानंदरूपंयांतिप्राप्नुवंति २५

रणवीरसमिद्योधिनी।

अतएव यांतीति देवादीनुद्दिश्यकर्माचरंतोदेवादिसायुज्य
मेवयांतीति स्पष्टार्थोयंश्लोकः २५॥

मधुभाष्य

यांतीति दुर्बलैस्त्वंपूजयितुमशक्योमदर्वादित्यभावाद
२५॥

भाषा अनुवाद

अब वही उक्त वाक्य का प्रतिपादन करते हैं कि जो देवब्रत करे इन्द्रादि देव उपासक वे देवलोक को जाते औ पितृ उपास ना करने वाले पितृ लोक को जाते तथा भूत सेवाकारी अन्त मे भूत जोनि पावते हैं औरजो मेरी पूजा करैं है सो मयाजी अक्षय परमानंद स्वरूप हमको प्राप्त हो यं हैं २५।

दोहा

देवव्रती देवहिमिलें पितृव्रत पितरों भूतयजें भूतहि
मिलें मोहि यजे मोहु कोय २५॥

10.b

पत्रंपुष्पंफलंतोयं योमेभक्त्याप्रयच्छति तद-
हंभक्त्युपहृत मश्नामिप्रयतात्मनः २६ ॥

शांकरभाष्यटी॰

नकेवलं मद्भक्तानामनावृत्तिलक्षणमनंतफलमुक्तं सुखा-
राधनंचाहं कथंपत्रमिति पत्रंपुष्पंफलंतोयमुदकंयोमेमह्यंभ-
क्त्याप्रयच्छति तदहंपत्रादि भक्त्योपहृतं भक्तिपूर्वकं प्रापितं
भक्त्युपहृतमश्नामि गृह्णामि प्रयतात्मनः शुद्धबुद्धेः २६ ॥

आनंदगिरिकृतटीका

अनंतफलत्वाद्भगवदाराधनमेव कर्तव्यमित्युक्तं सुकरत्वाच्च
तथेत्याह नकेवलमिति भगवदाराधनस्यसुकरत्वमेव प्रश्नपू-
र्वकंप्रपंचयति कथमित्यादिना यद्धिपुष्पादिकंभक्तिपूर्वकंम-
दर्थमर्पितं तेनायंशुद्धचेताः तपस्वीमामाराधयतीत्यहमवधा-
रयामीत्याह पत्रमित्यादिना २६ ॥

स्वामिकृतटीका

तदेवंस्वभक्तानामक्षयंफलत्वमुक्तं अनायासत्वंचस्वभक्तेर्द-
र्शयति पत्रमिति पत्रपुष्पादिमात्रमपिमह्यंभक्त्याप्रीत्यायःप्रय-
च्छति तस्यप्रयतात्मनःशुद्धचित्तस्य निष्कामभक्तस्य तत्पत्रपुष्पा-
दिकं तेनभक्त्याउपहृतंसमर्पितमहमश्नामिप्रीत्याभुंजामि नहि
महाविभूतिपतेःपरमेश्वरस्यसमस्तदेवतानामिवबहुवित्तसा-
ध्ययागादिभिःपरितोषःस्यात् किंतुभक्तिमात्रेणअतोभक्तेनस-
मर्पितंकिंचित्पत्रादिमात्रमपि तदनुग्रहार्थमेवाश्नामीतिभावः २६

पैशाचभाष्यटीका

पत्रंपुष्पमिति भक्त्याप्रयच्छतिददाति तदहंभक्त्यादत्तमश्नामिभुं-
जेप्रयतात्मनः प्रयतःशुद्धआत्मायस्यतस्य प्रयतात्मनोभक्त-
स्यसंबंधिपत्रादिद्रव्यंममप्रीतयेभवतीत्यर्थः २६ ॥

रामानुजभाष्यटी॰

मय्यातिनामयमपिविशेषोस्तीत्याह पत्रमिति पत्रंवापुष्पंवा

गी॰ फलंवातोयंवा योभक्त्यामेप्रयच्छति अत्यर्थमत्प्रियतयामत्सं
टी॰ प्रदानेनविनात्मधारणमलभमानोयोमेपत्रादिकंददाति तस्य॰
न॰ प्रयतात्मनः मत्प्रदानैकप्रयोजनत्वरूपशुद्धमनसस्तथाविधभ
क्त्युपहृतमहंसर्वेश्वरोनिखिलजगदुदयविभवलयकर्तानिर॰
स्तसमस्तकामःसत्यसंकल्पोऽनवधिकातिशयासंख्येयक॰
ल्याणगुणगणःस्वाभाविकानवधिकातिशयानंदस्वानुभवे॰
वर्तमानोपिमनोरथपथदूरवर्तीचतदश्नामि यथोक्तंमोक्षधर्मे
याःक्रियाःसंप्रयुक्ताःस्युरेकांतगतबुद्धिभिः ताःसर्वाःशिरसा
देवःप्रतिगृह्णातिवैस्वयम् २६ ॥

अभिनवगुप्तकृतटी॰

स्पष्टार्थम् २६ ॥ ॥ ॥

परमार्थप्रपाटीका

तदेवंदेवपित्रादिप्राप्त्यर्थंकायक्लेशार्थव्ययादिनाभूयाना॰
यासोस्ति मत्प्राप्तिस्तथानेत्याह पत्रमिति तस्यप्रयतात्मनः
शुद्धचित्तस्यशुद्धस्यतस्यपत्रपुष्पादिकमहमश्नामि गृह्णामि
नान्यस्य तस्यकस्ययोमेमह्यंभक्त्याभावेनप्रयच्छति तदेभेनत
द्भक्त्युपहृतंभक्त्याभजनेनार्जवेनानीतं नतुबलात्कारेणचौ
र्येणवा तस्मात्त्वामसकलकामोहंभक्त्यैवलभ्यो नोपचारै॰
रित्यर्थः २६ ॥

वनमालीटीका

अनंतफलदत्वादतिसुकरत्वाच्चहरेराराधनमेवकार्यमित्या॰
ह पत्रमिति पत्रादिकंयत्किंचिदनायासलब्धंवस्तुयःकश्चि

दपितरोमेमह्यमनंतविभूतिपतयेसर्वेश्वरायभक्त्यानवाहृदे
वात्पर्यंकिंचिदस्तीतिस्नेहधाराप्पूर्वकंसर्वोत्तमत्वधियाप्रय
च्छति ईश्वरायभृत्यवदुपकल्पयति ममस्वत्वानास्पदस्यव
स्तुनोभावात्सर्वस्यापिजगतोमय्येवार्जितत्वात् अतोमदी
यमेवसर्वंमह्यंसमर्पयतीतेन तस्यप्रीत्याप्रयच्छतःप्रय
तात्मनःशुद्धमनसः तत्पत्रपुष्पादिकमहंसर्वेश्वरोश्ना
मि श्रीदामब्राह्मणार्पिततंदुलकणभक्षणवत्प्रीतिविशे
षप्रतिबद्धहृदयोभक्ष्याभक्ष्यादिकंजानन्नपिजननिव
बालइवमात्राद्यर्पितपत्रपुष्पादिकंभक्तार्पितंभक्षया
मि कीदृशंभक्त्युपहृतंभक्त्याप्रीत्यासमर्पितंतेनप्रीत्या
समर्पणमेवमद्भक्षणेनिमित्तमित्यर्थः अत्रभक्त्याप्रय
च्छतीत्युक्त्वापुनरपिभक्त्युपहृतमितिवदन्भक्तस्यब्रा
ह्मणत्वतपस्वित्वादिकंमद्भक्षणेस्वीकारेचनिमित्तंन
भवतीतिसूचयति अतोभक्तिरेवमत्परितोषनिमि
त्तंनतुदेवतांतरवत्पशूपहारादिबहुवित्तव्ययायाससा
ध्यंकिंचिदितिदेवतांतरमपहायमामेवभजेनेति
भावः २६ ॥

उत्तमवैजयन्तीटीका

ननुयदित्वत्पूजनमनेकवस्तुसाध्यंस्यात्तर्हिरेधनिनस्तपव

तत्कुर्वंति येतु निर्धनास्तेनकुर्वन्तीत्याशंक्यदेवादीनामारा
धनमेवतादृशंस्यात् ममाराधनंतुकेवलंभक्तिमात्रमेवाप
क्षितं नत्वनेकवस्त्वपेक्षितमित्याह पत्रंपुष्पमिति पत्रंतुलस्या
दिदलंवापुष्पंकमलादिकुसुमंवा फलंनारिकेलादिकंवा
तोयंगंगादिजलंवा योमदनन्यभक्तोमेसर्वेश्वराय सर्वांत
र्यामिणे सुदाममित्रायविदुराद्यर्पितशाकभोगिने गजेंद्रा
र्पितकंजायशबर्यर्पितफलभोक्त्रेरन्तिदेवार्पिततोयाय म
ह्यंभक्त्याकेवलयामन्निष्ठया प्रयच्छतिददाति तस्यप्रयतात्म
नःप्रकर्षेणयतः स्ववशीकृतआत्मामनोयेन सतथातस्यनि
ष्काममनसः पुरुषस्यभक्त्यानिष्कपटप्रीत्या उपहृतंदत्तंत
त्सर्वंपत्रादिकमहमवाप्तसमस्तकामोपिलक्ष्मीपतिरपिष
डैश्वर्याष्टसिद्धिनवनिध्यादिसम्प
न्नोपिसर्वेश्वरोपिप्रीतियु
क्तःसन् अश्नामि
शिरसा तत्पूर्वं
प्रतिगृह्यभुं
जेइत्यर्थः
तदुक्तंमोक्षधर्मे ॥
याःक्रि

याः संप्रयुक्ताः स्युः रेकांतगतिबुद्धिभिः ताः सर्वाः शिरसा देवः प्रति
गृह्णाति वै स्वयमिति श्रवाई भक्त्येस्तु कापि उनभक्त्युपहृतमित्य
क्तिस्तु भक्तिरेव मत्तोषहेतुर्नतु पत्रादिकं भक्तिरहितैर्दत्तं दुर्योधना
द्यैरपि द्विजाद्यैर्यदि महत्सर्वं ब्रह्मांडमपि तद्दत्तं तदप्यहं नांगीकरो
मि तदुक्तैः स्वपचैरपि पत्रादिकं यत्किमपि किंचिदपि दत्तं तदमाद
रेणैव स्वीकरोमीति सूचयति तोयमित्यनेन मदाराधने यदि कष्टसा
ध्यानि पत्रादीनि भवेयुस्तर्हि तेषामप्यपेक्षा नास्ति किंतु गंडूषमात्रे
णजलेनैव मदाराधनं भवेदिति मदाराधनस्यातीवसुलभत्वं सूचितं २९
तदेवं देवतांतराणि परित्यज्यानं मधुसूदनीटीका ९ तफलत्वाद्भगवत एवाराधनं कर्तव्यमतिसुकरत्वाच्चे
त्याह — पत्रं पुष्पं फलं तोयमन्यद्वानायासलभ्यं यत्किंचिद्वस्तु यः कश्चिद
पि नरो मे मह्यमनंतमहाविभूतिपतये परमेश्वराय भक्त्या न वास्तदेवा
स्मरमस्ति किंचिदिति बुद्धिश्र विक्रया प्रीत्या प्रयच्छति ईश्वरायच्छन्मव
डुपकल्पयति मत्त्वनानास्यदृव्याभावात् सर्वस्यापि जगतो म
येवार्जितत्वात् अतो मदीयमेव सर्वं मह्यमर्पयति जनः तस्य प्री
त्या प्रयच्छतः प्रयतात्मनः शुद्धबुद्धेस्तत्पत्रपुष्पादि तुच्छमपि वस्त्व
हं सर्वेश्वरोऽश्नामि अशनवत्प्रीत्या स्वीकृत्य तर्पयामि अत्र वाच्यस्या
संते तिरस्कारादशनलक्षितेन स्वीकारविशेषेण प्रीत्यतिशयहेतु
त्वे व्यज्यते न ह वे देवा अश्नंति न पिबंत्येतदेवामृतं दृष्ट्वा तृप्यंतीति श्रु
तेः कस्मात्तुच्छमपि तदश्नामि यस्माद्भक्त्युपहृतं भक्त्या प्रीत्या समर्पि
तं तेन प्रीत्या समर्पणं मत्स्वीकारनिमित्तमित्यर्थः अत्र भक्त्या प्रय
च्छतीत्युक्त्वा पुनर्भक्त्युपहृतमिति वदन्भक्तस्य ब्राह्मणत्वतपस्वि
त्वादि मत्स्वीकारनिमित्तं न भवतीति परिसंख्यां सूचयति श्रीदामब्रा
ह्मणानीततंडुलकणभक्षणवत्प्रीतिविशेषप्रतिबद्धभक्तस्य
विदुरेणापि तद्वत् मायार्पितं पत्रपुष्पादि भक्त्यार्पितं सात्त्विकं भक्ष
यामीति वानेन भक्तिरेव मत्परितोषनिमित्तं न तु देवतांतरवद्बल्युप
हारादि बहुवित्तव्ययायाससाध्यं किंचिदिति देवतांतरमपहाय मा
मेव भजेतेत्यभिप्रायः [illegible] २९
सदानन्दीटीका ९

श्री
गी टी
न

अनाहतिफलावाप्त्यैकार्पणभक्तिर्नकेवलं श्रीहरेः किंत्वनायासा
राध्यत्वादपिसज्जनैः १ पत्रंपुष्पंफलंतोयमन्यद्वावस्तुकिंचन यद
र्पयामलभ्यंयः कश्चनापिददेहभृत् २ अनंतैश्वर्यपतयेमह्यंश्री
विलवैश्मथीः वासुदेवायमेनास्तिकिंचनेतिमद्धिया ३ प्रीत्याशु
सर्वदेवात्मावीश्वरायार्पयत्यतः मत्त्वानामन्यद्रव्याभावात्सर्वस्य
वस्तुनः ४ मयार्जिततयासर्वंमदीयंमेर्पयत्ययं प्रीत्याप्रयच्छतस्त
स्यशुद्धबुद्धेर्महात्मनः ५ पुष्पपत्रादितत्सर्वंवस्त्वहंपरमेश्वरः स्वी
कृत्याशनवत्प्रीत्यात्प्राप्नोमि प्रीतिपुरःसरैः ६ यस्मात्समर्पितंप्रीत्या
मत्स्वीकारोस्तिकारणं श्रीदामब्राह्मणानीततंडुलाशनवत्ततः ७
परितोषनिमित्तंमेभक्तिरेवनवैभवं अतोदेहांतरंहित्वामामेवस
ततंभजेत् ८ । २६

नीलकंठीटीका ९

मद्भक्तिरतिसुकरादेवतांतरभक्तिस्तुबहुवित्तव्ययायाससाध्येत्या
शयेनाह पत्रमिति भक्त्यैवकेवलंसमर्पितंतानान्यदितिभावः
भक्त्युपहृतंभक्त्यासमर्पितं २६

ततश्चानाविधद्रव्यसंभारसाध्यसाध्या आनंदीटीका १२ देवादियजनान्निजयजनेविशेष
माह प्रयतोब्रह्मैक्यभावनायांसमाहितआत्मांतःकरणंयस्यतस्यभक्त्यादत्तं
तत्पत्रादिकमहमश्नामि अहंहरिभक्तिमताभक्त्यादत्तेनानायासल
भ्येनपत्रमात्रेणापितोषंभवामितत्तुदेवतांतराबहुवित्तव्यया
ससाध्येनयज्ञविधिनेत्यर्थः
२६

सचमद्यागोदेवब्रतादियागवत्तत्र रामकंठीटीका १४ ज्ञानाद्द्रव्यसंभारसाध्यनःनैवेत्याह ॥
भक्तिरहृदयचिन्मात्रस्वरूपब्रह्मात्मभावनयात्मनएवतस्यतस्यवाना
नादेवताविशेषस्योपासनंतयासाधनभूतयायत्तत्पत्रविसाद्याद्यपि
यत्किंचिन्मह्यंप्रयच्छतितस्यप्रयतात्मनस्तथाविधाहंयविनान
समाहितान्तःकरणस्यतादृशभक्त्युपहृतमश्नामि उपभुंजे याद
शभावनाविशेषेणोपहृतंतथैवतत्स्वीकरोमीत्यर्थः
२६

योमङ्गलः पत्रादिकंमेमह्यंसंप्रदानाय सर्वान्तर्यामिणेईश्वराय देवविशेषत्वादिपरिच्छेदरहितायभक्त्यासमर्पयति प्रयतात्मनः प्रयतः शुद्धोविमर्शोत्यागेनदेहाद्यभिमानाकलुषितस्यात्मायस्यतस्यभक्त्याउपहृतंपत्रादिकंभक्त्यासमर्पितमश्नामिप्रीत्यास्वीकरोमीत्यर्थः भक्तेःपुनर्ग्रहणमशनेप्रत्यतिशयेनसाधकतमत्वसूचनार्थम् [illegible] २९

पंचोलीटीका

नकेवलंमङ्गलानामनाहूतिलक्षणानंतंफलंकिंतुसुखाराधनश्चाहंकथमित्याह पत्रमिति यःमेमह्यंपत्रंपुष्पंफलंतोयंभक्त्यायच्छति अहंतत्पत्रादिकंसर्वंभक्त्युपहृतंभक्तिपूर्वकंप्रापितंप्रियतात्मनःशुद्धबुद्धेरश्नामिगृह्णामि २९

रत्नावीरसमिद्धोयिनी

प्रथमम[illegible]यासद्व्यसाध्यदेवतांतरयजेभ्यःस्वयजनस्यसाधनांतरा[illegible]पेक्षतयानायासससाध्यत्वेनचव्यतिरेकंदर्शयित्वमाह पत्र[illegible]मिति यःकश्चित्कर्माधिकारीपत्रादिभिरेवमत्पूजामारभते तस्यातिपवित्रांतःकरणस्यसंकल्पानंतरेभ्यःप्रत्यावर्त्यसमारब्धस्वोचितकर्मण्येवदत्तावधानचित्तस्यच तदिति भक्त्योपहारीकृतं पत्रादिकमित्यर्थः अश्नामि स्वीकृत्यात्मस्वदे पत्रादिकंवसर्वंसकलभुक्त्वातिरिक्तवादिव्यंजकं ततश्चैतस्मिन्विषमेस्यानेकालेवपूजोपकरणद्रव्याभावात्कथंभवत्पूजामारभइति शंकांमावतानकार्याभक्तिमात्रेणैवहिमत्पूजायाःसंपन्नत्वादितिभावः २९॥

मधुभाष्य

पत्रमिति नन्वविदितपत्रावि तस्यापकायतोकेवीणहृदे

110

भक्त्यैवाहं तु दृष्ट इति भावः भक्तप्रियं सकललोकनमस्कृ
तं चेति भारते एतावानेव लोकेऽस्मिन्पुंसः स्वार्थः परः स्मृ
तः एकांतभक्तिर्गोविंदे यत्सर्वत्र तद्दर्शनं अतो यत्कृतोऽपि
न हि स्नेहादिमत्त्वादस्य भक्तस्यापि कस्य विरुद्धफलदत्वमि
विपरीतस्यापि कस्यचिद्विपरीतमित्यत आह ॥ २८ ॥

भाषा अनुवाद

अब स्वभक्तको अलभ्य फलत्व औं स्वभक्ति का सुलभत्व देखावते हैं जो मनुष्य भक्ति पूर्वक पत्र पुष्प फल जल मात्र भी हमै देय है वह विमल चित्त भक्त जनका प्रीति से दिया हुआ पुष्पादि मै अति प्रसन्न होय ग्रहण करता हूं इसका भाव यह है कि और देवके समान बडी पूजा सामग्री हमै न चहिये हम केवल भाव भक्ति से प्रसन्न होते हैं २९।

दोहा

पत्र पुसप फल जल मोहि देहिं भक्ति सें जोय भाव हि सें दि
यो मै ग्रहों शुद्ध चित केहि सोय २८॥

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् यत्तप
स्यसि कौन्तेय तत्कुरुष्व मदर्पणम् २७

शांकरभाष्यटीका १

यत एवमतः यत् करोषीति यत्करोषि यदाचरसि शास्त्रीयं
कर्म्म स्वतः प्राप्तं यदश्नासि यत्खादसि यज्जुहोषि हवनं निर्व
र्त्तयसि श्रौतं स्मार्त्तं वा यत्ददासि प्रयच्छसि ब्राह्मणादिभ्यो
हिरण्ययपात्रवस्त्रादि यत्तपस्यसि कौन्तेय तत्कुरु मदर्पणं म
त्समर्पणं २७

आनन्दगिरिकृतटीका २

तदाराधनस्य सुकरत्वे तदेवावश्यकमित्याह यत इति स्वतः शा
स्त्रादितः प्राप्तं गमनादीति यावत् यदश्नासि यं किञ्चिद्भोगं भुंक्ते
हवनस्य स्वतस्त्वं वारयति श्रौतमिति मत्समर्पणं तत् सर्वं मह्यं
समर्पयेत्यर्थः २७

स्वामिकृतटीका ३

न केवलमाराधनादिकमपि यज्ञार्थपशुसोमादिद्रव्यवत् मदर्थमेवोप
नेयं पापसमर्पणीयं किन्तर्हि यदिति स्वभावतो वा शास्त्रतो वा य
त्किंचित्कर्म करोषि तथा यदश्नासि जुहोषि यद्ददासि यत्तपस्यसि
तपः करोषि तत्सर्वं मय्यर्पितं यथा भवति एवं तथा कुरुष्व २७

पैशाचभाष्यटीका ४

यत्करोषि यल्लौकिकं वैदिकं वा कर्म करोषि यदश्नासि ओदनादिकं भुङ्क्ते
ज्या
यदाज्यादिकं जुहोषि देवतार्थं यद्धिरण्यादिकं ददासि यत्कृच्छ्रचान्द्राय
णादिकं तपस्यसि तत्सर्वं कौन्तेय कुरुष्व मदर्पणं मदाराधनं २७

यस्माज्ज्ञानिनो महात्मनो वाऽस्य रामानुजभाष्यटीका ५ न साङ्गोचरोऽयं स्वभावः तस्मात् ज्ञानी भूत्वाऽकलत्तणाभक्ति भावाराधनरतात्मा कीर्तन यजनार्चनप्रणामादिकं कु र्वाणो लौकिकं वैदिकं च नित्यं नैमित्तिकं कर्म कुर्वित्याह ॥

यदिति यद्देहयात्रादिशेषभूतं लौकिकं कर्म करोषि यच्च वैदिकं होम
दानतपः प्रभृति नित्यनैमित्तिकं कर्म करोषि तत्सर्वं मदर्पणं कुरुष्व
अर्प्यत इत्यर्पणं सर्वस्य लौकिकस्य वैदिकस्य च कर्मणः कर्तृत्वभो
क्तृत्वमाराध्यत्वं च यथा सर्वं समर्पितं भवति तथा कुरु एतदुक्तं भ
वति यागदानादिषु आराध्यतया प्रतीयमानान् देवान् कर्मकर्तृत्व

श्री
गी टी
न

भोक्तृत्वादौ मदायत्ततया मत्संकल्पायत्तस्वरूपस्थितिप्रवृत्तितया च
मय्येव परमशेषिणि परमकर्तरि त्वां च कर्तारमाराध्यदेवतार्थकृतमा
राधनक्रियाजातं सर्वं समर्पयित्वा मत्प्रियामात्रं स्वकर्मसु चैतेकरस
तानि तवामाप्त आदेश्यतत्स्वभावकगर्भितं तान्वामपि समर्थं प्रीतिश्चरणोभ
वेति २७

अभिनवगुप्तकृतटीका ६ ॥ देवतान्तरयाजिनो यतो मित
मनोरथाः फलंलघु[illegible]र्थं २७ यंति अतस्त्वं सर्वं शास्त्रोपदेशक्रमेण मदर्पणं मन्मयत्वेनोद्भावनं कुरु एवमेव
संन्यासयोगइतिविंशतीत्रीविस्पष्टार्थं अतस्त्वादेव प्रतिज्ञानेइति प्रकृतप्रश्नोयमर्थो भगवत्प्रतिज्ञातत्वात्प्रस्तुतमा
हृष्टोभवति २७ ॥

परमार्थप्रपाटीका ७

तदेवं पत्रपुष्पाद्यर्पणार्थं मत्प्रतिमाविभूतिगवेषणाप्रयासोपि मास्त्वि
त्याह यदिति स्वभावतः शास्त्रतो वा करचरणव्यापारेण यत्किंचित्क
र्म करोषि यदश्नासि भोक्तुमिच्छसि जुहोषि यद्वा तपस्यसि ददासि तपस्य
सि च तत्सर्वं मदर्पणं कुरु संकल्पमात्रेणैव मदर्पणं भवति न तु प्र
दर्शनाद्यपेक्षेत्यर्थः २७

वनमालीटीका ८

कीदृशं तेभजनं तदाह यदिति यत्करोषि शास्त्रं विना विरागात्स्वाभावि
कं लौकिकं गमनादिकं यदश्नासि स्वत्स्वार्थं कर्म सिद्धार्थं वा तथा यज्जु
होषि शास्त्रबलान्नियमग्निहोत्रादिहोमं निर्वर्तयसि श्रौतस्मार्तं सर्व
होमोपलक्षणमेतत् तथा यद्ददासि अतिथिब्राह्मणादिभ्योन्नसुव
र्णादि तथा यत्तपस्यसि प्रतिसंवत्सरमन्नात्रप्राशनादिकपापनिवृत्तये
वा चान्द्रायणादिकं चरसि अथवा यन्नित्यनैमित्तिकादिकं तदपि यदि स
यं मर्पयन् वप्राणिस्वभाववशाद्विनापि शास्त्रमवश्यंभाविगमनाशना
नै दिपञ्चशास्त्रवशादवश्यंभाविहोमदानादिकं तत्सर्वं लौकिकं वैदि
कं च कर्म मय्येव निमित्तेन क्रियमाणं मय्यर्पितं यथा स्यात्तथा कुरुष्व
अवश्यंभाविनां कर्मणामपि परमगुरौ समर्पणमेव मद्भजनं न तु त
दर्थं इष्टव्यापारः कश्चित्कर्तव्य इति भावः २७

कुसुमवैजयन्तीटीका ९

ननु ये महात्मानस्तानीत्थं भजन्ते न यत्कर्तव्यं कर्म तत्त्वया कर्म
याकृतमिदानीं यन्मम कर्तव्यं भवेत्तदपेक्षायां त्वमप्युक्तलक्ष
णोस्तानीमदनन्यभक्तस्य भूत्वा प्रयत्ने लौकिकं वैदिकं तद्रूपं कर्म करोषि
तत्सर्वं मदर्पणमेव कुर्वित्याह यत्करोषीति यद्धात्त्वदृष्ट्या स्वभावेन वा आत्मात्मीयदेहादिभि
र्निर्वाहाय लौकिकं कर्म करोषि

यच्च देहपालनायान्नादिकमश्नासि भक्षयसि यच्च वैदिकमग्निहोत्रादि
रूपं होमं जुहोषि हवनं करोषि यच्च हिरण्यान्नादिकं सत्पात्रेभ्यो ददासि
यच्च प्रत्यहमन्नातडवितवतनयेनपस्यसि चांद्रायणादितपश्चरसि
हे कौन्तेय तत्कृत्वापि तत्सर्वं मत्कर्म मयि कर्मसमर्पणं कुरुष्व म
यि सर्वेश्वरे सर्वनियन्तरि सर्वात्मनि अर्प्यतेऽस्मत्समर्पणं निखिललौकि
कवैदिकादिकर्मणः कर्तृत्वभोक्तृत्वाद्यभावादिकं सर्वं यथा सम
र्पितं स्यात्तथा त्वं कुरु यथेहलोके स्वामिनोऽधीना भृत्यास्तदात्तया तद
नुकूलं शुभमशुभं वा सर्वं कर्म कृत्वा तत्कर्म तत्फलं च स्वामिन्येव निष्कप
टेन समर्पयन्ति चेत्तर्हि तत्स्वामी तेषु प्रसादं करोति तथा त्वमपि स्वस्य
मदायत्तस्थितिप्रवृत्तिकत्वं स्वात्मनोऽहं त्वमम लक्षणाभिमानं त्य
क्त्वा मय्येव कारितं यद्यत्कर्म करोषि तत्तत्सर्वं मय्येवार्पणं करोषि चेद
हं त्वयि प्रसन्नो भवामीत्यभिप्रायः २७

कीदृशं ते भजनं तदाह॥ मधुसूदनीटीका ९

यत्करोषि शास्त्रादृतेऽपि रागात् प्राप्तं गमनादि यदश्नासि स्वयं तत्स्वार्थं
कर्मसिध्यर्थं वा तथा यज्जुहोषि शास्त्रबलान्नित्यमग्निहोत्रादिहोमं नि
र्वर्तयसि श्रौतं स्मार्तं सर्वं होमोपलक्षणमेतत् तथा यद्ददासि अतिथि
ब्राह्मणेभ्यो हिरण्यादि तथा यत्तपस्यसि संवत्सरमज्ञातप्रमादि स्य
कपापनिवृत्तये चान्द्रायणादि चरसि उच्छृंखलप्रवृत्तिनिरासाय शारी
रेन्द्रियसंघातं संयमयसीति वा एतच्च सर्वेषां नित्यनैमित्तिककर्मणा
मुपलक्षणं तेन यत्स्वभावतः स्वभाववशाद्विनापि शास्त्रमवश्यंभा
विगमनाशनादि यच्च शास्त्रवशादवश्यंभाविहोमदानादि हे कौन्ते
वैदिकं य तत्सर्वं लौकिकं च कर्मान्येनैव निमित्तेन क्रियमाणं मदर्पणं मय्यपि
तं यथा स्यात्तथा कुरुष्व आत्मनेपदेन समर्पकनिष्ठमेव समर्पणफले
न मम किंचिदिति दर्शयति अवश्यंभाविनां कर्मणाममपि परमगु
रौ समर्पणमेव मद्भजनं न तु तदर्थं पृथग्व्यापारः कार्य इति तात्पर
य्याभिप्रायः [illegible] २७

सदानंदीटीका ॥

यत्करोषि स्वतः प्राप्तं यदश्नासि स्वतन्त्रतः श्रौतं वा स्मार्तं यद्वा यज्जुहो

विविधैर्बलात् १ प्रतिषिद्धभक्षणादिभ्यो हेमान्नादि ददासि यत् चान्द्रा
यणादिकं दोषशान्त्यै चरसि यत्तपः २ उक्तेष्वेव प्रवृत्तेर्वा निराशया
त्मसंयमं लौकिकं वैदिकं प्राणिस्वभावाद्वा करोषि यत् ३ मय्यर्पितं
यथा तत्स्यात्कुरुष्व त्वं तथा सदा समर्पकगतेः सर्वसमर्पणफलं य
तः ४ इत्यात्मनैव देनाथ हरिणा दर्शितं स्फुटं आवश्यं भाविता स
र्वकर्मणां परमेश्वरे ५ श्रीमत्समर्पणं नित्यं मङ्गलं मयेरितं नत्वका
चित्तदर्थे लिकर्तव्या आयाहृतिः स्फुयक् ६ इत्येवं वासुदेवस्य श्रीहरेरा
शयः परः १ । २७

नीलकंठीटीका १२

अतः सर्वं मदर्पणं कुर्वित्याह यदिति यत्करोषि गमनादिकं तदपि भगव
तः एव प्रदक्षिणादिकं करोमीति मत्प्रीत्यर्थमेव तदर्पणं कुर्विति
एवं वचनादिष्वपि नामकीर्तनादिदृष्ट्या ऊह्यं २७

तदेवं ममैकान्त्यज्ञानेन नहुतं कर्मा नैत आनंदीटीका १३

फलं ज्ञात्वा सुगमोऽर्थः [illegible] २७

रामकंठीटीका १४

यत एवं ततः ॥ यत्करोषि तत्सत्फलार्थिनया यत्कर्मोचितं श्रियसे यदश्नासि तत्सकर्मफ
लभूतमुपभुंक्ते तत्सर्वं मदर्पणं कुरु मयि ब्रह्मस्वरूपे अर्पणं मदात्मक
प्रतिपत्त्या निवेदनं यस्य तत्तादृशं कुरु संपादय तत्र कार्यतानवरि
तानां नानाफलहेतुत्वेन व्यवस्थितं विद्धारोति यज्जुहोषि तेषु तेषु य
ज्ञेषु तत्तद्देवतातर्पणार्थं यद्व्रीहवनक्रियया निपासि यच्चांतर्वेद्या
दौ ददासि पात्रेभ्यः प्रयच्छसि यमपो नियमविशेषं चरसि तत्सर्वं म
दर्पणं कुरु यज्ञदानतपोलक्षणक्रियास्वश्यकर्तव्यतास्वतत्फ
लाभिसंधानकार्पण्यपरिहारेणात्मस्वरूपानुभवमेवैकं फलमवलम्ब
स्वेत्यर्थः [illegible] २७

आत्मत्वात्त्वन्मदर्थप्रत्याय लाभिकी ...टीका १५

न्वेषणप्रयासलवः ॥ यत्स्वभावात्करोषि यदश्नासि स्वात्मने समर्पयासि यच्च देवताद्यु
देशेन जुहोषि श्रौतं स्मार्तं वा होमं निवर्तयसि यच्च पितृमनुष्याद्युद्दे
शेन ददासि यच्च पापनिर्हरणाय तपस्यसि चान्द्रायणादि तपश्चरसि

तत्सर्वमुक्तोपदेशेनमदर्पणंकुरुष्व [illegible]
[illegible] २७

पैंगोलीटी

यतएवमतः सर्वमदर्पणंकुर्वित्याह यदिति हेकौंतेय यत्करोषि
यदाचरसिस्वतःप्राप्तंयदश्नासिभुंक्षेयज्जुहोषिहवनंकरोषिश्रौ।
तस्मार्तंवायद्ब्राह्मणेभ्योहिरण्यादिकंददासियत्तपस्यसियत्तप।
श्चरसितन्मयिसमर्पणंकुरु २७

रणवीरसमिद्धोधिनी

यत्करोषीति यज्ञदानतपोलक्षणास्त्रिविधाः क्रियावर्णाश्रमि
णांयथास्वंप्रकारभिन्नाश्रवणपानुष्ठेयाः ताश्चयत्करोषीत्यने
नसमष्ट्याप्रतिपादितायज्जुहोषीत्यादिनाचतासामेवपृथक्पृ
थक्स्वरूपाविष्करणं यदश्नासीत्यनेनचतत्फलभोगकथनं
तयोर्द्वयोरपिक्रियातत्फलयोर्मानिवेद्यवानुष्ठानभोगौमत्सा
नुज्ञयाप्राप्तिदेतदित्यतस्तमपिस्ववर्णाश्रमोचितंयुद्धयज्ञतद्देतेव
ब्राह्मणान्भरवंदिगायकनर्तकादिभ्योभूम्यायग्रहारवस्त्राल
कारादिदानमश्वमेधादियज्ञांतेवाब्राह्मणानांभूम्यादिदक्षिणा
दानंवा तदंतेचमन्वादिव्यवस्थापितदंडनीत्यनुसारेणराज्या
नुपालनेव्यवस्थितिरूपंतपश्चतथैवाचरित्वातत्फलंचैहिका
मुष्मिकमुभयमपिमय्येवसमर्पयेतिभावार्थः २७॥

मधुभाष्य

२७॥

114

भाषा अनुवाद

जिस लिये मै भाव भक्ति से भक्त पर प्रसन्न होताहूं इससे हे कौन्तेय कुन्ती पुत्र जो कुछ कर्म्म करो या आहार करो या यज्ञ करो या दान करो या तप करो सो सब मदर्पण अर्थात् मेरेको समर्पण करो तो वह सब अक्षय फल होगा और दोष किसी तरह न लगैगा २७ ।

दोहा

जो करहे जो षातहे जो हवन करैं जो देहिं जो तपहे तं कौंति
सुत कर मम अर्पण पहिं २७

115

शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः संन्यासयो
गयुक्तात्मा विमुक्तो मामुपैष्यसि २८

शाङ्करभाष्यटीका १

एवं कुर्वतस्तव यद्भवति तच्छृणु शुभाशुभफलैरिति शुभाशु
भफलैरेवं शुभाशुभे इष्टानिष्टफले येषां तानि शुभाशुभफला
नि कर्माणि तैः शुभाशुभफलैः कर्मबन्धनैरेवं मत्समर्पणं कु
र्वन् मोक्ष्यसे सोऽयं संन्यासयोगो नाम संन्यासश्चासौ मत्समर्पण
तया कर्म्मत्वाद्योगश्चासाविति तेन संन्यासयोगेन युक्तश्चा
त्मान्तःकरणं यस्य तव स त्वं संन्यासयोगयुक्तात्मा सन् विमुक्तः
कर्मबन्धनैर्जीवन्नेव पतिते चास्मिन् शरीरे मामुपैष्यस्यागमिष्य
सि २८

आनन्दगिरिकृतटीका २

किमतो भवति तदाह एवमिति भगवदर्पणबुद्ध्या सर्वकर्म
कुर्वतो जीवन्मुक्तस्य प्रारब्धकर्म्मावसाने विदेहकैवल्यमावश्य
कमित्याह शुभेत्यादिना भगवदर्पणकारणा मुक्तिः संन्यासयो
गश्चेति साधनद्वयशंकां शातयति सोऽयमिति २८

स्वामिकृतटीका ३

एवं च यत्फलं प्राप्स्यसि तच्छृणु शुभाशुभफलैरिति एवं कुर्वन्
कर्मबंधनैः कर्मनिमित्तैरिष्टानिष्टैः फलैर्मुक्तो भविष्यसि कर्मणा
मयि समर्पितत्वेन तत्फलसंबंधानुपपत्तेः ततश्च मुक्तः सन् संन्या
सयोगयुक्तात्मा संन्यासः कर्मणां मदर्पणं स एव योगस्तेन युक्त आत्मा
चित्तं यस्य तथाभूतः त्वं मां प्राप्स्यसि २८

पैशाचभाष्यटीका ४

एवं मदर्पणानुष्ठाने सति शुभाशुभफलैः पुण्यपापफलैः मोक्ष्यसे
मुक्तो भविष्यसि कर्माण्येव बंधनानि तैः कर्मबंधनैः संन्यासयोगयुक्ता
त्मा संन्यास एव योगस्तेन युक्त आत्मा स्वकर्मफलासंगरूपार्थः कर्मबंध
नैर्विमुक्तो मां नित्यमुक्तं वासुदेवमुपैष्यसि प्राप्स्यसि २८

रामानुजभाष्यटीका ५

शुभाशुभेति एवं संन्यासाख्ययोगयुक्तात्मा मद्धेतुत्वेन मत्प्रियत्वेन
यैकं सकर्म च सर्वं मदाराधनमनुसंदधानो लौकिकं च कर्म कुर्वन् शु
भाशुभफलैरनंतैः प्राचीनकर्मरूपैर्बंधनैर्मत्प्राप्तिविरोधिभिर्मोक्ष्यसे तै
र्विमुक्तो मामेवैष्यसि [illegible]

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं २८

परमार्थप्रपाटीका ७

तत्फलमाह शुभाशुभैरिति एवमनेन प्रकारेण मदर्पणधिया क्रि
यमाणानां कर्मणां कर्मबंधनैः कर्मनिबंधनैः शुभाशुभफलैरिष्टानि
ष्टैर्मोक्ष्यसे शुद्धो भविष्यसि यथाग्नौ भर्जितबीजानामंकुरोत्पादक
त्वेनालिप्तत्वं तथैव ब्रह्मार्पणधिया कृतानां कर्मणां फलजनकत्वेनालि
प्तत्वमर्थः ततश्च संन्यासयोगेन मायुक्तेन युक्तात्मा चित्तं यस्यैवंविधस्त्वं
विमुक्तो जीवन्मुक्तदशां प्राप्य मामुपैष्यसि २८

वनमालीटीका ८

तादृशभजनस्य फलमाह शुभेति एवमनायासमसिद्धेऽपि सर्वकर्मस
मर्पणरूपे मद्भजने सति शुभाशुभे इष्टानिष्टे फले येषां तैः कर्मबंधनै
र्बंधनरूपैः कर्मभिर्मोक्ष्यसे मय्यर्पितत्वान्न तव तत्संबंधानुपपत्तेः
कर्मभिस्तत्फलैश्च न संबध्यसे ततश्च संन्यासयोगयुक्तात्मा संन्यासः
सर्वकर्मणां मदर्पणं स एव योगः उक्तविधशोधकत्वाद्योगस्तेन युक्तः
शोधित आत्मा चित्तं यस्य स त्वं मुक्तः सर्वकर्मा [illegible] कर्मबंधनैर्जीवन्ने
व विमुक्तः सन् तिष्ठति निःशेषकर्मरूपाविद्यः सन्नाविर्भूतस्वरूपानंदो
ऽति वैविध्यपंचवैभवं कालापरिच्छेद्यवैकुंठा[illegible]धिपतिं सर्वेश्वरं ना
नानंदाय चित्तानंतगुणालयं प्रसन्नेन्दुवदनं भक्तवत्सलं मां विवेकता
नेमामुपैष्यसि निःसंगत्वं निजसखमर्जुनं सुफलसौलभ्यरूपया
जीवातुमुपदिशतीति भावः २८

कुसुमवैजयन्तीटीका ९

ननु तर्हि सर्वकर्मार्पणेनैव मम किं फलं स्यादिति चेत्तत्राह शुभाशु

भफलैरिति संन्यासयोगयुक्तात्मा सर्वं मय्येव सर्वकर्मणः तत्फ
लस्य चार्पणं संन्यासः स एवांतःकरणविशोधकत्वाद्योगस्तेन युक्त
आत्मा मनो यस्य स तथाभूतस्त्वमेवंभूतप्रकारेण कर्मबंधनैरनाद्यनन्तैः
संचितक्रियमाणैः कर्मरूपैर्बंधनैः शुभाशुभफलैः पुण्यपाप
फलैस्त्वमबद्धः विमुच्यदिमोत्समुक्तो भविष्यसि तर्हि सर्वेभ्यो म
त्तास्त्रिविरोधिभ्यः प्राकृतस्थूलसूक्ष्मरूपेभ्यो देहादिपदार्थे[illegible]भ्यो यो
विमुक्तः विशेषेणामुक्तः सन्मां महाविभूतिपतिं समस्ताखिलदेव
सकलदेववन्द्यं वेद्यं मच्चित्त्वानन्तकल्याणगुणमहोदधिस्वरूपेणासि मद्भावं प्राप्स्य
सीत्यर्थः २८

एतादृशस्य भजनफ मधुसूदनीटीका ९

लमाह ॥ एवमनायाससिद्धेपि सर्वकर्मसमर्पणरूपे मद्भजने सति शुभाशु
भेष्टानिष्टफले येषां तैः कर्मबंधनैः बंधनरूपैः कर्मभिर्मोक्ष्यसे म
यि समर्पितत्वात्तव तत्संबंधानुपपत्तेः कर्मभिस्तत्फलैश्च न संबध्य
से ततश्च संन्यासयोगयुक्तात्मा संन्यासः सर्वकर्मणां भगवति
समर्पणं स एव योगश्चित्तशोधकत्वाद्योगस्तेन युक्तः शोधित आ
त्मांतःकरणं यस्य स त्वं सन्सर्वकर्मा वा कर्मबंधनैर्जीवन्नेव विमु सर्व
क्तः सन्सम्यग्दर्शनेनात्मावरणनिवृत्त्या मामात्मरूपेणासि साक्षात्
करिष्यसि अहं ब्रह्मास्मीति ततः प्रारब्धकर्मक्षयात्पतितेस्मिन् श
रीरे विदेहकैवल्यरूपं मामुपैष्यसि इदानीमपि मद्रूपः सन्सर्वोपा
धिनिवृत्त्या मायकभेदव्यवहारविषयो न भविष्यसीत्यर्थः [illegible]
[illegible] २८

सदानन्दीटीका ९

भजनस्येदृशस्येशः फलमाह जगद्गुरुः एवं सिद्धेऽनायासान्म
द्भजने सतीष्टे १ इष्टानिष्टफलैर्येषां तैः कर्माख्यबंधनैः मोक्ष्य
से न तत्संसर्गं प्राप्स्यसीश समर्पणात् २ संन्यासो मयि गीर्विदेः स
र्वकर्मसमर्पणं धीशोधकतया योगस्तेन युक्तः समाहितः ३ शो
धितो योगपतान्नीतः आत्मा यस्यांतरं मनः जीवन्नेव विमुक्तः सन्मत्त्वा

नाहमिति बाधनात् ४ साक्षात्कृतात्मतत्त्वः सन् मां कैवल्यपदाख्यं प
तितस्मिं छरीरे वर्त्तयात्मारब्धकर्मणः उपैष्यसि पुनः ब्रह्मरूपः स
न्नेवमहत्रः सर्वोपाधिनिर्मुक्तः स्वे महिम्न्येव प्रतिष्ठितः ९ भविष्य
सीति तात्पर्यं श्रीमद्भगवतो हरेः २८

नीलकंठीटीका १२

एवं कुर्वतः फलमाह शुभाशुभेति शुभाशुभफलैः इष्टानिष्टफलैः
कर्मरूपैर्बंधनैः एवं कुर्वन् त्वं मोक्ष्यसे भगवदर्पणबुद्ध्या यत्किंचित्क
र्म कुर्वतः कर्मलेपो नास्तीत्यर्थः अयमेवोक्तलक्षणः कर्मफलसं
न्यासरूपो मार्गस्तस्मिन्युक्तात्मा समाहितचित्तः सन् विमुक्तः कर्मबं
धनैर्विमुक्तः सन् मां सर्वेषां प्रत्यगात्मानं उपैष्यसि २८

आनंदीटीका १३

अस्य फलमाह ॥ एवं मदर्पणबुद्ध्या कर्म कुर्वाणः संन्यासः योगः एकात्मसमाधिः ता
भ्यां युक्त आत्मा यस्य एवं विमुक्तः सर्वेभ्यो बंधनेभ्यो विमुक्तः मामुपैष्य
सि मत्सायुज्यं प्राप्स्यसीत्यर्थः [illegible]
[illegible] २८

अस्या भावनायाः फलमाह ॥ रामकंठीटीका १४

एवमनेन प्रकारेण यज्ञादिकाः याः क्रियाः प्रवृत्तिरूपा अपि शुभाशुभ
फलैः शुभैः सुखात्मकैः अशुभैर्दुःखात्मकैः क्रियाफलैर्मोक्ष्यसे ता
नि तेन बन्धनाय न कल्पयिष्यंतेऽ इत्यर्थः कीदृशैः कर्मबंधनैः कर्माणि
तानि अस्मात् निबंधनं नियमहेतुर्येषां तथाविधैः कर्मबंधनानि हि
फलानि ज्ञानस्य संबंधेति न यथोक्तज्ञानं सम्यक् त्वमतः स संन्यासयो
गेन फलाः संकल्पसमाधिना युक्तात्मा सम्यग्युक्तस्वभावः अत एव वि
मुक्तः सर्वबंधनेभ्यो विनिर्मुक्तो मामेकं परमकारणमुपैष्यसि अहमे
व संपत्स्यसे इत्यर्थः [illegible]
[illegible] २८

एवमुक्तोपपन्नाय यत्किंचित्कुर्वतो लाभिकी [illegible]टीका १५

यत्फलं तदाह ॥ एवमुक्तप्रकारेण तिष्ठन् सन् कर्मबंधनैः कर्मनिबंधनैरिष्टानिष्टैः फ

लैर्मोक्ष्यसेत्यक्ष्यसे ततःसन्यासयोगेनसर्वशुक्रफलक्षणेनयुक्तः
सम्यक्न्यस्तात्मायस्त्वं ततोविमुक्तोजीवन्नेवमुक्तोमामुपैष्यसि अ
हमेवेश्वरोविश्वात्मासंपत्स्यसे [illegible]
[illegible] २८

पंचोलीटीका

एवंकुर्वतोयत्फलंभवतितदाह शुभाशुभेति एवंसर्वंमयिस-
मर्पणंकुर्वन्शुभाशुभैःफलैःसुखदुःखप्रदैःकर्मलक्षणैःबं-
धनैःमोक्ष्यसेअयंकर्मयोगःमयिकर्मसमर्पणात्संन्यासकर्तृ-
त्वात्योगस्तेनसंन्यासयोगेनयुक्तात्मा ततःकरणैःसन्कर्मबंध-
नैःजीवन्नेवमुक्तःपतितेशरीरेमामुपैष्यसिप्राप्स्यसि २८

रणवीरसमिद्बोधिनी ॥

एवंविधानस्यचफलमाह शुभाशुभेति एवमुक्तेनप्रकारेण
यज्ञादिक्रियाअनुतिष्ठन्निति शेषः त्वंकर्मबंधनैःकर्मनिबंधनैः
शुभाशुभफलैर्मोक्ष्यसेत्यक्तोभविष्यसि तानितेपुनःपुनःस्वर्ग
नरकादिभोगरूपबंधनायनकल्प्यंतेइतिभावः तत्रयुद्धेयत्तस्य
गुरुपित्रादिहिंसयापापफलंदृष्टंतेनसर्वजगत्त्राणाच्छुभफ-
लं एवंदानतपसोरपियथास्वंशुभाशुभफलतास्वयमूह्या
नन्वेतावतानिषिद्धपरिहारएवनतुनित्यादीनामपित्यागस्तदर्थंक-
र्मांतरंदेवतांतराराधनंवावक्ष्यमाणमिष्टंस्यादित्याशंक्याह सं-
न्यासेति संन्यासःकर्मयोगश्चेत्यत्रप्रतिपादितस्वरूपोसंन्यास
योगोताभ्यांयुक्तोवहितआत्माअंतःकरणंयस्यतादृशोतएववि
मुक्तःशुभाशुभकर्मभिस्त्यक्तःसन्मामुपैष्यसिमत्सायुज्यमाप्स्य
सीत्यर्थः २८॥

मधुभाष्य

२८ ॥

118

भाषा अनुवाद

इस प्रकार आचरण करनेसे जो फल होगा सो सुनो कि उक्त
प्रकारसे कर्म्म सकल भगवत समर्प्पण करने से कर्म्मबन्धन
अर्थात् कर्म्म जनित इष्ट अनिष्ट फल प्राप्तिसे बचि रहोगे
और मेरेमे समर्पित जो कर्म्म सन्यास योग उसीसे युक्त चि
त होके तुम हमको निःसन्देह प्राप्त होउगे २८।

दोहा

शुभ अशुभ फलसें छुटहिं तं कर्मबंधसें ज्योंहि संन्यास
योगयुत चित कर मिलहुं मुक्त होय मोहि २८॥

119

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ये भज
न्ति तु मां भक्त्या मयि ते तेषु चाप्यहं २९

शांकरभाष्यटीका १

रागद्वेषवान् तर्हि भगवान् यतो भक्ताननुगृह्णाति नेतरानिति
तन्न समोहमिति समः तुल्योहं सर्वभूतेषु न मे द्वेष्योस्ति न प्रियः
अग्निवदहं दूरस्थानां यथाग्निः शीतं नापनयति समीपमुपसर्प
तामपनयति तथाहं भक्ताननुगृह्णामि नेतरान् ये भजन्ति तु
मामीश्वरं भक्त्या मयि ते स्वभावत एव न मम रागनिमित्तं मयि व
र्त्तन्ते तेषु चाप्यहं स्वभावत एव वर्ते नेतरेषु नैतावता तेषु द्वेषो
मम २९

आनन्दगिरिकृतटीका २

भगवतो रागद्वेषवत्वेनानीश्वरत्वमाशंक्य परिहरति रागेत्यादि
ना तर्हि भगवद्भजनमकिंचित्करमित्याशंक्याह अग्निवदिति
तत् प्रपञ्चयति यथेति भक्तानभक्तांश्चानुगृह्णतोऽननुगृह्णत
श्च भगवतो न कथं रागादिमत्त्वमित्याशंक्याह ये भजन्तीति ये
हि वर्णाश्रमादिधर्म्मैर्म्मां भजन्ति ते तेनैव भजनेनाविनष्टसामर्थ्ये
न परिशुद्धबुद्धयो मयि मत्समीपे वर्त्तन्ते मदभिव्यक्तियोग्यचि
त्ता भवन्ति तु शब्दोस्य विशेषस्य द्योतनार्थः तेषु च समीपे समहं
तेषामहमपि स्वभावतो वर्त्तमानस्तदनुग्रहपरो भवामि यथा व्या
पकमपि सावित्रं तेजः स्वच्छे दर्पणादौ प्रतिफलति तथा पर
मेश्वरोऽवर्जनीयतया भक्तिनिरस्तसमस्तकल्मषसत्वेषु पुरुषेषु
सन्निधत्ते दैवीं प्रकृतिमाश्रितानां भजन्तीत्युक्तत्वादित्यर्थः २९

स्वामिकृतटीका ३

यदि भक्तेभ्य एव मोक्षं ददासि नाभक्तेभ्यस्तर्हि तवापि किं रागद्वे
ने षादिकृतं वैषम्यमस्तीत्याह समोहमिति सर्वेषु भूतेष्वपि अतो मे अहं समः
मम प्रियो द्वेष्यश्च नास्त्येव एवं सत्यपि ये मां भजन्ति ते भक्ता मयि
वर्त्तन्ते अहमपि तेष्वनुग्राहकतया वर्ते अयं भावः यथाग्नेः स्वसे

श्री
गी टी
न

वक्रेषेवतमः शीतादिदुःखमपाकुर्वतोपिनवैषम्यंयथावाकल्पवृ
क्षस्तथैवभक्तपक्षपातिनोपिममनास्त्येववैषम्यं किंतु मद्भक्तेरे
वायंमहिमेति २९

पैशाचभाष्यटीका ४

समोहमिति समस्तुल्यविनयोऽहंवासुदेवः सर्वभूतेषु सर्वप्राणिषु
ममद्वेष्योनास्तीतिप्रकृतेनसंबंधः नप्रियःप्रियोपिनास्तीति येतु
मांभजंतिसेवंतेमामीश्वरंभक्त्याप्रीत्यामयीश्वरेतेनिवसंतिअहम
पितेषुवसामि २९

ममैवंपरमंरूपंस्वभावंजानीहीति

रामानुजभाष्यटीका ५

समोहमिति देवतिर्यङ्मनुष्यस्थावरात्मनावस्थितेषुजातितआकारतः
स्वभावतोज्ञानतश्चात्यन्तोत्कृष्टापकृष्टरूपेणावर्तमानेषुसर्वेषुभूते
षुसमाश्रयणीयत्वेनसमोऽहमनजात्याकारस्वभावज्ञानादिभिरुत्कृ
ष्टापकृष्टत्वेसमाश्रयणेसमानमेवसर्वेषुवस्थितत्वेनसमाश्रितत्व
व्यतिरेकेणजात्यादिभिरयंतोत्कृष्टोयमितिनयुक्ततयासमाश्रय
णेनकश्चित्प्रियोस्तिनसंप्राप्योस्तिअपितत्पर्थमत्प्रियत्वेनभक्तेनवि
नात्मधारणालाभात् मद्भजनैकप्रयोजनायेमांभजंतेतेजात्यादिभि
रुत्कृष्टापकृष्टावामत्समानगुणायथासुखंमय्येववर्तंते अहमपि
तेषुमदुत्कृष्टेष्ववर्ते[illegible]मि २९

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं २९

परमार्थप्रपाटीका ७

नहिभक्तेभ्यएवमोक्षंददासिनाभक्तेभ्यस्तेनतवापिरागद्वेषप्रयुक्तंवै
षम्यंस्यादित्याह समोहमिति अहंसर्वभूतेषुसमःसमस्वभावोस्मिअ
तोमेममद्वेष्यःप्रियोवाकश्चिदपिनास्तिकिंतुयेमांभक्त्याभजंतितेमयि
तथाह्यत्वेनवर्तंते अहमपितेषुअनुग्रहकर्तृत्वेनवर्तामि येतुनभजंतिते
यथावस्थितानपतिवंचंति मयितुरागद्वेषव्यवस्थानास्तीत्यर्थः येयथा
मांप्रपद्यंतेइतिपूर्वमेवोक्तंयथामार्गेस्थितंवृक्षंकेपिफलार्थिनःकेपि
पुष्पार्थिनःकेपिछायार्थिनःआश्रयंते स्वस्वाभिमतंलभंते वृक्षस्तु

नो मयत्रापेक्षोपेक्षा वाकृतिरपि ऋग्वेदे याते धामानि परमाणि
यावमा या मध्यमा विश्वकर्मन्नुतेमा शिक्षा सखिभ्यो हविषि स्वधावः स्वय
जस्व तन्वं वृधान इति भाष्यं भो विश्वकर्मन् विश्वानि सर्वाणि कर्माणि
यदर्थमिति विश्वकर्मा परमेश्वरस्तस्य संबुद्धिः ते तव यानि धामानि परमाण्युत्कृ
ष्टानि धामानि देवशरीराणि तथा यानि अवमानि अपकृष्टानि पश्वादि
शरीराणि तथा यानि मध्यमानि मध्यमानि मनुष्यशरीराणि संति तेषु म
ध्ये सखिभ्यः स्वानुकूलेभ्यः शिक्षा ज्ञानोपदेशं तथा हविषि प्रलयकाले
होतव्ये तेन धामेस्वप्रतिकूले जीवजाते वः युष्माकं स्वधावः स्वस्मिन् प्रियत
शरीरेऽपि ते स्वधा मायायुक्तानमिति स्वयमेव धाममस्ति तं तन्वं शरीरं
वृधानो वर्द्धयानः प्रकटीकुर्वाणः यजस्व भजस्व अत्र ग्राहयस्वेत्यर्थः २९

वनमालीटीका ८

ननु यदि भक्तानेवानुगृह्णासि नाभक्तान् तर्हि वैषम्यात् कथमीश्वर
स्तत्राह सम इति सर्वेषु भूतेषु प्राणिषु समस्तुल्योऽहं सर्वात्माहं सर्वा
तर्यामित्वादुदासीनस्य अतो न मम द्वेषविषयः प्रीतिविषयो वा कश्चि
दस्ति कथं तर्हि भक्ताभक्तयोः फलवैषम्यं तत्राह ये भजंतीति ये भजंते से
वंते मां सर्वकर्मसमर्पणरूपया श्रद्धया भक्त्या अभक्तापेक्षया भक्तस्य वि
शेषद्योतकस्तुशब्दः कीदृशा मयि ते मदर्पितैः निःकामैः कर्मभिः शोधितचि
त्ता निरस्तसमस्तरजस्तमोमलाः उद्रिक्तविशुद्धसत्त्वाः अपरोक्षीकृतज्ञा
नानंदघनमत्स्वरूपा भगवान्वासुदेव एवास्माकं सर्वस्वमिति धीयुक्ते
नाविच्छिन्नप्रेमप्रवाहेनानिशं मयि वर्तते मयीति विचारणामपि स्व
स्वरूपमवधारयमाणाः संतः स्वप्राणादिकं मदीयमर्थमेव धारयंती
त्यर्थः अहमाकाशवदुदासीनोनेकब्रह्मांडसर्जनपालनादिव्यासक्तो
पि निरवधिप्रेमणा मदीयाँस्तेन कदाचिदिमान्विस्मरामीति धिया निशं ते
षु वर्ते तत्र ननु समभावस्य मम नवैषम्यादिकमिति भावः २९

कृष्णवैजयंतीटीका ९

ननु यदि येवाप्सर्वकर्मार्पणेन त्वां भजंति ते तवातिप्रियाः भूत्वा
त्वामेवाप्नुवंति ते ये त्वां न भजंति ते न तवाप्रियाभूत्वा मा प्राप्य संसरंति
तर्हि सर्वात्मनः सर्वनियन्तुः सर्वगुरोः कारुण्यादिगुणसिन्धोस्तवा

श्री
गी टी
न

पिजीवस्येवविषमत्वमायातीतिचेतन्नेत्याह समोहमिति सर्वभूतेषु
सर्वेषुसुरनरतिर्यगादिषुजात्याकृतिस्वभावादिभिर्विषमरूपेषुभूतेषुते
षुतेषुसर्वनियंतासर्वेश्वरस्तत्तत्कर्मानुसारेणतत्पालनादिकुर्वन्
पर्जन्यइवसमः समानोस्मि अतएवमेमतेषुकोपिनद्वेष्योऽहितका
रीत्वात्प्रीतिनभवतिनप्रियः हितकारीत्वात्प्रीतिविषयश्चेवमेवास्ति तथा
पिनशक्ष्योऽस्मदेवोपासकेभ्यः स्वभक्तानांविशेषंसूचयतिमेमद्गुजने
कंप्रयोजनामदनन्यभक्ताममात्मानमतिशयप्रियंसर्वेश्वरंभजंति
श्रवणकीर्तनादिरूपयाभक्त्याऽनुकूलयंतिचकारोऽवधारणेतेऽ
वमत्याणामदनुरागिणोप्येवमय्येवसर्वैश्वर्येएववर्ततेऽहमप्येवतेषु
वभक्तावर्ते इत्यनेनभवतोपिस्वभक्तेषुभक्तिरस्तीतिसूचितम् येय
थामांप्रपद्यंतेतांस्तथैवेत्यादिनोक्तंचैवेव २९

यदिभक्तानेवप्रत्यनुगृह्णासिनाभक्तान् न मधुसूदनीटीका ९० तोरागद्वेषवत्त्वेनकथंपरमेश्वरःस्या
दितिनेत्याह॥ सर्वेषुप्राणिषुसमस्तुल्योहंसद्रूपेणस्फुरणरूपेणानंदरूपेणचस्वाभा
विकेनौपाधिकेनचांतर्यामित्वेन अतोनममद्वेषविषयःप्रीतिविष
योवाकश्चिदस्ति सवितुरिवगगनमंडलव्यापिनः प्रकाशस्यतर्हिक
थंभक्ताभक्तयोःफलवैषम्यंतत्राह येभजंतितुयेतुभजंतिसेवंतेमांस
र्वकर्मसमर्पणरूपयाभक्त्या अभक्तापेक्षयाभक्तानांविशेषद्योतना
र्थस्तुशब्दः कोसौमयितेयेमदर्पितैर्निष्कामैःकर्मभिःशोधितांतःक
रणास्तेनिरस्तसमस्तरजस्तमोमलसत्त्वोद्रेकेणातिस्वच्छस्वांतःकर
णास्सदासदाकारां वृत्तिमुपनिषद्वाक्येनोत्पादयंतोमयिवर्तंते
अहमप्यतिस्वच्छायांतदीयचित्तवृत्तौप्रतिबिंबितस्तेषुवर्ते चकारोऽव
धारणार्थः तएवमयितेष्वेवाहमितिस्वच्छस्यहिद्रव्यस्यायमेवस्वभा
वोयेनसंबध्यतेतदाकारंगृह्णातीति स्वच्छद्रव्यसंबद्धस्यचवस्तुनएष
एवस्वभावोयत्तत्रप्रतिफलतीति तथाचास्वच्छद्रव्यस्यायमेवस्वभावो
यत्संबद्धस्याप्याकारंनगृह्णातीति अस्वच्छद्रव्यसंबद्धस्यचवस्तुन
एषएवस्वभावोयदत्रनप्रतिफलतीति यथाहिसर्वत्रविद्यमानोपि
सवितुःप्रकाशःस्वच्छेदर्पणादावेवाभिव्यज्यते नत्वस्वच्छेघटादौता
वतादर्पणेनरज्यति नवाद्वेष्टिघटादौ एवंसर्वत्रसमोपिस्वच्छभक्तचि

न्नेऽभिव्यज्यमानोऽस्त्वेवाभक्तेष्विते ऽनभिव्यज्यमानोऽहं न रज्यामि
क्वचिन्न द्वेष्मि किंचित् सामग्रीमर्यादया जायमानस्य कार्यस्या
पर्यनुयोज्यत्वात् वह्निवत् कल्पतरुवच्चावैषम्यं व्याख्येयं किंच म
द्भक्तेरेवायं महिमा यत्समेपि वैषम्यमापादयति शृणु तन्महिमानं
२९

सदानंदीटीका ॥

अत्रुट्यत्काशिभक्तांघ्रेमाभक्तोस्त्वं ततः कथं रागद्वेषादिवत्त्वेन सर्वे
मी॰ शोऽतिचेच्छृणु १ सर्वप्राणिषु तुल्योऽहं सच्चिदानंदरूपतः अंतर्या
मितया तद्वत्कर्मकांडस्थैर्यगोचरः २ प्रियो वा मे प्रकाशस्य साविश्वस्ये
वकस्य न कथं फलेलिवैषम्यं स भक्ताभक्तयोस्तदा ३ सेवंते ये तु
मां भक्त्या सर्वकर्मार्पणात्मया चित्तशुद्ध्यात्मबोधेन ते मय्यात्मनि
तिष्ठते ४ स्वभावात्संति तत्रैकाकारद्यत्यातिशुद्ध्या अहमप्यति
शुद्धायां सतो ह्यग्नौ निरंतरं ५ प्रतिबिंबतया तेषु वर्त एव स्वभावतः
यथाग्निर्नापनयति दूरस्थानां तमो न मः ६ शीतं वा तेन तद्वेष्याः
अग्नेः स्वर्द्धिगामिनः शीतं तमोपनयति समीपमुपसर्पतां ७
तेन तेन प्रियात्वस्य तद्वत्कल्पतरोरिव स्वस्वकामानुसारेण विचि
त्रफलदायिनः ८ नत्वेव मम भक्तिभ्यो विचित्रफलदायिनः नैवै
षम्यं न नैर्घृण्यं भवेत्सर्वं समस्य मे २९

नीलकंठीटीका ९

यतो भक्तानेवानुगृह्णाति नेतरानितस्ततो रागद्वेषवान् भगवानि
त्यत आह समोहमिति यथाग्निः रागादिमत्त्वोपि समीपस्थानामेव
शीतं नाशयति न दूरस्थानां तद्वत्सर्वत्र समोप्यहं शरणागतानामे
व बंधं नाशयामि नान्येषामित्यर्थः अतो मम न रागद्वेषाविति भावः
मयि ते तेषु चाप्यहं भक्ता अनन्यशरणतया मय्येव वर्तंते अहमपि
तेष्वेव वर्ते अभक्तविमानो रागाद्याक्रांतत्वेन तत्र मम विशेषतो भि
व्यक्तिर्नास्तीति भावः २९

य एवं त्वां भजंते ते तत एव मे आनंदीटीका १२ संतिनेनतरेइतिस्वस्य रागादिमत्त्वमाशंक्याह
उक्तधर्मात्सर्वेषु भूतेषु चतुर्दशविधेषु अंतर्यामितया समः समव्याप्तिः
अत एव सर्वात्मतया न मे रागद्वेषौ न तु ये मां भक्त्या भजंति ते मयि व

तैतेअहमपितेषुवर्तेनात्ररागद्वेषौकारणंकिंतप्राणिनांकर्मैवक
र्मानुरूपफलदानेनाग्निवदनुगृह्णामीत्यर्थः तदेवंक्रमप्यधिकारि
णांयत्नःसर्वकोब्रह्मप्राप्तयेभजनप्रकारोदर्शितः येषांतुअवैय
नादनमिनाग्न्याधिकारोस्यकर्मसु श्रौतेषुवैयतास्यवेदाध्ययन
वर्जनात् यःस्वाध्यायमधीयीतकुर्यात्कर्मस्वपवतनत् अवैद्यवाद
नच्छूद्रोकर्मभ्यःपर्युदास्यतेइतिनयात् यत्तेषुनाधिकारः तथाच्च
पवर्गेधिकारस्तत्स्त्रीशूद्राणांभवेद्यदि ज्ञानस्वकर्मौद्विजातीनामन
र्थायनतोभवेदितिविचारणायांचतांपिब्रह्मप्राप्तावधिकारःतेषा
मप्यनुग्रहार्थंश्रौतानधिकृतानांनुयावंहितसेवनात् निषिद्धव हि
र्जनात्वापिकथाश्रवणतोविमोःहीनाहीनाःशुभेजन्मपारमार्थ्यण
यद्भवेत् अनुग्रहःसपत्नोसमंअसर्वशाकृतोभवेदितिनयात् सर्वस्त
रनडुर्गाणिसर्वोभद्राणिपश्यतुश्रावयेच्चतुरोवर्णान्कृत्वाब्राह्मण
मग्रतः इत्यादिस्मरणोनच [illegible] २९

ननुकेषांचिद्यज्ञादिक्रियाभिरनुपसे रामकंठीटीका १४ वमानानांबंधनहेतुर्भवानन्येषांतुपत्रा
अनुपहरतांमो तद्हेतुरि ति किं नत्वापिरागद्वेषावनुग्रहः त्वचाह ॥

सर्वभूतेषुचतुर्दशविधप्रपंचप्रसृतेषुपरमार्थतस्त्वेकत्वात्मको
हंसमोनिर्विशेषस्तेषुनिरतोपतितिक्तताभावान्ममेकश्चिद्द्वेष्योद्वेषदो
षहेतुर्नापिप्रियोरागदोषहेतुरस्तंभवति एतौभेददर्शिनामेवानुष
क्तौ ततश्चयेतुनर्महात्मानोमद्दिव्यैवविद्याशाकिसमनुग्रहादेक
त्वदर्शिनः संतोमांयथोक्तस्वरूपंयथोक्तयाभजंतेसेवंतेयथोक्त भक्त्या
भावनयोपासतेतेमयितिष्ठंतितेषुचाहमभेदएवतिष्ठामि मनस्ते
षांतुभेदभेदप्रत्ययसेतुविदलनाद्ब्रह्मामृतसागरसमरसीभूतत्वा
न्मत्स्वेदस्य [illegible] २९

ननुभक्तपक्षपातितया लासिकी [illegible]टीका १५ नचरागद्वेषादिवैषम्यप्रसक्तिरितिशंका
पनोदायतदभावमु
पपादयति ॥

अहमीश्वरोहंतावत्परमितेयःसर्वेषुचतुर्दशविधेषुभूतेषुप्राणिषु
समोनिर्विशेषोःविपर्यस्तः नतस्मभूतेषुतत्वात्तेनयाभवनस्थवि
तम् अथमश्नेषुतवसत्वमसमंजसमित्यत्रहेतुमाह नमेद्वेष्योस्ति
नप्रियः कश्चिदपिसविज्ञसेवगगनमंडलव्यापिनः प्रकाशस्य तः

पक्षान्तरे येन मामीश्वरं भक्त्या प्रीत्या उपासनया परामृशंति ते मय्य
भेदेन वर्तन्ते तेषु चाहमभेदेन वर्ते येषु न भक्त्या मत्स्वरूपविमर्श
हीनास्तेषामात्मतयाहं सन्नपि योजनलक्षान्तरितः यथाग्नेः सेव
केषु तमःशीतादिदुःखमपाकुर्वतोऽपि न वैषम्यम् यथा वा कल्पवृ
क्षस्य तथैव भक्तपक्षपातिनोऽपि मम नास्त्येव वैषम्यम् किं तु भक्त्या
मत्परामर्श एवायं महिमेति [illegible]
[illegible] २९

पंचोलीटीका

तर्हि रागद्वेषवान् भगवान् यतो भक्तान् अनुगृह्णाति नेतरानित्यत आह
समोहमिति अहं सर्वभूतेषु स्वभक्तान्यभक्तेषु समस्तुल्यः मे मम पर
कीयो न द्वेष्यः स्वकीयो न प्रियः यथाग्निरभिमानरहितः समीपस्थप
सर्पतां शीतमपनयति नेतरेषां तथाहं भजतामनुगृह्णामि नेतरान्
तु पुनः ये मां भजंति ते मयि स्वभावत एव वर्तन्ते न मे ममरागनिमित्तेन
अहं स्वभावत एव वर्ते नेतरेषु नात्र मे मम रागद्वेषौ स्तः २९

रसगावीरसमिद्धोधिनी

अथैकेषां बंधनहेतुत्वादितरेषां मोक्षहेतुत्वाच्च भवतो रागद्वेष
दोषवत्त्वेनानीश्वरत्वमेव किंच तव तद्धेवभीष्टसमापितदुःख
स्यभुक्तत्वेन कृतो मां नागा अयेषु पितृश्राद्धादिकं यथेषु प्रदत्तं वि
निष्ठन्ते अत्यज्ञनाभिप्रायमाशंक्याह समोहमिति सर्वभूतेषु
विषयेऽहं समः समदर्शी भवामि न कश्चिन्मम रागद्वेषदोषहेतु
रस्ति तर्हि कथं मामेवं वदसि तादृशव्यापाराभावे च भवत्कृतेः
फलविशेषाभावादकरणीयत्वमेव स्यादित्यज्ञनाभिप्रायमा
शंक्याह ये भजंतीति तथापि विशेषः ये तु मां वह्निमिव सदेक
स्वभावं भक्त्या वर्णाश्रमादिधर्मैर्भजंति ध्यानेन साक्षात् समीपी
भूय सेवंते ते मयि वर्तन्ते मदेकशरणा भवंति मत्सायुज्यमाप्नुवं
तीत्यर्थः अहमपि तेषु वर्ते स्वस्वभावमाविष्करोमीत्यर्थः अयं।

भावः उत्कार्षितुं सिर्यया निकटवर्तित्वात्सेव्यमानानां प्रीतं नि·
वार्यौस्त्यं तनोत्येवं सरागत्वेकस्वभावोहमपि नित्यासत्त्वानां भ·
क्तानेव स्वयामि तदितरांस्तु दुःखात्मकफलककर्मण्याचव·
न उपेक्षे इति २९॥

मधुभाष्य

समोहमिति तर्हि न भक्तिः प्रयोजनमित्यत आह ये भजं-
तीति मयि ते तेषु चाप्यहमिति ममतेव यस्तेषामहं वश
इति उक्तं च पिंगलविलेषु ये तेवै भजंते परमंतु मां संते षां व
शः सन्ततं तत्प्रयाश्चेति तद्धपायवेनसर्वैसवेदा तथापि
बुद्धिपूर्वकापूर्वकत्वेन भेदः उद्धवादिवाल्लिम्नपालादिवश
तद्योक्तं तत्रैव अबुद्धिपूर्वोपावमारूतस्य ध्यानात्तु नर्वपो भ
वते बुद्धिपूर्वमिति न भवत्येव माध्यस्त्ये त्कोडरावावास्त·
याप्यद्भुतप्रलयेन यदि कथंचिद्भवति ततः साधुरेव मंतव्यः
कुतः क्षिप्रं भवति धर्मात्मा देवदेवां प्रादिपेव चेतद्भवति उ
क्तं च प्रांडिल्यप्रारत्वायां नारतोऽस्मु दिनात्वाभक्तो नास्समा
दितुः सम्यग्भक्तो भवेकश्चिद्दष्टदेवमलाश्रयः देवर्षिप
त्तदभावात्स्थ भवंतिहृच्चवतानत इति अतोन्यः कश्चिद्भवति चे
दाभिकत्वेनसोनुमेयः साधारणप्रायानां संसंगान्मद्रत्य
पि भक्तिः कथंचिद्भवति साधारणभक्तिर्वैतरेषां सप्रत्य
ति रूपयातियोर्थन्त्वंनतमयमवेहमवैदिनास्य भक्तिमि
ति दि श्रीविष्णुपुराणे साक्षात्ध्यानस्याविवर्द्धमानाविरक्ति
मन्यत्र करोति विस्मामिति च वेदाव्वयीतायमलोकनाथ
न मंतपोनाश्नतमत्रकृपूर्वं पूजांगुरूणांसततंकरोमि पदस्य
गृह्णंन च भित्रपूर्वं उमानिचवादियथा गमेमप्राज्ञोवमित्र व
समोस्मिनित्य तं चापि देवं सततं प्रपन्नप्रकांतभावेन भजा

स्यजस्वं पतैर्विशेषैः परिशुद्धसत्वः कस्मान्नपश्येषमनंत
मेनमितिमोक्षधर्मे आचारस्थसाधनलोकेश्वज्ञानाभा
वे सम्यग्भक्त्यभावात् तथाहि गौतमः अखिलेषु विनाज्ञा
नेऊतोभक्तिःऊतोभक्तिं विनावततदिति भक्तिः परेशानु
भवोविरक्तिरन्यत्रचैषत्रिकएककालइतिभागवते ५९॥

भाषा अनुवाद

भला जो भक्तों को इसभांति मुक्त करते हो औ अभक्तोंको न
हीं तोक्या तुमारे भी प्रीत विरोध कृत वैषम्य कहे विषम स्व
भावहै इसके उपर अपने भाव का अभाव कहते हैं कि सक
ल भूतमे हम समान रूपसेहैं इसीसे हमारेन कोई प्रिय
और न अप्रिय है और जो हमारी भक्ति करता है सो हमारे
मे वर्त्तमान और मैभी उस पर अनुग्रह करता रहताहूं इ
सका भावार्थ यहहै कि जैसे अग्निके सेवन करने वालेका
अन्धकार औ शीत आदि दुखका निवारणकारी अग्निमे वि
षम भाव नहीं है औरजैसे कल्प वृक्ष अपने सेवक को स
कल पदार्थ देताहै तो इनको प्रिय अप्रिय कोई नहीं परंन्त
फलजोहै सो भक्त ही को है इससे भक्तिही की महिमा य
ह सब जानो २९ ।

दोहा

मैंसमहों सभजीवमें शत्रुमित्र ममनाहि जो मोहि भजहिं
भक्तिसें सो मोमे मैं तामांहि २९॥

अपि चेत्सुदुराचारो भजते मामनन्यभाक् साधुरे
व स मन्तव्यः सम्यग्व्यवसितो हि सः ३०

शांकरभाष्यटीका १

शृणु मद्भक्तेर्माहात्म्यं अपि चेदिति अपि चेत् यद्यपि सुदुराचा
रः सुदुराचारोऽतीवकुत्सिताचारोऽपि भजते मां अनन्यभाक् सन् न अन्यभक्तिः
साधुरेव सम्यग् वृत्त एव स मन्तव्यः ज्ञातव्यः सम्यग् यथावद्व्य
वसितो हि यस्मात् साधुनिश्चयः सः ३०

आनन्दगिरिकृतटीका २

प्रकृतां भगवद्भक्तिं स्तुवन् पापीयसामपि तत्राधिकारोऽस्तीति
सूचयति अपि चेदिति सम्यग्वृत्त एव भगवद्भक्तो ज्ञातव्य इत्यत्र
हेतुमाह सम्यगिति ३०

स्वामिकृतटीका ३

अपि च मद्भक्तेरवितर्क्यः प्रभाव इति दर्शयन्नाह अपि चेदिति अ
त्यन्तदुराचारोऽपि नरो यदि पृथक्त्वेन देवतान्तरभक्तिमकुर्वन् मा
मेव श्रीनारायणं भजते तर्हि साधुः श्रेष्ठ एव स मन्तव्यः यतोऽसौ सम्य
ग्व्यवसितः शोभनमध्यवसायं कृतवान् ३०

पैशाचभाष्यटीका ४

अपि चेदिति सुदुराचारोऽपि मामीश्वरं भजते चेत् अनेन भजतीत्य
नन्यभाक् साधुरेव धार्मिक एव स मन्तव्यः बोधव्यः हि यस्मादयं
सम्यक् शोभनं व्यवसितः निश्चितस्तस्माद्धार्मिक एव स मन्तव्य इत्य
भिप्रायः ३०

रामानुजभाष्यटीका ५

तत्रापि अपीति तत्र तत्र जातिविशेषजातानां यः सदाचार उपादेयोऽपरिहरणी
यश्च तस्मादतिवृत्तिरिक्तोऽमदुक्तप्रकारेण मामनन्यभाक् भजते क
प्रयोजनो भजते चेत् साधुरेव सः वैष्णवाग्र्य एव मन्तव्यः पूर्वोक्तसमग्र
सार्थः कृत एव तस्य सम्यग्व्यवसितो हि सः यतोऽस्य व्यवसायः सुसमीचीनः
भगवान् निखिलजगदाधारभूतः परं ब्रह्म नारायणोऽस्माकं स्वामी मम
गुरुर्मम सुहृन्मम परं भोग्यमिति सर्वैर्दुःप्रयोगो यं व्यवसायस्तेन कृ

श्री
गी टी
न

तः तत्कार्यं वा नस्य प्रयोजनं निरंतरभजनं तस्मास्ति अतः साधुरेव
बहुमंतव्यः अस्यैवं व्यवसायेन कार्ये चोक्तप्रकारभजने देवत्वस्थति
तस्मादाचारच्युतिरिक्तत्वमस्य सत्वैवकल्प्य इति तत्त्वावतानादरणी
य अपितु बहुमंतव्य इत्यर्थः [illegible]
[illegible]
[illegible]

125

अभिनवगुप्तकृतटीका ९

स्पष्टार्थं ३०

परमार्थप्रपाटीका ७

अपिच मद्भक्तेरविनर्कः प्रभाव इत्याह अपिचेति सुतरामत्यंतदुरा
चारोपि सन् चेन्मां भजते किंभूतः अनन्यभाक् मत्तो नाम देवतांतरं
भजतो नत्यापपरिहारसमर्थं मध्यव्यवसायं कृतवान् ३० ससाधुरेवमन्तव्यः ह्रियस्मात्कारणात् ३०

वनमालीटीका ८

किंच मद्भक्तेर्वा यं महिमा यत्समेवैष मममापादयति श्रृणु तन्महिमा
नमित्याह अपिचेदिति यः कश्चित् सुदुराचारोपि चेदजामिलादिरि
व अनन्यदेवं मत्तोन्यन्नोभिलाषं च न भजते तथा च यः सोनन्य
भाक् मदेकशरणः स्वकसमस्तमर्माशिभिन्नकामः मत्कदेवांतर
भजनस्य मां भजते कृतनिश्चिन्नागपोदयास्सेवते स यागसाधुरपि साधु
रेव मंतव्यः हि यतः सम्यग्व्यवसितः साधुनिश्चयवान् सः ३० ३०

कुसुमवैजयन्तीटीका ९

ननु ये त्वां भजंति ते त्वयि वर्तंते तेषु चाहमपि वर्ते इति भवता परं त
यउक्तमक्कुलोत्पन्नो भूत्वा सदाचारहीनः सन् त्वां भजंति स त्वद्भक्तः स्व
प्रियो भवति न वेत्याशंकायामाह अपिचेदिति चेद्यदि वसुदुराचारो
पि शास्त्रविहिताचारहीनोपि अनन्यभाक् सन् देवांतरभजनरहि
तः सन् मां भजते श्रवणकीर्तनादिभिः सेवते स साधुरेव वैष्णव एव
मन्तव्यो बहुमन्तव्यो भवति कुतः एतत् हि य साधुकुलसंगणाः
सम्यक्व्यवसितः सर्वेश्वरः श्रीकृष्णो भगवान् एव मम माता पिता गुरु
र्बंधुर्मित्रं स्वहं स्वामी च सर्वमात्मा यादि प्रियवत्समभवति नान्य इ
ति सम्यग्निश्चयवान् अपि शब्देन यो नन्यभाक् तस्य दुराचार

मतिर्दुर्लभमितियोतितम् ३०

किंच मद्भक्तेरेवायं महिमा यत्सर्वे ॥ मधुसूदनीटीका ॥ १० ॥ पिबेत् सप्रमाया दयति स्थाणुं तन्महिमानं ॥

एवं कश्चित्सुदुराचारोपि चेदजामिलादिरिवानन्यभाक्सन्मां भजते कृतश्चिद्भाग्योदयात्सेवते स प्रागसाधुरपि साधुरेव मन्तव्यः हि यस्मात् सम्यग्व्यवसितः साधुनिश्चयवान् सः [illegible] ३०

सदानन्दीटीका ॥

मद्भक्तेरेव माहात्म्यं यत्समेपि मयीश्वरे आपादयति वैषम्यं स्फुरणं तत्समाहितः १ अतीव कुत्सिताचारोजामिलादिरिवापि सः कृतश्चिद्भाग्यवशात् सेवते मामनन्यभाक् २ स प्रागसाधुरप्येव मन्तव्यः साधुरेव हि साधुनिश्चयवान्यस्मात्सुहृतः सम्यगीश्वरे ३०

नीलकंठीटीका ॥

भक्तेर्माहात्म्यमाह अपि चेदिति अत्यन्तपापिष्ठोपि मां यद्यनन्यचेताः सन् भजते तथापि स साधुरेव मन्तव्यः हि यतः स सम्यग्व्यवसितः सम्यङ्निश्चयः ३०

भगवद्गुणश्रवणमात्रेण भक्ति ॥ आनंदीटीका ॥ ३० ॥ प्रकारेण संगतिं दर्शयति ॥

सुदुराचारोपि दुष्टः सुतरां निन्दित आचारः हिंसादिर्घोरकर्म यस्य सः घोरकर्मानुष्ठानाद्धीनजातिरपि अनन्यभाक् न अन्यत् उक्तादितराद्भजते इति यदेवानेककर्मादिष्टं तदेवानुतिष्ठन् मां भजते पुराणेतिहासादिश्रवणाधिगतयाथात्म्यं परमेश्वरमाराध्यत्वेन जानाति ब्राह्मणादिषु परमेश्वरमूर्तिषु परिचरति च स साधुरेव सदाचार एव मन्तव्यः हि यस्मात् स हीनजातिरप्येवंविधकर्मा सम्यग्व्यवसितः तानाधिगमयोग्यदेहप्राप्त्या एव द्रोणाहस्सम्यक्त्वः दृष्टान्तश्चात्र भारते धर्मव्याधः [illegible] ३०

एवं यथोक्तभावनया भगवद्भक्तेः ॥ रामकंठीटीका ॥ ३० ॥

स्तुतिमाह ॥ यद्यपि पुरुषः अतिपापादितदुष्टपापादिघोरकर्मानुष्ठानात्स्वतरोऽदृष्टचेष्टितः सन्ननन्यभाक् मदेकालम्बनो मां भजते उपास्ते मतान्दृशः

श्री
गी टी
न

126

साधुः सदाचार एव मंतव्यो बोद्धव्यः यतः सम्यगविपर्ययस्तत्तानवा
दयथावस्तत्ता हि भवति भक्तो व्यवसितः गृहीतव्यवसायः एतावदेव
सदाचारदुराचारयोर्लक्षणं येनान्यतया मद्भक्तः स सदाचारस्तद्व्य
तिरिक्तस्तु दुराचार इति एतावदत्र तात्पर्यं अपर्यवसायोऽस्य च स भग
वतः शाक्तिरवतीर्णः कश्चिदपत्रुग्राहे विनष्टं च निर्मूलमखिलं दुरा
चारत्वं (एतदेव भगवत्प्रीतिमाह) ३०

अपि च मन्यरामर्षीहूपस्योपास लासिकी [illegible]टीका १५ नस्याविर्तक्यः प्रभाव इति दर्शयन्नाह ॥

यद्यतिशयेन दुराचारोऽपि कश्चिदनन्यभाक् नान्यं देवतान्तरं मत्प्र
यत्केन भजमानः अथवा न फलविशेषं न भजमानः मामीश्वरं भ
जते उपास्ते तर्हि स साधुरेव सदाचार एव मन्तव्यो बोद्धव्यः यतः सम्य
गविपर्ययस्तनया व्यवसितो गृहीतात्मनिश्चयः अतः स स्वरूपपरिज्ञा
नेऽविनेश्वरविषयोपासनारूपाभक्तिर्दुर्ल्लभा (ननु कथं समीचीनाव्य
वसायमात्रेणासाधुर्बोद्धव्य इत्याह) ३०

पंचोलीटीका

अनन्यभक्तेर्माहात्म्यं दर्शयति अपि चेदिति अपि चेद्यः सुदुरा
चारः अनन्यभाक् मां भजते स साधुरेव मंतव्यः हि यस्मात्सम्यग्व्यव
सितः सम्यक् निश्चयं कृतवान् ३०

रणवीरसिद्धबोधिनी ॥

इदानीं तामेव भक्तिं स्तौति अपि चेदिति यद्यपि लोकदृष्ट्या दुर्वा
दिहिंसाफलकातिचोरब्रह्महादिकर्मानुष्ठानादतिदुराचारः कर्म
योगी देवतान्तराणि परिहाय केवलं मामेव सर्वकारणं भजते व
र्णाश्रमोचितकर्मानुष्ठानेन तोषयति स साधुरेव सदाचार एव
ज्ञेयः तत्र हेतुः हि यतः सः सम्यग्व्यवसितो भवति निश्चयदार्ढ्ये
न स्वकर्मणि नित्योद्युक्तो भवति एतेन वदुराचार सदाचारलक्षण
मपि प्रतिपादितं भवति नित्यं अपि स्ववर्णाश्रमोचितेकर्मणि नि
त्योद्युक्तः सदाचारस्तद्भिन्नो दुराचार इति ३० ॥

भाषा अनुवाद

और अपनी भक्तिका अश्चर्य अचिन्त्य प्रभाव देखोवमैंहैं
कि असन्त दुराचार करै और और देवताभी वासुदेव हो
हैं इस रूप एक बुद्धि होय यद्यपि औरोंकी भक्ति न करके
केवल परमेश्वर स्वरूप मही को भजें है तोभी सो साधु
श्रो श्रेष्ठहै क्यों कि मेरे मे उत्तम निश्चय तो कियाहै ३० ।

दोहा

निश्चय जो सोई दुष्टभी भजें एकमनमोहि साधु समय
जानीय भलिविध दृढ चित सोहि ३० ॥

127

क्षिप्रंभवतिधर्मात्माशश्वच्छान्तिंनिगच्छति कौन्तेयप्रतिजानीहिनमेभक्तःप्रणश्यति ३१

शाङ्करभाष्यटीका १

उत्सृज्य च बाह्यां दुराचारतामन्तः सम्यग्व्यवसायसामर्थ्यात् क्षिप्रमिति क्षिप्रं शीघ्रं भवति धर्म्मात्मा धर्म्मचित्त एव शश्वत् नित्यं शान्तिं चोपशमं निगच्छति प्राप्नोति शृणु परमार्थं कौन्तेय प्रतिजानीहि निश्चितां प्रतिज्ञां कुरु न मे मम भक्तः मयि समर्पितान्तरात्मा मद्भक्तो न प्रणश्यतीति ३१

आनन्दगिरिकृतटीका २

हेत्वर्थमेव प्रपञ्चयति उत्सृज्येति भगवन्तंभजमानस्य कथं दुराचारता परित्यक्ता भवतीत्याशंक्याह क्षिप्रमिति सतिदुराचारे कथं धर्म्मचित्तत्वं तदाह शश्वदिति उपशमोदुराचारादुपरमः किमिति तद्भक्तस्य दुराचारादुपरतिरुच्यते दुराचारोपहतचेतस्तथा किमित्यतोन नंक्ष्यतीत्याशंक्याह शृणुवेति ३१

स्वामिकृतटीका ३

ननुकथंसमीचीनाध्यवसायमात्रेणासाधुर्मन्तव्यः तत्राह क्षिप्रमिति दुराचारोपिमांभजन्शीघ्रंधर्मचित्तोभवति ततश्चशश्वत् शान्तिंपरमेश्वरनिष्ठांशाश्वतीमुपशान्तिंनितरांगच्छतिप्राप्नोति कुतर्ककर्कशवादिनोनैतन्मन्येरन्नितिशंकाव्याकुलमर्जुनंप्रोत्साहयति हेकौन्तेयपटहा[illegible]दिमहाघोषपूर्वकंविवदमानानांसभांगत्वाबाहूमुत्क्षिप्यनिःशंकंप्रतिजानीहिप्रतिज्ञांकुरु कथमीश्वरस्यभक्तोदुराचारोपिनप्रणश्यति अपितुकृतार्थएवभवतीति ततश्चतेनैवत् प्रौढिमविजृंभविध्वंसितकुतर्काः निःसंशयंत्वामेवगुरुत्वेनाश्रयेरन् ३१

पैशाचभाष्यटीका ४

क्षिप्रंशीघ्रंभवतिजायतेधर्मात्माधर्मस्वरूपः शाश्वन्नित्यंशान्तिंमोक्षलक्षणांनिगच्छतिप्राप्नोति ३१

नन्वनाविरतोदुश्चरितान्नाशांतोनासमाहितः नाशांतमानसोवापिप्रज्ञानेनैनमाप्नुयात् इत्यादिश्रु
तेर्दुराचारस्यातिक्रमत्वरभजनोत्पत्तिप्रवाहंविरुणद्धीत्यत आह ॥

रामानुजभाष्यटीका ५

श्री गी टी न क्षिप्रमिति ... प्रियनकारिणानन्यप्रयोजनमद्भजनेनविधूतपापोनि
र्मूलमुन्मूलितरजस्तमोगुणः क्षिप्रंधर्मात्माभवति क्षिप्रमेवएवंरूप
भजनेनशश्वच्छांतिंनिगच्छति आश्वलामत्तनरावर्तिनीमन्यास्ति विरु
द्धाचारनिवृत्तिंचगच्छति कौन्तेयत्वमस्मिन्नर्थेप्रतिज्ञांकुरु मद्भक्तउपक्रां
तविरुद्धाचारमिश्रोपिननश्यति अपितुमद्भक्तिमाहात्म्येनसर्वंविरो तौ
धिजातंनाशयित्वाशाश्वतींविरोधिनिवृत्तिमधिगम्यक्षिप्रंपरिपूर्णो
भवति ३१

अभिनवगुप्तकृतटीका ९ स्पष्टार्थं ३१

[illegible]
[illegible]
[illegible]
[illegible]

परमार्थप्रपाटीका १

अयतदेवस्पष्टयतिकर्मी [illegible] क्षिप्रमि
ति समनंतरमेवक्षिप्रंतत्कालमेवधर्मात्माभवतिअतएवनित्यांशाश्व
शांति तींनिगच्छति तदुक्तं विकर्मयच्चोत्पतितंकथंचिद्धुनोतिसर्वंहृदिसंनि
विष्टइति अत्रार्थेसंदेहानपनोदर्जनेप्रोत्साहयन्नाह नमेभक्तइति मद्भक्तो
मद्भजनशीलतयाविधूतकल्मषः नप्रणश्यतीतिजानीहि प्रतिज्ञांकु
र्वत्रोदाहरणमुत्तरवोभूत् यतोगुरुनिशापेनसर्वयादवकुलसंहारेपि
आसंतिकभक्तियोगमाशंनप्राप्तवान् इत्यर्थः नाशोक्तिपापनाशक्ति
रित्यादिनानाममात्रस्येतादृक्सामर्थ्यंकिंपुनरनन्यभजनस्येतितात्पर्यं
३१

वनमालीटीका ८

चिरकालमधर्मात्मापिमद्भजनमहिम्नाक्षिप्रंशीघ्रमेवधर्मात्माधर्मानु
गतचित्तोभवति दुराचारंतत्क्षणमेवत्यक्त्वासदाचारोभवतिसर्वथा
शश्वच्छांतिंविषयभोगस्पृहानिवृत्तिंनिगच्छतिनितरांप्राप्नोति न
वक्तश्चिन्नन्वः प्रागभ्यस्तंदुराचारंवमेत्यजन्नभवेदपिधर्मात्मातथा

वसनष्टेपदेवेतिशंकामपाकर्तुंभक्तानुकंपापरवशतयाकुपित
इवभगवानाह नैतदाश्चर्यमन्तव्योयतोहेकौंतेय निश्चितमेवहेशंम
द्भक्तेर्माहात्म्यं अतोविप्रतिपन्नानांपुरस्तादपित्वंप्रतिजानीहिसाव
धानंसगर्वंचप्रतिज्ञांकुरुनमेवासुदेवस्यभक्तोतिदुराचारोपिप्रणश्य
तिसंकटमापन्नोपिसुदुर्लभमयोगपःमत्प्रार्थ्यमानोप्यतिमूढोपि
नप्रणश्यतिकिंतुकृतार्थएवभवतीति दृष्टान्ताश्चाजामिलप्रल्हा
दध्रुवगजेंद्रादयः नवासुदेवभक्तानामशुभंविद्यतेक्वचिदितिस्मृतेः
३१ कृष्णमवैजयन्तीटीका ९
नन्वनाविरतोदुश्चरितान्नाशांतोनासमाहितः नाशान्तमानसोवापिप्र
ज्ञानेनैनमाप्नुयादित्यादिश्रुतेराचारहीनंनपुनन्तिवेदाइतिस्मृतेश्च
दुराचारिणोभजनानर्हत्वंश्रूयतेकथंतस्यसाधुत्वमित्यपेक्षायां यस्य
भावेनैवदुराचारीतद्विषयमिदंश्रवणंमदनन्यभक्तस्यतुमद्भजनेनै
वागतंदुराचारत्वंनश्यतीत्यभिप्रायेणाह क्षिप्रंभवतीति शर्वो
कोऽनन्यभाक्मद्भक्तस्सदुराचारोपिमत्स्वरूपगुणश्रवणानुभवहर्षि
कयाश्रवणकीर्तनाद्यात्मिकयामद्भक्त्यानिर्मूलमुन्मूलितरजस्तमो
गुणोमद्भजनमाहात्म्येननिरस्तसमस्तानेकजन्मोद्भवपापोमद्रूप
स्मरणेनविस्मृतदेहगेहादिप्राकृतस्वभावोनुभवोमद्भजनैकप्रयोज
नः क्षिप्रंशीघ्रमेवधर्मात्माधर्मेभगवद्धर्मे आत्मामनोयस्यसतथाभ
वतिपापीभूत्वानित्यसंसारीनभवतिकिन्तुशश्वत्शाश्वतींशांति
मपुनरावृत्तिलक्षणांमुक्तिंनिगच्छतिनिःशेषेणप्रकृतिसंबन्धर
हितत्वेनगच्छतियातिनतुविनाप्रायश्चित्तेन केवलेनभजनेनशुद्ध
साधुत्वंहिमुमुक्षवोनमन्येरन्निति चेन्नतत्रभक्तानुरक्तविवशस्सकोपमि
वाह कौन्तेयेति हेकौन्तेय त्वंयेषांसभांगत्वातत्रोर्ध्वबाहुर्भूत्वामे
सर्वेश्वरस्यभगवतःकृष्णस्यभक्तोनप्रणश्यति चतुर्भुजत्वादिरूपे
णविघ्नेनापिभगवद्विमुखोभूत्वाविपरीताचरणंकृत्वापुनःसंसा
रेनप्रवर्ततीतित्वंप्रतिजानीहिप्रतिज्ञांकुरुकौन्तेयेतिसंबोधनेन
भगवद्भजनेनपापनिवृत्तिर्नस्यात्किंतुप्रायश्चित्तेनैवेतिदुःखली

श्री
गी टी
न

नाममयंनेननवसत्तदशा[illegible]सुकलीनाइनिसूचितं ३।

अस्मादेव सम्यग्व्यवसायात्सहिता **मधुसूदनीटीका ९** दुराचरतां ॥

चिरकालमधर्मात्मापि मद्भजनमहिम्ना क्षिप्रं शीघ्रमेव भवति धर्मा
त्मा धर्मानुगतचित्तः दुराचारत्वं झटित्येव त्यक्त्वा सदाचारो भवतीत्य
र्थः किंच शश्वन्नित्यं शांतिं विषयभोगस्पृहानिवृत्तिं निगच्छति नित
रां प्राप्नोति अतिनिर्वेदात् कश्चित्त्वद्भक्तः प्रागभ्यस्तं दुराचारत्वमत्य
जन्न भवेदपि धर्मात्मा तथा च स नश्येदेवेति नेत्याह भक्तानुकम्पाप
रवशतया कुपित इव भगवानेतदाश्चर्यमर्जुनमाह हे कौंतेय निश्चित
मेवेदृशं मद्भक्तेर्माहात्म्यं अतो विप्रतिपन्नानां पुरस्तादपि त्वं प्रतिजा
नीहि सावज्ञं सगर्वं च प्रतिज्ञां कुरु न मे वासुदेवस्य भक्तोऽतिदुराचा
रोऽपि प्राणसंकटमापन्नोऽपि सुदुर्लभमयोग्यः सन् प्रार्थयमानोऽपि
प्रतिकूलोपशरणोऽपि न प्रणश्यति किंतु कृतार्थ एव भवतीति दृष्टां
तास्त्वाजामिलप्रह्लादध्रुवगजेंद्रादयः प्रसिद्धा एव शास्त्रे च न वा
सुदेवभक्तानामशुभं विद्यते क्वचिदिति [illegible]
[illegible]
[illegible] ३१

सदानन्दीटीका ११

सत्सम्यक्निश्चयात् अस्मान्मत्प्रसादोद्भवो जनः सदुराचारतो हि वान
ष्पाश्चार्जितान्द्यात् मत्सेवनमहिम्नैव शीघ्रं धर्मानुगांतरः भूत्वा
सम्यक् सदाचारः शांतिं चैतस्य नामिकां प्राप्नोति नितरां तत्र मन्वी
षानैनतदद्भुतं मद्भक्तैरीदृशं यस्मान्माहात्म्यं निश्चितं महत् २
अतो विप्रतिपन्नानां त्वं पुरस्तादपि स्वयं सावज्ञं च सगर्वं च प्रति
ज्ञां कुरु सर्वथा ३ मम श्रीवासुदेवस्य भक्तो न नश्यति सदा प्राण
संकटमापन्नो दुराचारोऽपि दुर्लभं ४ वस्तु प्रार्थयमानोऽपि सुदो
षशाणोऽपि सन् न प्रणश्यति किं त्वेष कृतार्थो भवति स्वयं ५
प्रह्लादाजामिलौ मानपादिहस्त्यादयो यथा न वासुदेवभक्तानां
मशुभं विद्यते क्वचित् ६ इत्यादिशास्त्रप्रामाण्यादित्यर्थः श्रीहरे

129

गीता ३१

नीलकंठीटीका १२

सम्यग्व्यवसितत्वादेव हि क्षिप्रंशीघ्रंधर्मात्माभवति शांतिंचशश्वत्
निगच्छतिप्राप्नोति हेकौंतेयएवमेवमदात्तयाप्रतिजानीहिप्रतिज्ञां
कुरुमेममभगवतोहरेर्भक्तोननश्यतीति ३१

एवमर्जुनस्यहिंसात्मकेपियुद्धे आनंदीटीका १२ प्रहृतिस्त्वधर्मोत्पादिष्टं अस्यज्ञानाधिकारायदेहप्राप्तिमेव॥

हीनजातिरप्येवंमांभजन्क्षिप्रंतद्देहपातोत्तरकालमेवधर्मात्माभव
तिपरमेश्वरैकात्म्यज्ञानयोग्यशरीरः ब्राह्मणादिजातिमान्भवति
इत्यर्थः तथाभूतश्चशश्वन्नित्यंशान्तिमपवर्गाख्यांनियच्छतिनिय
तांकरोतिकौंतेयप्रतिजानीहिनिश्चितंजानीहिमद्भक्तोनप्रणश्य
ति अत्रभगवद्भक्त्यादासीपुत्रस्यापिनारदस्यब्रह्मपुत्रकंनिदर्शनं

[illegible] ३१

तदेवप्रकटयितुमाह॥ रामकंठीटीका १४

क्षिप्रमत्रग्रहणसमकालमेवधर्मात्माभवति प्रतिपादितज्ञा
नयोगलक्षणःपरमोधर्मःआत्मास्वभावोयस्यसतादृशःसंपद्यते
तथासंपन्नमात्रःशश्वन्नित्यकालेशांतिंयथोक्तात्मनात्मादितेयव
स्थितानभावलक्षणांतोभमलयद्रूपंप्रशमंयथोक्ततत्त्वसमापत्ति
रूपंनितरांगच्छतिप्राप्नोति नियच्छतीतिपाठेआत्मनितांनियच्छ
तिनियतामव्यभिचारिणींकरोति ततश्चहेकौंतेयत्वंप्रतिज्ञांकरो
षि यथामद्भक्तोयथोक्तरूपेणमदुपासकोनप्रणश्यतिमत्स्वरूप
व्यतिरेकप्रतिपत्तिलक्षणंनाशंनप्राप्नोति [illegible] ३१

ननुकथंसमीचीना लासिकी [illegible]टीका १५ व्यवसायमात्रेणसाधु बोद्धव्यस्तत्राह॥

सदुराचारोपिक्षिप्रमात्मनिश्चयानंतरमेवधर्मात्माधर्मचित्तोभ
वति तथाशश्वच्छांतिंपरमेश्वरनिष्ठारूपंतोभोपशमंनिगच्छति
प्राप्नोति कृततर्ककर्कशवादिनोनैतन्मन्येरन्नितिशंकाव्याकुल
मर्जुनंप्रोत्साहयति हेकौंतेयपटहादिमहाघोषपूर्वंविवदमाना
नांसभांगत्वा बाहुमुत्क्षिप्यनिःशंकंप्रतिजानीहि प्रतिज्ञांकुरुक
थंममेश्वरस्यभक्तोयथोक्तेनन्यायेनमदुपासकः सुदुराचारो
पिनप्रणश्यति अधोगतिंनाप्नोति अपितुकृतार्थएवभवति

श्री
गी टी
न
130

नकेवलंदुराचारएवमद्भक्तामोक्षमाप्नोति (शपित) ३१

पंचोलीटीका

ननुकथंसमीचीनव्यवसायमात्रेणदुराचारःसाधुर्भवतितत्रा
ह क्षिप्रमितिक्षिप्रंशीघ्रंधर्मात्माधर्मचित्तोभवतिशश्वन्नित्यं
शांतिमुपशमंनिगच्छतिहेकौंतेयप्रतिजानीहिप्रतिज्ञांकुरुप
तत् परंतत्वंस्तुएवमद्भक्तःमयिसमर्पितात्मानप्रणश्यतिनाशं
नप्राप्नोति ३१

भगवीरससिद्धोधिनी

अतएवसः क्षिप्रमिति क्षिप्रंशुद्धाचरणसमकालमेवधर्मा
त्मा धर्मोधर्मसंस्थापनाहमेवस्वरूपएवात्मायत्नोयस्यसतादृ
शोभवति शश्वच्छांतिंविनाशरहितसुखलक्षणांमत्सायुज्यं
चनिगच्छति नितरांप्राप्नोति अतएवहेकौंतेय नेत्वमस्मद्प्र
तिजाने प्रतिज्ञांकरोमि त्वमात्मयसंस्थित्यर्थमन्यथाभवेन्नानि
श्चयवद्वाकरस्मवदामि कथं मे ममभक्तोवर्णाश्रमविभक्तेन
कर्मणोपासीनोजनोनप्रणश्यति अधोगतिलक्षणंप्रणाशं
नाप्नोति ३१॥

मधुभाष्य

३१॥

भाषा अनुवाद

ऐसा मनुष्य किस प्रकार उत्तम है इस शङ्का पर कहते हैं कि अत्यन्त दुराचारीभी हमारी भक्ति करके स्वधर्म्म चित्त होवे है अर्थात् चित्तकी तरङ्ग निवृत्त होय परमेश्वर से निष्ठा अवश्य पावताहै औ तर्त धर्म्मात्मा होता और शान्तिको प्राप्त होताहै पर इस बातको कुतर्ककर्कशवादी लोग नमानेंगे इस शङ्कामें व्याकुल अर्जुनको भगवान उत्साह देतेहैं कि हे कौंतेय नगारा बजाय विवादकारी लोगों की सभामें जाय हाथ उठाय तुम निःशङ्क हो यह प्रतिज्ञा करोकि परमेश्वरके भक्त अति दुराचार होने से भी नष्ट नहीं होय क्रतार्थ होतेहैं ऐसी प्रतिज्ञा करने पर तुमारी जय और वेनष्ट कुतर्क होय तुमको गुरु कर मानेंगे सोतुम यह जानो कि मेरे भक्तका नाश नहीं है ३१

दोहा

धर्मात्मा होयसिद्धहि शांति अखंड कों पाहि यों कौंतेय तुं
जानममभक्तहुं नाशों नाहि ३१॥

(3)

मांहिपार्थव्यपाश्रित्य येपिस्युःपापयोनयः स्त्रियो
वैश्यास्तथाशूद्रा स्तेऽपियान्तिपरांगतिं ३२

शांकरभाष्यटीका १

किंच मांहीति मांहि यस्मात् पार्थ व्यपाश्रित्य मामाश्रित्याश्रय
त्वेन गृहीत्वा येपि स्युर्भवेयुः पापयोनयः पापानि योनिः तेषां
ते पापजन्मानः केत इत्याह स्त्रियो वैश्यास्तथा शूद्रास्तेपि या
न्ति गच्छन्ति परांगतिं प्रकृष्टांगतिं ३२

आनन्दगिरिकृतटीका २

इतश्च भगवद्भक्तिर्विधातव्येत्याह किंचेति न मे भक्तः प्रणश्यती
त्यत्र हेतुमाचक्षाणो भक्त्यधिकारे जातिनियमो नास्तीत्याह मां
हीति ३२

स्वामिकृतटीका ३

आचारभ्रष्टंमद्भक्तिः पवित्रीकरोतीति किमत्र चित्रंयतो भक्तिर्दुःकु
लानप्यनधिकारिणोपि संसारान्मोचयतीत्याह मांहीति येपि
पापयोनयः स्युः निकृष्टजन्मानः अंत्यजादयोभवेयुः येपिवैश्याः
केवलंकृष्यादिनिरताः स्त्रियः शूद्रादयश्चाध्ययनादिरहिता मांव्यपा
श्रित्य संसेव्य परांगतिंयांतिहिनिश्चितं ३२

पैशाचभाष्यटीका ४

ह्रियस्मात्पार्थव्यपाश्रित्ययेपिस्युः भवेयुः पापयोनयः पापिष्ठजन्मा
नः भक्ताईश्वरंप्रपन्नास्तुतेपिः परांगतिंयांतीति [illegible]
[illegible]
मात्रवं[illegible]भाग्नोदेवं ३२

रामानुजभाष्यटीका ५

मामिति स्त्रियोवैश्याश्च शूद्राश्च पापयोनयोमांव्यपाश्रित्यममगतिं
यांति ३२

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ३२

श्री
गी टी
न

अथ न हि मद्भक्तिः कालान्तराण्यपेक्षत इति प्रतीतिमुत्पादयन्नाह
मामिति भो पार्थ हीति निश्चयेन मां व्यपाश्रित्य अनन्यतया मदाश्रयं
प्राप्य ये पापयोनयः स्युः पापाधिकारिणो योनिर्जन्म निर्घोषोऽनेन तथावि
धास्तेऽपि परां गतिं यान्ति अत्रार्थे प्रत्ययमुत्पादयति स्त्रिय इति अन्यत्र
132 सं४ साहं मायाम्नूर्वेवमति लभ्यते न स्त्र्यादि निसर्गदोषोपहता स्त्रियो गोपिका
स्तयापि जारबुद्ध्यासंगतास्तथा वैश्यः कृष्यादिना गोरक्षाकर्तारो नं
दगोपप्रभृतयोस्तथाङ्ग शूद्रास्तत्परिचारकास्तेऽपि मदाश्रयेण परां ग
तिं यान्तीति वस्तु महिमा तावल्लौकिक इति पूर्वमेव संदर्शितं तदुक्तं स
र्वोऽश्रमाप्यश्रमसाध्यमिति श्रुतिरपि तेन तरीयके वामदेव यजमानाश्च
वयं विश्वावसो निदधिरे वार्याणि त्वया सह द्रविणमिच्छमानाः व्र
जं गोमन्तमुशिजो विववुरिति भाष्यं भो अग्ने वैश्वानर विश्वरूपवि
श्ववैश्वानरो विराडिति परिभाषोक्तेः त्वां प्रवृत्तं प्रतिदेवतान् यज
मानाय जमाना यजन्तः इज्यन्तः वार्याणि वारयितुं योग्यानि अप्रदेयान्य
पि विश्वावि विश्वानि सर्वाणि वसूनि धनानि निदधिरे अर्पितवन्तः यत उशि
जो मेधाविनो मोक्षार्थिनः वसतिमपेक्षमाणा वा गोमन्तं गोधनप्रचुरं
व्रजं गोकुलाख्यं योषं विववुः वरयां चक्रुः किमिह दिश प त्वया सह त्वत्सं भू४
निधानेन गोपिकारूपेण द्रविणं विषयभोगं इच्छमानाः अपेक्षमाणा
स्तावन्नैव कृतार्था इत्यर्थः ऋग्वेदेऽपि तां वां वास्तून्युश्मसि गमध्यै यत्र
गावो भूरिशृंगा अयासः अत्राह तदुरुगायस्य वृष्णः परमं पदमवभाति
भूरि भाष्यं वां युवयोरुश्मसि इच्छामस्ताते तानि वास्तूनि गृहा
णि गमध्यैर्गन्तुं प्राप्तुं अयासः गन्तारः तानि कानि यत्र येषु गृहेषु भूरिशृंगाः
भूरीणि शृंगाणि वा दिक्षु विशेषणानि गोपालवेषाणां तानि गावः गोरूपे
णि सन्तीत्यर्थः गावः सन्ति शृंगाश्च पलक्षणं तेन महाप्रमाणा महो
क्षा इत्यर्थः यत्र अहे तद्व्यपमेव कारार्थे प्रयतते वग्गहेषु तदुरु
गायस्य उरुभिर्वेदैर्गीयमानस्य विश्रेलोकेरिति महत्वं सत्कलमप्राकिम त
परमं पदं पारमार्थिकस्वरूपं वृष्णः यादवो स्तोतिविवेदरूप अनतरत्यर्थः साम
संहितास्वपि प्रयोज्यजनको तिभिः सम्बोधाभिस्वतिवाजकर्मभिः

यस्मात्वं मय्युमाविशेतिभावः भोऽत्रैवविश्वरूपसत्कृतचत्वंवोतिभि
स्तवरत्नैः कृत्वा संसारं प्रतरति किंभूताभिरुतिभिः स्वनरांशका
भिः स्मृतएववाजकर्मभिः वाजस्यवलस्यकर्मभिः कारणरूपाभिः
गुहत्वेनकृत्वा सकलविघ्नशून्यपदंयस्मात्सुमर्थः सकः उरुरुवः
यस्मात्वं सत्यस्माविषयसत्वेप्राप्तोसि अत्रार्थैरैवतंसामापिरेवतीर्न
सधमादं रेरे संततविवाजाः त्वमंतोयाभिर्मदेमेति भाष्यं रंदे
परमात्मनिभगवतिसधमादेऽस्माभिः सहहर्षयुक्तेसतित्वमंतो
नयंतमारयंतोवयंयाभिर्गोभिर्मदेमहृष्येम ताः गावैरेवतीः ती
रायाज्यादिधनवंत्यस्तुविवाजाः प्रभूतबलाश्वसंत पतस्मगानंसा
मदर्पणे रेवतीशब्दजातं ग्रयाहावामार्गाः पतास्मज्ञानकर्षणे
निषद्त्वमतइतिनकाहलोपः इहजोहोहोइडाएतएवलोभाः ष
टू [illegible] ३२

वनमालीटीका ८

एवमागंतुकदोषेणदुष्टानांभगवद्भक्तिप्रभावानिरूप्यःकास्वा
भाविकदोषेणदुष्टानामपित्याह मांहीति हिनिश्चितं हेपार्थमां
व्यपाश्रित्यशरणमागत्य येपापयोनयोंत्यजादयः स्वाभाविकदो
षदुष्टाः वेदाध्ययनशून्यतया स्त्रियोवैश्याः कृष्यादिमात्ररताः तथा
शूद्राः जात्याध्ययनाद्यभावतोपि परमगत्यायोग्याः स्तेपियांति
परांगतिं अपिशब्दात्स्मादुक्तादुराचारा अपि ३२

कुसुमवैजयन्तीटीका ९

ननुयद्यागंतुकपापीसतत्कुजनेनधर्मात्माभूत्वासंसारान्मुच्यतेइति
भवतुकिंतुयेपरंपरयापापकुलोत्पन्नामहापापिनस्त्वांभजंतितेपुनरेवं
नैवेतिचेत्तत्राह मांहिपार्थेतिहेपार्थयेपिपापयोनयःपापमेवयो
निःकारणंयेषांतेतथा अनेकजन्मोपार्जितपापपुंजानांशा
स्त्राचार्यरहितानांधर्माधर्मविवेकहीनानांहिंसादिधर्मरतानांअ
शुचाराणांम्लेच्छान्त्यजातीनांकुलेउत्पन्नाःस्युस्तेपिहीतिनिश्चयेन
मांसर्वेश्वरंसर्वशरण्यंकरुणावरुणालयंपुरुषोत्तमंव्यपाश्रित्या
श्रितानिर्हैतुकदयाकारुण्यादिगुणवतोपरंकुः [illegible] सहितस्तन्नाम

इमामांश्रुत्वेनिर्वर्तितस्तथासममत्स्तश्रणागतानाममाहात्म्यश्रवणो
न्मत्स्वशरणंप्राप्येत्यर्थः परांमद्भक्तिप्रभावेणयोगिदुर्लभांगतिंमत्सा
म्यंयांतिप्राप्नुवंति तथाह्निस्त्रियोपि आभीरीशबर्यादयस्तथावैश्या
स्तुलाधारादयस्तथाशूद्राःतेनवाशूद्रदामादयःस्मादयोऽप्येपियेवे
दाध्ययनादिहीनाःवेदविहिताचारभ्रष्टास्तेपिमद्भजनमाहात्म्येन
परांगतिंयान्ति ३२

एवमागंतुकदोषेणदुष्टानांभगवद्भक्तिप्रभावान्निस्तारमुक्त्वास्वाभाविकदो
षेणदुष्टानामपितमाह ॥

मधुसूदनीटीका ९

हि निश्चितंहेपार्थमांव्यपाश्रित्यशरणमागत्ययेपिस्युःपापयोनयो
ऽन्त्यजाः तिर्यंचोवाजात्यादिदोषेणदुष्टाः तथावेदाध्ययनादिशून्य
तयानिकृष्टाःस्त्रियोवैश्याःकृष्यादिमात्ररताः तथाशूद्राजातितो
ध्ययनाद्यभावेनचपरमगत्ययोग्यास्तेपियांतिपरांगतिं अपिश
ब्दात् प्रागुक्तदुराचाराअपि एवंचेत् ३२

सदानंदीटीका ९

एवमागंतुकैर्दोषैर्दुष्टानामपिसत्तेः भगवद्भक्तिमाहात्म्यान्निस्ता
रमभिधायच १ इदानींजातिदोषेणदुष्टानामपिकथ्यते येमांशर
णमागत्यतिर्यंचोवांत्यजाजनाः २ तथास्त्रियोपिनिकृष्टावैश्याःकृ
ष्यादितत्पराः शूद्राश्चजातितोवेदाध्ययनादेरभावतः ३ मोक्षायो
ग्यास्तएतेपिसर्वेयांतिपरांगतिं यस्यांघ्रिमाश्रितवतांभवपाशहा
निर्यस्यांघ्रिपद्मविभवाजनिमत्स्यभाजः यन्नामसंशोधकमनंतभवो
त्थवानांपापीयसामपिसमेशरणंमुकुंदः ३२

नीलकंठीटीका ९

किंच हेपार्थहियस्तिइमांव्यपाश्रित्यश्राश्रित्ययेस्युस्तेपापयोनयः
स्त्र्यादयस्तेपिपरांगतिंयांति ३२

एतदुपसंहरति ॥

आनंदीटीका ९

हि निश्चयेतेपापयोनयोपिमांव्यपाश्रित्यपरांगतिंयांतीत्यन्वयः ३२

[illegible]

[illegible]

[illegible] ३२

रामकंठीटीका ५४

श्रुतपवाह ॥

पापाः पापकर्मविपाकजा योनिर्येषां ते स्त्रीशूद्रवैश्यादयो ये
पि केचन भवेयुस्तेपि मां व्यपाश्रित्य यथोक्तमच्छरणाः श्रवा परामत्तमां
गतिमपुनरावृत्तिपदवीमाप्नुवंति नचैतदतिशयोक्तिमात्रमेवेति
व्याख्यातं प्राक् [illegible]

[illegible] ३२

लासिकी [illegible]टीका १५

श्रपित्- हि प्रसिद्धो प्रसिद्धमेतदित्यर्थः हे पार्थ मामीश्वरं भक्त्या श्रित्य येपि पापयो
नयः पापापापकर्मविपाकजा परहिंसादिपरा वा योनिर्जन्म येषां ते
पशुपक्षिसरीसृपान्त्यजादयोपि स्युर्भवेयुः तथा स्त्रियश्च स्वताः वैश्याः
कृष्यादिलग्नकर्मरताः शूद्राः कार्त्स्न्येन वैदिककर्मानधिकृताः परं तत्त्व
भूतमयमतेपपुनरावृत्तिपदवीं यान्ति प्राप्नुवंति अत्र गजेंद्रमोक्षणा
दीनि चरितानि परमकारुणिकस्य भगवतः संवादकानि श्रूयन्ते

[illegible] ३२

पंचोलीटीका

मद्भक्तिः पवित्रीकरोति इत्यत्र किं विजयतो मद्भक्तिः दुःष्कुलानपि
अनधिकारिणोपि संसारात् मोचयतीत्याह मांहीति हियस्मात्
हे पार्थ येपि स्त्रियः वैश्यास्तथा शूद्राः पापयोनयः पापात्मानः स्युः
तेपि मां व्यपाश्रित्य मां आधारं गृहीत्वा परां प्रकृष्टां गतिं यांति ३२

रणवीरसमिद्धोधिनी ॥

ततएव च मांहीति हिः प्रसिद्धो सर्वप्राप्त प्रसिद्धमेतदित्यर्थः पाप
योनयः पापकर्मविपाकेन दुष्टेन नातादप्रीमेव पापयोनिं प्राप्ता
येपि केचन स्त्रीवैश्यशूद्रादयो मां परमेश्वरं व्यपाश्रित्य मदेकशर

णाभूत्वेति यावत् स्युर्भवेयुः स्वयमभूते बुद्धादौ मज्जाद इति शेषः
ते ऽपि परां सर्वोत्कृष्टां गतिं मत्सायुज्यलक्षणां यांति ३२॥
मधुभाष्य
३२॥

भाषा अनुवाद

अत्यन्ताचार भ्रष्टों को भी जो मेरी भक्ति पवित्र करतीहै इसमे क्या आश्चर्य है क्यों कि देखो मेरी भक्ति अनधिकारियों को भी संसार सेमुक्त करतीहै तो दुराचारी की मुक्तिमे क्या संदेह है कोई कहतेहैं कि कोई निकृष्ट जन्म चाण्डाल आदि कौन होय और स्त्री स्त्री मेभी वेश्या क्यों न होय वेश्या ही को वैश्य कहते स्वार्थमे ष्यण प्रत्यय करनेसे वैश्य होताहै और शूद्र ये भी हमारी भजन [illegible]करि उत्तम गतिको प्राप्त होते हैं यह निश्चय जानो जो कोई वैश्यका अर्थ वणिक जाति पर लगाते उनकी भूल कितनी बडीहै कि वेद ब्रह्मके अधिकारी तथा संध्या उपासना कर्म के अधिकारी तथा यज्ञ उपवीत धारी द्विजाति शब्दसे प्रसिद्ध वैश्य जो अनधिकारी हैं तो तो ब्राह्मण क्षत्री भी तैसे हीहैं मनमाना अर्थ करो वेद शास्त्र का करताहै ३२ ।

दोहा

हेपार्थ मम शरणाहोय पापयोनिजोकोय नारीवैश्य अ
रुशूद्रहू जान परम गति सोय ३२॥

135

किंपुनर्ब्राह्मणाःपुण्या भक्ताराजर्षयस्तथा अनि
त्यमसुखंलोक मिमंप्राप्य भजस्वमां ३३

शांकरभाष्यटीका १

किंपुनरिति किंपुनर्ब्राह्मणाःपुण्याःपुण्ययोनयः भक्ताराजर्षय
स्तथा राजानश्च ते ऋषयश्चेति राजर्षयः यत एवं अतोऽनित्यं क्ष
णभंगुरमसुखं च सुखवर्जितं मनुष्यलोकं प्राप्य पुरुषार्थसाधनं
दुर्लभं मनुष्यत्वं लब्ध्वा भजस्व सेवस्व मां ३३

आनंदगिरिकृतटीका २

यदि पापयोनिः पापाचारश्च तद्भक्त्या परां गतिं गच्छति तर्हि
पनि किमुत्तमजातिमित्तेन संन्यासादिना किम्वा सद्वृत्तेनेत्याशंक्याह
किंपुनरिति उत्तमजातिमतां ब्राह्मणादीनामतिशयेन परा ग
तिर्यतो लभ्यते अतो भगवद्भजनं तैः एकान्तेन विधातव्यमित्याह
यत इति मनुष्यदेहातिरिक्तेषु पश्वादिदेहेषु भगवद्भजनयोग्यता
भावात् प्राप्ते मनुष्यत्वे तद्भजने प्रयतितव्यं इत्याह दुर्लभमिति ३३

स्वामिकृतटीका ३

यद्येवं तदा सत्कुलाः सदाचाराश्च मद्भक्ताः परां गतिं यान्तीति किं वक्त
व्यमित्याह किमिति पुण्याः सुकृतिनो ब्राह्मणास्तथा राजानश्च ते
ऋषयश्च क्षत्रिया एवंभूतां परां गतिं यान्तीति किं वक्तव्यं अतस्त्वमिमं
राजर्षिरूपं लोकं देहं प्राप्य लब्ध्वा मां भजस्व किं चानित्यमध्रुवं सुखर
हितं च लोकं देहं प्राप्यानित्यत्वादविलंबमकुर्वन् असुखत्वाच्च सुखार्थो
द्यमं हित्वा मामेव भजस्वेत्यर्थः ३३

पैशाचभाष्यटीका ४ अत्र किं पुनर्वक्तव्यमित्यभिप्रायः तस्मा
[illegible] सुखरहितं लोकं पुरुषार्थसाधनमिमं मानुष्यं प्राप्याधिगम्य भजस्व सेवस्व मामीश्वरम् ३३

रामानुजभाष्यटीका ५

किंपुनः पुण्ययोनयो ब्राह्मणा राजर्षयश्च भक्तिमाश्रिताः अतस्त्वमनित्य
मस्थिरं तापत्रयाभिहततया असुखमिमं लोकं प्राप्य मां भजस्व स्वधर्मे
वर्तमानो मां भजस्व ३३

श्री
गी टी
न

136

अभिनवगुप्तकृतटीका ९
स्पष्टार्थं ३३
सत्येवं सत्कुलाचारवंतः किंतु परमार्थप्रपाटीटीका ७

नरित्याह किं पुनरिति ब्राह्मणा वेदविदः पुण्याः सदाचारवंतः तथापि भक्ताम
द्भजनशीलाः तथा राजानश्च ते अवश्यमनुजनकाद्याः इत्थं वा राजा
नो गुरुवश्चेति परां गतिं यांतीति किं चित्रं एवं त्वमपि राजर्षिरसि अतो
मां भजस्वेत्यर्थः तदुक्तं बोधसुधाकरे अपगतमोहमयमोजासा रूपे
व॰ णासंपदानंदा स्वच्छोऽस्वच्छो वेत्यंतवेति भगवानत्रमहावसरे ८
श्रंतस्य भावमोक्षायतेतंतरा न्मायथा महामेरुः खदिरश्चंपक इति वाप्र
वर्षणो किं विचारयतीति श्रुतिरपि यानतपत्यो तद्यो यो देवानां प्रत्यबु
ध्यत स एव तदभवत् तथा ऋषीणां तथा मनुष्याणामिति भाष्यं तदा
त्मानमेववेत्तदेवानां मध्ये यो यः प्रत्यबुध्यत तात्तवान् स एव तदभवत्
व्या॰ ब्रह्मरूपो भवत् तथैव ऋषीणां मनुष्याणां च तथा चान्य प्राप्तो तजात्या
दितारतम्यमित्यर्थः अकस्माद्वोयामपि सर्वे नंदंति यशसागतेन सभा
साहेन सख्यो सख्योयरति राघवभाष्यं तत्तस्य प्रतिमाश्चस्ति तस्य नाम
महद्यशः इति श्रुतेर्यशसा परमात्मना आगतेन प्राप्तेन सर्वे देहिनो नं
दंति परमानंदात्मना भवंति किं भूतेन सभासाहेन सभा मिं द्रियसभां लो
कि कव्यवहारं वा सहते ताक्रमते तथा विधेन पुनः किं भूतेन सख्या उपका
रकेण किं भूताः सर्वे सखायः सर्व भूत सुहृत्समाः तथा च सर्व भूत सुहृत्त्वम
त्वमेवाल्पश्राम निरानंदं ततम मा यमन्वमिति राघवभाष्यं अध्यात्मा
नपतां श्रुतिमापिदे विकथ्य त्याख्याकरोति इत्थं वेमा मोराजेत्यादिना
अथ प्रकृतमनुसरामः अस्मिन्नर्थे मा विलंबं कुर्वित्याह अनित्यमिति
इमम नित्यं क्षणभंगुरं असुखं दुःखैकनिदानं लोकं मर्त्यलोकं मनुष्यदेहं
प्राप्य मां परमात्मानं भजस्व नित्यं मदनुसंधानमेव मद्भजनं अत्र विलंबो
मास्त्विति तात्पर्यादिपदानि अतो ऽग्रे ऽःधर्मयो निष्प्रासो किं चिद्विषीतत
र्थः श्रुतिरपि सामसंहितायां श्रावो राजानमध्वरस्य रुद्रं होतारं सत्ययजं रो
दस्योः अग्निं पुरा तनयित्नोरचित्ता हिरण्यरूपमवसे कृणुध्वमिति भाष्यं १

मोयजमानाः अविनाशेवैन्द्रियोपरमरूपात् मरणानन्तरयितैर्लोक
स्मिकाशानिरूपात् अगाधैर्वजीवदशायामेव अग्रिमप्रकाशमानं हिर
ण्यरूपं हिरण्यगर्भमीश्वरं राजानं स्वामिनं क्षणार्धं कुरुध्वं किमर्थं अवस
रत्तणार्थमरणोजाने सतिपश्चात् किमपिचलतीत्यर्थः अथतस्य स्वा
मिनेकोतिशयइत्याह किंभूतं रोदस्योर्मायाविलासरूपयोर्द्यावा
पृथिव्योर्हर्त्तारं होमकर्त्तारं परमाविश्याभुवनानिज्ञकृतितिश्रुतेः अत
एवकर्द्दकर्मं अथनकेवलं कुरं सत्ययुजं सत्यस्यानेरूपस्य संगमयित
रं तथा अष्टरस्येतिषष्ठ्या द्वितीयार्थो विगम्यते तथाचस्वधामैक्यकृत
यायागयत्नुष्ठानेनरूपं ब्रावःरत्तितवान् ३२

वनमालीटीका ८

पुण्यासदाचाराउत्तमयोनयश्चब्राह्मणास्तथाराजर्षयःसत्वमहष्ट
यः क्षत्रियाममभक्ताःपरांगतिंयांतिकिंपुनरत्रवक्तव्यंकस्यचिदत्रसं
देहोनास्तीत्यर्थः यतोमद्भक्तेरीदृशोमहामहिमाअतोमहाप्रयत्नेने
मंलोकंसर्वपुरुषार्थसाधनयोग्यमतिदुर्लभंचमनुष्यदेहमनित्य
माशुविनाशिनमसत्वंगर्भवासाद्यनेकदुःखबहुलंलब्ध्वायावदयं
ननश्यतितावदतिशीघ्रमेवमांभजस्वशरणमाश्रयस्व अनित्यत्वा
दस्यविलंबोनास्य विलंबंसालोर्थसुखंचमाकार्षीस्त्वंवराजर्षिरतो
मद्भजनेनात्मानंसफलंकुरु अन्यथाह्येतादृशंजन्मव्यर्थमेवेतिभावः
३३

कुसुमवैजयन्तीटीका ९

यद्येतेपापयोनयोपिमद्भक्त्यामोयान्तितर्हिंवर्णाश्रमस्थाद्विजातयोया
न्तीतिकिमुवक्तव्यमित्याह किंपुनरिति ब्राह्मणावेदविदस्तत्रापि
पुण्यासदाचारवन्तस्तत्रापिभक्ताःमद्भक्तिमंतस्तथातेनप्रकारेणरा
जर्षयःपुण्यवंशोद्भवाः क्षत्रियामद्भजनेनपरांगतिंयान्तीतिपुनःकिं
वाच्यमत्रसंशयगंधलेशोपिनास्तियस्मादेवंतस्मात्त्वमपिराजर्षिःसदा
चारकुशलोमद्भक्तश्चासि अतोनित्यंकर्मदेहत्वेनपरिणामित्वभाव
नात्मैकरसाभावंअसत्त्वमीक्षस्ववाक्यदेलोकंमनुष्यलोकमिमंदे
हंभारतवर्षंप्राप्यास्मिन् राज्यसुखभोगाद्यभिलाषं त्यक्त्वानित्यानं
दरूपंसर्वशरण्यंदयासिंधुंमांभजस्वमयिभक्तिंकुर्वामांप्राप्स्यसि

श्री
गी टी
न

137

अनित्यमित्यनेन जगतो मिथ्यात्वं निरस्यते ३२

मधुसूदनीटीका ९

पवंचेत् पुण्याः सदाचारा उत्तमयोनयश्च ब्राह्मणास्तथा राजर्षयः सत्त्ववत्त्व
विवेकिनः क्षत्रिया मम भक्ताः परां गतिं यान्तीति किं पुनर्वाच्यमत्र क
स्यचित्संदेहाभावादित्यर्थः यतो मद्भक्तेरीदृशो महिमा अतो मह
ता प्रयत्नेन इमं लोकं सर्वपुरुषार्थसाधनयोग्यमतिदुर्लभं च मनुष्य
देहमनित्यमाशुविनाशिनमसुखं गर्भवासाद्यनेकदुःखबहुलं लब्ध्वा
यावदयं न नश्यति तावदतिशीघ्रमेव भजस्व मां शरणमाश्रयस्व अ
नित्यत्वादस्य विनाशस्य विलंबसहत्वाभावार्थं सुखं च माकार्षीस्त्वं च राज
र्षिरतो मद्भजनेनात्मानं सफलं कुरु अन्यथा ह्येतादृशं जन्म निष्फ
लमेव ते स्यादित्यर्थः [illegible] ३३

सदानंदीटीका ११

ब्राह्मणा ये सदाचारास्तथैवोत्तमयोनयः तथा राजर्षयः पुण्याः स
त्त्ववत्त्वविवेकिनः १ मद्भक्ता यान्ति मोक्षं ते किमु वाच्यमिहाखिलैः
मद्भक्तेरीदृशो यस्मान्महिमातोऽतियत्नतः २ नरदेहमिमं प्राप्य पुरुषा
र्थैकसाधनं क्षणभंगुरगर्भान्तर्वासदुःखादिभिर्हतं नश्यत्ययं न या
वत्तावच्छीघ्रं भजस्व मां अनित्यत्वादनानंदरूपत्वादस्य किंचन
विलंबं माकुरु त्वं भो भोगार्थं मा स्पृहां कुरु दुर्लभं प्राप्य विप्रत्वं नृपत्वं
वाप्यथवा नरः शरणं नैति गोविंदं दैवेनैव वंचितः अतस्त्वं पार्थ रा
जर्षिः मामेव शरणं कुरु ४ नो चेत्ते जन्मसाफल्यं कथमित्याशयोर
थः ३३

नीलकंठीटीका १२

ब्राह्मणादयः पुनः पुण्याः सदाश्रयेण परां गतिं यान्तीत्यत्र किं चित्रं
अतस्त्वमिमं मर्त्यलोकमनित्यं नश्वरं असुखं सुखलेशहीनं प्राप्य मां पर
मात्मानं भजस्व लोकान्तरे भजनं न भविष्यतीत्यर्थः तथा च श्रुतिः
इह चेदवेदीदथ सत्यमस्ति न चेदवेदीन्महती विनष्टिरिति ३३

आनन्दीटीका १३

+ अनित्यं क्षणिकं असुखं विचार्यमाणं दुःखैकरूपं इमं लोकं कर्मभू
मिं प्राप्य मां भजस्व नित्यसुखाविनाभावात् ये ज्ञानकर्मसमुच्चयानुष्ठाने

+ किं पुनः पुण्याः श्रौतकर्मज्ञानाधिकाराद्युत्तमजातयः भक्ताः उक्तप्रकारेणोपयुक्तेन ब्रह्मध्यानमयेऽद्भावंतः ब्राह्मणाः
परां गतिं कथं न यान्ति तथा पुण्या भक्ता राजर्षयश्च राजानः प्रजापालयंतः अतएव एतेऽपि ज्ञाने कनिष्ठाः कथं
न परां गतिं यान्ति एवमीश्वरभजनमेव सिद्धान्तयति ॥+

+ किंपुनः किमत्रवाच्यं येपुण्याःपुण्यकर्मविपाका[illegible]ह्मणो त्कृष्टयोनयोब्राह्मणाराजर्षयोक्षराजत्वे
सत्यपवर्गभागित्वान्मुख्योऽतश्चयोऽत्रोभक्ताः संतःपरांगतिंयास्यंति तदेतेनसर्वलोकसाधारणत्व
मात्मज्ञानस्यभगवताप्रतिपादितं यतएवशुक्लेष्टफलामद्भक्तिस्ततः +

नमामाराधयेत्यर्थः ३३

रामकंठीटीका १४

+ इमंलोकंकर्मभूमिलक्षणंभुवनंप्राप्यात्रजन्मलब्ध्वेत्यर्थः कीदृशं
लोकमनित्यंशरीरस्यभोगसाधनस्यभोगानांचानवस्थादस्थिरं
असुखंचयदप्यत्रकिंचित्सुखंवेत्याशंक्यते तदपिविवेकदृशाऽवि
चार्यमाणंदुःखमेव तदुक्तंगुरुणानन्नेन परिणामतापसंस्कार
दुःखैर्गुणवृत्तिविरोधाच्चसर्वंदुःखंविवेकिनइतियथाजलधिम
ध्यपतितस्यरत्नातिशयलाभःकथंचित्संभाव्यतेतथादुःखैकहेतु
कर्मभूमिपतितस्यमद्भक्तिलाभएवास्मिंल्लोकेश्रेयइत्यर्थः गुणवृत्ति
विरोधाच्चसर्वंदुःखंविवेकिनइति [illegible]
[illegible] ३३

लासिकी [illegible]टीका १५

एवंचेत् पुण्याःसत्कृतिनोब्राह्मणाउत्कृष्टयोनयः तथाराजर्षयः राजानः
क्षत्रियाश्चैतेपवर्गभागित्वाद्दर्शयस्वभक्ताः संतःपरांगतिंयान्ती
तिकिंपुनर्वक्तव्यम् अतोहेतोरिमंलोकंसर्वपुरुषार्थसाधनयोग्य
मतिदुर्लभंमनुष्यजन्ममहतापुण्यपुञ्जयेनासाद्यमामीश्वरंभज
स्वोपास्वयतोनित्यमसुखम् तस्माद्विलम्बमकृत्वा तथाऽसत्वे
सलोकार्थोद्यमंचहित्वामामेवभजस्वेत्यर्थः तदुक्तंजलार्णवे अ
त्रजन्मसहस्राणांसहस्रैरपिपार्थिव कदाचिल्लभतेजन्तुर्मानुष्यंपु
ण्यसंचयात् सोपानभूतंमोक्षस्यमानुष्यंप्राप्यदुर्लभम् यस्तार
यतिनात्मानंतस्मात्पापकरस्तुकइति सुकार्यमद्यकुर्वीतपू
र्वाह्णेचापराह्णिकम् नहिमृत्युःप्रतीक्षेतकृतंवाप्यथवाकृत
मिति [illegible] ३३

पंचोलीटीका

यदाएवंदुष्कुलाअनधिकारिणोपिमद्भक्ताः परांगतिंगच्छंतीति
तत्रसदाचाराः सत्कुलाश्चपरांगतिंयान्तीतिकिंपुनर्वक्तव्यमित्याह
किंपुनरितियेपुण्याः अपापयोनयः ब्राह्मणास्तथाः भक्ताराज
र्षयःक्षत्रियवराः तेषांकिंपुनर्वक्तव्यं अतोऽनित्यंक्षणभंगुरमसु

गी॰
टी॰
न॰

त्वं सुखवर्जितं इमं मनुष्यलोकं प्रारब्धार्थमायतनं दुर्लभं मनुष्यत्वं लब्ध्वा मां भजस्व मत्सेवां कुरु ३३

138

दसगवीरससिद्धाथिनी॥

किं पुनर्वाच्यं ब्राह्मणाः ब्रह्म यज्ञवेदतत्त्वं विदंत्यधीयते वा ब्राह्मणाः पुण्याः पुण्याचाराः भक्ताः कर्मफलस्य मयि समर्पणेन मामेव सेवमानाः राजर्षयः प्रभुत्वे सति सूक्ष्मार्थदर्शिनः परां गतिं प्राप्नुवंतीति किं वदंत सिद्धमिति भावः यद्वा ब्राह्मणाः प्रथमवर्णस्थाः राजर्षयः क्षत्रियजातयः पुण्या भक्ता इति विशेषणद्वयमुभयोः समानं तत्र ब्राह्मणस्य यथार्थवर्णगोणीवृत्तिः क्षत्रियस्य तमस्त्वेति प्रागेव प्रतिपादितं अत एव क्षत्रियपदग्रहणमनधिकारान्स्त्रीशूद्रवैश्यानुक्त्वा सर्वेषामुद्धारयि॰ कारित्वप्रतिपादनार्थं पर्यंते कृतमिति यत एवं फलाय मद्भक्तिस्ततस्त्वमपि अनित्यं मया कालरूपेण ग्रसितमारब्धत्वान्न॰ राभंगुरं अत एव वरवियोगस्यावश्यंभावादसुखं न सुखप्रदमिमं मर्त्यदेहीभूतं लोकं राजलोकं प्राप्य प्रतिहृद्भावेन लब्ध्वा मां परमेश्वरं भजस्व स्वयमेभूतये तद्धिंसया प्रीणयस्व मदिष्टस्य संपादनादिति भावः ३३॥

मधुभाष्य

३३॥

भाषा अनुवाद

जब कि मेरी भक्ति अनधिकारियोंको मुक्ति देती तो फेरि ब्राह्मण कहे ब्राह्मण आदि तीनो वर्ण जो ब्राह्मण क्षत्री वैश्य पवित्र औ मेरे भक्त उनकी मुक्ति मे क्या संदेह है तिस में भी राजर्षि अर्थात् *राजवंश हो इस अनित्य संसार सुखको त्याग करि के यह लोक कहे नर देह पाय हमको भजो ३३ ।

*राजवंश क्षत्रियराजा लोग जो दशादिक्पालों के अंशसे प्रकट है उनको क्या कहना है सो तुम

दोहा

क्या ब्राह्मणादि राजऋषि शुद्ध भक्त जोहि सुखअनित्य इ
हलोकको जान भजहु तुं मोहि ३३

139

मन्मनाभवमद्भक्तो मद्याजीमांनमस्कुरु मामेवै
ष्यसियुक्त्वैव मात्मानंमत्परायणः ३४ इतिश्रीभ
गवद्गीतायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे रा
जगुह्यनाम नवमोध्यायः ९ ॥

शाङ्करभाष्यटीका १

कथं मन्मनाइति मयि मनोयस्य तवमत्वं मन्मनाभव तथा
मद्भक्तोभव मद्याजी मद्यजनशीलोभव मामेव च नमस्कुरु
मामेवेश्वरमेष्यसि आगमिष्यसि युक्त्वा समाधाय चित्तमेवमा
त्मानं मामेवमहं हि सर्वेषां भूतानां आत्मा पराच गतिः परम
यनं तं मामेवम्भूतं एष्यसीत्यतीतेन पदेन सम्बन्धः मत्पराय
णः सन्नित्यर्थः ३४ इतिश्रीमद्भगवद्गीताभाष्ये नवमोध्यायः ९

आनन्दगिरिकृतटीका २

भगवद्भक्तेरित्थम्भावं पृच्छति कथमिति ईश्वरभजने इतिकर्त
व्यतां दर्शयति मन्मनाइति एवंभगवन्तं भजमानस्य मम किं
स्यादित्याशंक्याह मामेवेति समाधाय भगवत्येवेति शेषः एव
मात्मानमित्येतद्विवृणोति अहंहीति अहमेव परमयनं तवेति म
त्परायणस्त्वाभूतः सन् मामेवात्मानमेष्यसीति सम्बन्धः तदेवं
मध्यमानां ध्येयं निरूप्य नवमेनाध्यायेनानामाराध्याभिधानमुखेन
निजेन पारमार्थिकेन रूपेण प्रत्यक्त्वेन तत्त्वं परमेश्वरस्य परमा
राधनमित्यभिदधता सोपाधिकं तत्पदवाच्यं निरुपाधिकञ्च त
त्पदलक्ष्यं व्याख्यातं ३४ इतिनवमोध्यायः ९ ॥

स्वामिकृतटीका ३

भजनप्रकारं दर्शयन्नुपसंहरति मन्मनाइति मय्येवमनोयस्य स
मन्मनास्त्वंभवतथामद्भक्तोमत्सेवकोभव मद्याजीमद्यजनशीलो
भव मामेववनमस्कुरु एवमेभिःप्रकारैर्मत्परायणःसन् आत्मा
नंमनोमयियुक्त्वासमाधायमामेवपरमानंदरूपमेष्यसिप्राप्स्यसि
निजमैश्वर्यमाश्चर्यंभक्तेश्चाद्भुतवैभवं नवमेराजगुह्याख्येकृपया

श्री
गी टी
न
160

वोचदच्युतः ३४ इतिश्रीभगवद्गीतायांसुवोधिन्यांटीकायांराज
विद्याराजगुह्ययोगोनामनवमोऽध्यायः ९ ॥

पैशाचभाष्यटीका ४

मन्मनामय्येवमनोयस्यसमन्मना भवज्ञायस्वमय्येवभक्तिर्यस्यसमद्भक्तः मांयष्टुंशीलंयस्येतिसमद्याजीभवेतिसंबंधः मामीश्वरंनमस्कुरुवंदस्व एवंमन्मनाःकृत्वामामेवैष्यसिप्राप्स्यसि युक्त्वासमाधाय एवंयुक्तेनप्रकारेणात्मानंमत्परायणः अहमेववासुदेवःपरममय नमाश्रयोयस्यसमत्परायणः एवमात्मानंयुक्त्वामत्परायणःसन् नामामेवैष्यसीतिसंबंधः ३४ इतिपैशाचभाष्येनवमोऽध्यायः ९

रामानुजभाष्यटीका ५

भक्तिस्वरूपमाह मन्मनेति मन्मनाभवमयिसर्वेश्वरेनिखिलहेयप्रत्यनीककल्याणैकतानेसर्वज्ञेसत्यसंकल्पेनिखिलजगदेककारणे परस्मिन् ब्रह्मणिपुरुषोत्तमेपुंडरीकदलामलायतेक्षणे स्वच्छनीलजीमूतसंकाशेयुगपदुदितदिनकरसहस्रकिरणे लावण्यामृतमहोदधावुदारपीवरचतुर्बाहावत्युज्ज्वलपीताम्बरधरेऽमलकिरीटउरसिस्थितहारकेयूरकटकादिभूषितेऽपारसौशील्यसौंदर्यमाधुर्यगांभीर्यौदार्यवात्सल्यजालनिधावनालोकितविशेषाऽशेषशरण्येस्वसर्वस्वमितितैलधारावदविच्छेदेननिविष्टमनाभव तदेवविशिनष्टिमद्भक्तःमत्प्रियत्वेनभक्तोमन्मनाभवेत्यर्थः पुनरपिविशिनष्टिमद्याजीअनवधिकातिशयमदनुभवकारीमद्यजनपरोभवयजनंनामपरिपूर्णशेषवृत्तिः औपचारिकसांस्पर्शिकाभ्यवहारिकादिसकलभोगप्रदानरूपयागेयथा अनुभवजनितनिरतिशयप्रियकारितमद्यजनपरोभवतथामन्मनाभवेत्युक्तंभवति पुनरपिविशिनष्टिमांनमस्कुरुअनवधिकातिशयप्रियमदनुभवकारितात्यर्थप्रियाशेष[illegible]वृत्तिपर्यन्तं मय्यात्मतिमात्रेऽवनतएवव्यवसायंकुरुमत्परायणः अहमेवपरमयनंयस्यासौमत्परायणः पुनर्मय्यात्मधारणसंभावनयामदाश्रयेत्यर्थः मामेवैष्यसिआत्मशब्दोऽत्रमनोविषयः एवंरूपेणमनसामामनुभूयमामिष्टांमांनमस्कृत्यमत्परायणोमामेवप्राप्स्यसीत्यर्थः तदेवं

नि॰

लौकिकानि शरीरधारणार्थानि वैदिकं नित्यनैमित्तिकानि कर्मा
णि मत्प्रीतये मद्विषतयैकरसो मामेव कारितइति कुर्वन्सततनमकी
र्तनयजननमस्कारादिकान् प्रीत्या कुर्वाणो मत्प्रियस्सनिखिल
जगन्मद्विषतयापकरममितिचानुसंदधानोन्यथ्यप्रियमद्गुणगणं
वाजसंधायमड्कलत्वणामिदमुपासनमुपादधानो मामेव प्राप्स्य
सि २८ इतिगीताभाष्येनवमोध्यायः ९

अभिनवगुप्तकृतटीका ८

पापयोनयः पशुपक्षिसरीसृपादयः स्त्रियइमत्ताः वैश्या इतिकृ
ष्यादिकर्मान्तररता शूद्रा इतिकास्येन वैदिकक्रियानधिकृताः प
रन्त्वहन्नयस्यतेपिमदाश्रिता मामेव यजन्ते गजेन्द्रमोक्षणादीनि
हिचरितानि भगवतः सहस्रशः श्रूयन्ते किं पुनरेतद्विपरीतह्मनयः ३१
न्य केचिदाचक्षते द्विजराजप्रशंसापरमेतद्वाक्यं नतु स्त्र्यादिष्वपवर्ग
प्राप्तिनास्त्यैवेति तेभगवतः सर्वानुग्राहिकां शक्तिमिव विघ
यतयाखण्डयन्तः नमे द्वेष्योस्ति नप्रियः अपिचेत्सुदुराचार इत्यस्या
नि चैवं प्रकारस्फुटार्थप्रतिपादकानि वाक्यानि विरोधयन्तो निरति
शयशक्ति प्रपंचसाधितार्द्वैतभगवत्तत्वभेदलिंगबलादेवानयं
वा नोन्यागमविरोधान्चेतयमानाः कथमिदमितिपर्यनुयुज्य
मानायदिपरमन्तर्गर्भीकृतजात्यादिमहाहृद्दृहीनाविष्टान्तः
करणामात्सर्यावहित्थलज्जाजिह्मीकृतवांसुवृहस्पतयः समयप्रस
जनस्यासमञ्जसलापिन इतिहासरसविषयभावमात्मन्यारोपयन्ति
यत्सर्वैवं वाप्यासर्वस्यकरोतिशिवम् अद्वैतेन ब्रह्मणापरा सर्वानु
ग्रहशालिनी शक्तिर्विजृम्भते तेन यन्नीयन्ते तदाम्नये संग्रहोयं
३० इतिश्रीमद्राजानकाभिनवगुप्तविरचिते श्रीभगवद्गीतार्थ
संग्रहे नवमोध्यायः ९ ॥

परमार्थप्रपाटीटीका ७

अथभजनप्रकारमाह मन्मनाइति मयिमनोयस्यासौमन्मनास्सं
कल्पोपिमदाकारएवतथाविधोभव ममभक्तो भवनान्यस्य तु

ऽस्मद्याजी भव मदर्थमेव यजनस्वनयाताऽऽत्मनमम्य विवर्जनेन मां स
र्वत्रावस्थितं नमस्कुरु तदुक्तं विस्मृत्यस्मयमानान् स्वान् दृष्ट्वा व्रीडां
च दैहिकीं प्रणमेद्दंडवद्भूमावाश्वचांडालगोखरमिति एवंचैत्य
गयुक्तोऽस्वात्मैवात्मानं परमानंदरूपं प्राप्स्यसि तदुक्तं वि
लिखितमिवरूपं चित्तमित्तिमोष्मुरारेः समनरवमनोयेरर्पितं तन्मदा
त्रे प्रतिपदस्मदयद्भिः सात्त्विकैर्वैकितोगामस्तरहभवपयोधेः पार
मुहं चयंति अथाध्यायगृतात्पर्यं विस्राभासः किलासौ मदर्थिक
रणकः स्यान्मदत्तानकार्यं यन्मिथ्यातहि मत्वाश्रयमिति नियमो नैव
मिथ्याश्रितं सत् सत्वं सत्यश्रमां तेन भजति सहसावाप्यितिं मत्प्रसंगे
न स्पर्शो वा कदाचिन्न भवति नवमेनोक्तमेतद्रहस्यं इति श्रीमद्दैव
ज्ञपंडितसूर्यविरचितायां भगवद्गीताटीकायां परमार्थप्रपायां रा
जविद्याराजगुह्ययोगो नाम नवमोऽध्यायः ९

वनमालीटीका ८

भजनप्रकारं दर्शयन्नुपसंहरति राजभक्तस्यापि राजद्रष्टत्वमस्त्यतआहै
मनस्तथासतन्मनाअपि न तत्कुरु मनउक्तं मन्मनाभवमद्भक्तर
तितथामद्याजीमद्यजनशीलः मां नमस्कुरु मनोवाक्कायैः सए
वमेभिः प्रकारैर्मत्परायणः मदेकशरणः सन्नात्मानं चित्तं युक्त्वा
मपि समाधाय मामेव परमानंदघनं अप्राकृतालौकिकानंतवि
भूतिवैभवं कालादिनिर्बंधनसर्वोपद्रवशून्यं निहृतनाशेषाविद्युः
सन्प्राप्स्यसि एवकारेण स्वस्मात्पार्थक्यरघस्य तु हत्वाभ्यां गृहीतास्वरू
ऊपतेदान्यार्थसारथ्यतत्पराइससदैवततयात्मतिरोमक्तपदोऽय
मानानंतब्रह्मांडब्रह्मादिभिश्चित्तेनाप्यशक्यनतत्त्वानादिचिंत्याचिं
त्यानंतशक्तेः सदनंतगुणालयानंदघनस्यैतेभिंतं प्राप्यात्तं व्या
वर्तयति एतादृशाद्भुतैश्वर्यत्तानमेव राजविद्येत्यादिना गोप्यमुक्तं
तन्मत्प्रसादं विना न भवति यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ त
स्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः इति श्रुतेरिति भावः ३४
इति गीतायां नवमः ९

नन्वययावामाभिन्नपापोपिसंसारान्मुच्यतेतस्याः किंस्वरूपंसा
दिरूपेतायांतत्स्वरूपमुपदिशन्नुपसंहरति मन्मनाइति एवमुक्त
प्रकारेणात्मानंदेहमपियुक्त्वासमर्प्यमद्भक्तोमत्सेवकस्त्वंभवकीदृश
इत्यपेक्षामाह मत्परायणः अहमेवपरमयनंमननसाधितिस्थानंय
स्यतस्तथामद्व्यतिरिक्तैः यस्मिन्नात्मरुद्रेंद्रादिस्वरूपेतस्मिन्लोकभोगे
स्वर्गादिषुवायस्यमनोनतिष्ठतिमदनन्यइत्यर्थः मद्भक्तस्यभक्तंग
गर्भैकैर्लिङ्गिभिर्विशेषणैरनत्यवमाह मन्मनाइति मनःशब्देनात्रबु
द्धिर्विमाहंकारायपिगृह्यंतेमयिसर्वेषांमनोयस्यसतथामनसाय
किंचनसंकल्पंकरोषितत्सर्वंमय्येवविषयेकुरुनतुशाक्तनपदार्थे
बुद्ध्याधैर्येत्रबुआनिश्चयात्मिकयायत्किंचनसंकल्पंकरोषितत्सर्वं
मय्येवविषयेकुरुनत्वन्यत्रानपदार्थेबुद्ध्यावैर्यैत्रबुआनिश्चयात्मि
कयायत्किंचित्स्थूलसूक्ष्मवस्तुजातंनिश्चिनोषितत्सर्वंमय्येववि
षयेकुरुसर्वेषुचेतनाचेतनपदार्थेषुतदात्म्येनकुशलएवस्थितोना
स्तीतिनिश्चयंकुर्वित्यर्थः चित्तेनयत्किंचित्स्मरणंकरोषितत्सर्वम
य्येवविषयेकुरुमत्स्वरूपगुणविग्रहनामरूपादीनांस्मरणंकुर्वि
त्यर्थः अहंकारेणदेहादिप्रकृतिकेषुयत्किंचिदात्मात्मीयाद्यभिमा
नं करोषि तत्सर्वंमय्येवकुरुममात्मात्मीयादियत्किंचिद्दृश्यतेतत्स
र्वंकृष्णएवममदीयानांचकृष्णात्मकत्वात्कृष्णाद्यपृथक्स्थितिप्रवृत्ति
कत्वात्कृष्णव्याप्यत्वात्कृष्णस्तत्वाद्वेत्यर्थः इत्यनेनात्मकृष्णचरणद्वय
स्पृहानिर्मलियथाभवतितथाकुर्वितिसूचितं नन्वयदित्वमनस्क
त्वेनैवमद्भक्तनासिअतिनहिंकंसशिशुपालादयोपिमद्भक्ताः कथं
नभवेयुस्तेषामपिमद्द्वेषादिनात्वन्मनस्कत्वादित्याशंकावाहे
दियद्वृत्तयोपियस्यमय्येवतिष्ठंतिसमद्भक्तइत्यर्थः कथंतेनसभक्तस्य
तेभ्योवैलक्षण्यमाह मद्याजीमांयजपूजांलेयस्यसतथाश्रोत्रेणम
मैवकथाःश्रृणुत्वचाममैवलिंगाद्यालिंगयचक्षुषाममैवरूपंपश्य
घ्राणेनममैवनिर्माल्यगंधंजिघ्ररसनयाममैवप्रसादंरसयवाचाम
मैवनामसंकीर्तनंकुरुपाणिभ्यांममैवमंदिरादिमार्जनंकुरुपद्भ्यां

श्री
गी टी
९

ममैव मंदिरादिगमनं कुर्वित्यादिरीत्या सकलबाह्येंद्रियवृत्तिभिरे
व निरतिशयप्रियं मां मत्वा मामेव संभजय कं साधीनो नातीष्टो म
द्विषयिमः सर्वेंद्रियव्यापारयोनस्मरतमेकेन विघ्नपादिति मित्रेनम
मनस्काम भवन्नपि न मद्भक्ता इति नानाबंमस्यजक एव भवेत्यर्थः
एवं देहद्वयेनापि मत्सेवार्थं विना मद्भक्तो भवेत्याह मां नमस्कुरु
श्रपरिमितापराधालयं सर्वगुणार्थहीनमनेकविविधयोनिष्वभ्र
प्रा॰ मंतमनेकजन्मसहस्रतः तेन लब्धमानुषदेहं शास्त्राचार्याकिं कथमे
कर्मरहितमनन्यगतिकं दुराचारिणं शरणापन्नं मां कृसं विलास्यः
कः संसारान्मोचयतीति निश्चित्य पदद्वयकरद्वयजानुद्वयोरः शिरोह
गवचोमनोभिरष्टांगैर्दंडवत्प्रणिपातरूपैः प्रणामैर्मय्येव सर्वेश्वरे सर्व
शरीरद्भूमौ समर्पयेत्यर्थः एवं कृते सति मम किं फलं स्यादित्यपेक्षा
यामाह मामेवैष्यसि सर्वकारणं सर्वशरण्यं सर्ववेदवेद्यं सर्वदेववं
द्यं निखिलहेयप्रत्यनीकानंताचिंत्यकारुण्यवात्सल्यसौशील्यादि
कल्याणगुणार्णवं त्रिभुवनैककमनीयमरकतमणिदेहं हरे मा स्वांस
कलजनमनोहरं सर्वं गोपीकांतं रमापतिं महाविभूतिपतिं मामे
वैष्यसि प्राप्स्यसि न त्वन्यं देवादिकमित्यवधारणार्थः ३४ नवमेन व
धा भक्तिरुक्ता येनार्जुनाय वै तं वंदे राधिकाकांतं माधवं पार्थसार
थिं १ इति श्रीमन्नियमानंदवंशावतंसकृष्णदासस्यात्मजेन वासिनागि
रिधारिदासेन विरचितायां गीतार्थकृष्णवैजयंत्यां नवमोऽध्यायः
९

मधुसूदनीटीका ९

भजनप्रकारं दर्शयित्व उपसंहरति ॥

राजभक्तस्यापि राजवश्यस्य पुत्रादौ मनः । तथा मत्तन्मना अपि न तद्
भक्तस्तत उक्तं मन्मना भव मद्भक्त इति तथा मद्याजी मद्भजनशीलः
मां नमस्कुरु मनोवाक्कायैः एवमेभिः प्रकारैर्मत्परायणो मदेक
शरणः सन्नात्मानमंतःकरणं युक्त्वा मयि समाधाय मामेव परमानं
दघनं स्वप्रकाशं सर्वोपद्रवशून्यमुपैष्यसि प्राप्स्यसि । श्रीगोविंद
पदारविंदमकरंदास्वादशुद्धाशयाः संसारांबुधिमुत्तरंति सहसा प
श्यंति पूर्णं महः वेदांतैरवधारयंति परमं श्रेयस्त्यजंति भ्रमं द्वैतं स्वप
समं विदंति विमलां विंदंति चानंदतां ३४ इति श्रीमत्परमहंसपरि

प्राजकाचार्यश्रीविश्वेश्वरसरस्वतीपादशिष्यश्रीमधुसूदनसरस्वती
विरचितायांश्रीभगवद्गीतागूढार्थदीपिकायांभजनप्रकारनिरूप
णंनामनवमोऽध्यायः ९

सदानंदीटीका ११

भजनप्रकारंश्रीशोदर्शयन्नाहसद्वचः मनोमयीभवेत्यस्यसत्वंमद्
रूपएवसन् मद्याजीसततंश्रुत्वामामेवत्वंनमस्कुरु मनोवाक्काय
सद्भावैःप्रकारैरेभिरेवच २ मेदकशरणोभूत्वासमाधायमनोमयि
मामेवस्वप्रकाशंत्वंसच्चिदानंदविग्रहं ३ सर्वोपाधिविनिर्मुक्तममभ
यंशाप्स्यसिस्वयं यद्विद्याराजविद्यात्रिभुवनविस्तृतोयस्यश्रुतेःकाणं
गि४ शोयस्मिन्स्नातरात्मासज्जेनिजरतिंकुर्वेदंप्रांतिस्थलो इत्याचा
रोपियस्यप्रथितमुयशसोभक्तिलेशेनसाधुस्तंश्रुमानंविसृज्यंवि
धिहरचरणांबुजमेवाश्रयामि ४ इतिभावप्रकाशेश्रीसदानंद
विदाकृते तदर्थेतेयताप्रोक्तिर्नवमःसर्णतांगतः ९ ॥

नीलकंठीटीका १२

भजनप्रकारंदर्शयति मन्मनाइति मय्येवमनोयस्यनतुपुत्रादौसमन्
मनाः ममैवभक्तोनराजादेर्धनाद्यर्थंसमद्भक्तः मद्याजीमदर्थमेव
यजतेनस्वर्गाद्यर्थंसमद्याजीतादृशोभव मामेवनमस्कुरुशरणा
गतेनतस्मात् एवमनेनप्रकारेणयुक्त्वायोगंकृत्वामामेवात्मानंस
र्वांतरंएष्यसिप्राप्स्यसि अभेदेनघटाकाशइवमहाकाशं यतोमत्प
रायणः अहमेवसर्वोपाधिशून्यश्चिदात्मापरंसर्वोत्कृष्टंअयनंप्राप्यं
यस्यसमत्परायणः तथाचश्रूयते यथानद्यःस्यंदमानाःसमुद्रे
स्तंगच्छंतिनामरूपेविहाय तथाविद्वान्नामरूपाद्विमुक्तःपरात्परं
पुरुषमुपैतिदिव्यमिति ३४ इतिश्रीभीष्मपर्वणिनैलकंठीयेभार
तभावदीपेनवमोऽध्यायः ९

आनंदीटीका १३

उमयोनरामियंकारणमालाशेषंबद्धशोभाध्यानपूर्वकम् ३४
इतिश्रीभगवद्गीतासुनवमोऽध्यायः ९

रामकंठीटीका १४

श्री
गी टी
न

143

एवंरूपमपीमं लोकं लब्ध्वा मामनुजनस्त्वं भजस्वेत्याह ॥

एवंविधः सन्मद्भक्तो भव कीदृशो मन्मना मद्याजी तथा मन्नमस्कारपरः एतेन विशेषणत्रयेण चित्तकायवचनक्रियाणां भगवत्स्वरूपलक्षणो कृतस्य विशेषात्मको मुख्यो भक्तिप्रकारः प्रतिपादितः मां नमस्कुर्वित्यनेन हि मंत्रजप नमस्कारस्तुत्यादिरूपा भगवत्पणतिरुक्ता एवमनेन प्रकारेणात्मानमंतःकरणं युक्त्वा समाधाय मत्परायणो मदेकालम्बनः संहृतः सन्मामेवैष्यसि मद्भेदसमापन्नो भविष्यसीत्येवम् यो ज्ञेयो निर्गुणो रवयनधान्तशांतिप्रसन्ने हृदये न्यादिदिक्षु विकसन्निर्मलसप्रसादः यत्रार्थोऽयं स्फुरति सततं ज्ञानविज्ञानसर्वस्वं त्राध्यायेतरानवमे राजहंसो वगीर्वः ३४

इति श्रीराजानकरामविरचिते नवमोऽध्यायः ९

अथ भजनस्वरूपं दर्शयन्नुपसंहरति लासिकी [illegible]टीका १५

एवंविधो ममेश्वरस्य भक्त उपासको भव कीदृशो मन्मनाः मयि प्रतीचि मनो मननात्मकमन्तःकरणं यस्य सः तथा मद्याजी मदर्पणार्थमेवोक्तोपपन्नाया यजनशीलः यजनमत्र सर्वस्य कायिकस्य कर्मण उपलक्षणम् तथा मामीश्वरं साम्राज्यस्वन्दसम्नाष्टिरूपं नमस्कुरु नमस्कारोऽत्र वाचिकस्य कर्मण उपलक्षणम् एवं मनोवाक्कायव्यापारैर्मत्परायणोऽहमेव चिद्रूपः एकं शरणं यस्य स ईदृशः सन्नन्यपरिच्छिन्नदेहादिनिष्ठदृष्टिरात्मानं प्रत्यगात्मानं युक्त्वा एवमुक्तप्रकारेण योगेन समाधाय मामेव परमानंदघनं विश्वरूपमीश्वरमेष्यसि प्राप्स्यसीति शिवम् जीवन्मुक्तैर्हन्त भजनाद्यात्मसमापयत् ईश्वरं नवमेयस्तं प्रार्थयेभक्तिमव्ययम् ३४ इति श्री[illegible]राजविद्याराजगुह्ययोगो नाम नवमोऽध्यायः ९ लासिक्यं

पंचोलीटीका

भजनप्रकारं दर्शयन्नुपसंहरति मन्मनेति मन्मना मच्चित्तो भव मद्भक्तः मयि भक्तिमान्भव मद्याजी मयि यजनशीलो भव मां नमस्कुरु मामेव प्रणाम एवं चित्तयुक्तः समाधिं कृत्वा मत्परायणो मां परमात्मस्वरूपं प्रवेष्यसि ३४ इति श्रीपंचोलीनवमोऽध्याय

:९ ॥

रणवीरसमिद्बोधिनी॥

अथ भजनस्यैतत्स्वभावं फलसहितं कथयन्नध्यायमुपसंहरति
मन्मना इति त्वं मद्भक्तो भव अत्यं मद्भक्तिं कुर्वित्यर्थः कथमित्य
तो विशिनष्टि मन्मना इत्यादिना मय्येव मनो यस्य स मदर्पितमा
नसकर्मसमूहो भवेत्यर्थः तथा मद्याजी मामेव यजते पूजयतीति
तादृशः एतच्चोपलक्षणं कायकव्यापारस्य तथा च मदर्पितका
यिकव्यापारो भवेत्यर्थः तथा मां नमस्कुरु यद्यद्वा वदसि त
त्सर्वमेव निवेदयेति तात्पर्यं ततश्च किं स्यादित्याह मामेवेति
एवं त्रिविधकर्मणां मदर्पणलक्षणया भक्त्यात्मानमन्तःकरणं
युक्त्वा समवधानीकृत्य यद्वात्मानं यथोचितकर्मविषयकं प्रयत्नं
युक्त्वा विधाय मामेवैष्यसि मत्सायुज्यमेव प्राप्स्यसि कीदृशः स
मत्परायणः अहमेव परमयनं गतिर्यस्य तादृशो मदेकावलम्ब
न इति भावः ३४॥ इति श्रीभगवद्गीता रणवीरसमिद्बोधि
न्यां गीताव्याख्यायां नवमोध्यायी संज्ञं सर्वार्थं च समाप्तिमाग
मत् ९ शुभमस्तु॥

मधुभाष्य

३४ इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचिते श्रीम
द्गीताभाष्ये नवमोध्यायः ९॥

भाषा अनुवाद

भजन प्रकार देखावते कहते हैं कि मेरे मे जिसका मन है ऐसे तुम मन्मना होउ औार मेरेही भक्त होउ औा मेरी ही इजा करो औार मेरेही को प्रणाम करो इसी प्रकार से मत्परायण होके आत्मा जो मन तिसको मेरे मे योग करे लगाय के परम आनन्द रूप मेरे स्वरूपको प्राप्त होउगे इस नवयें अध्याय मे अपनी भक्तिका अद्भुत प्रभाव राजयोग नाम भगवान ने प्रकाश कियाहै ३४ ।

दोहा

मोमे मन ममभक्तहो मोहि पुज कर नमस्कार ऐसेंमन
हु जोडमोहि मो मे करहु विहार ३४ इतिश्री नवमः